॥ श्रीः ॥

विद्याविलास आयुर्वेद ग्रन्थमाला

१३

भट्टनरहरि विरचितम्

वाग्भट मण्डनम्

सम्पादकः

आयुर्वेद विद्वान्

प्रो० के० आर० श्रीकण्ठमूर्ति

प्राचार्यः (निवृत्तः)

शासकीय आयुर्वेद महाविद्यालय

बेंगलूर

चौखम्भा ओरियन्टालिया

प्राच्यविद्या एवं दुर्लभ ग्रन्थों के प्रकाशक एवं वितरक

वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० बाक्स नं० १०३२

वाराणसी–२२१००१ (उ० प्र०) भारत

टेलीफोन : ३३३४७६   टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बो० जवाहर नगर

(करोड़ीमल कालेज के पास)

दिल्ली—११०००७   टेलीफोन : २९११६१७, २३६७९०

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण : १९९२

मूल्य रु० १५०–००

नवीन प्रकाशन

१ **चरक संहिता** । महामुनिना भगवताग्निवेशेन प्रणीता महर्षिचरकेण प्रतिसंस्कृता । चरकचतुराननश्रीमच्चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाख्यटीकया म० म० श्रीगङ्गाधरकविरत्नकविराजविरचितया जल्प-कल्पतरुसमाख्यया टीकया च समलङ्कृता । कविराज श्रीनरेन्द्रनाथ सेनगुप्तेन कविराज श्रीबलाइचन्द्र सेनगुप्तेन च सम्पादिता संशोधिता च । द्वितीय संस्करण (१९९०) १–५ सम्पूर्ण १०००–००

सूत्रस्थान १–१२ अध्याय,	प्रथम खण्ड	१५०–००
,, १३–३० ,,	द्वितीय खण्ड	१५०–००
निदान से इन्द्रिय स्थान	तृतीय खण्ड	३००–००
चिकित्सा स्थान १–१८ अध्याय	चतुर्थ खण्ड	२००–००
,, ,, १९ से सिद्धिस्थान	पंचम खण्ड	२००–००

२ **चरकवचनामृतम् (चरक-संहिता के जनोपयोगी उद्धरण)** लेखक पं० वासुदेव शास्त्री तथा डॉ० उमाकान्त शुक्ल (१९८७) १५–००

3 Doctrines of Pathology in Ayurveda by Dr. K. R. Srikantha Murthy (1988) 75-00

4 Salient Features of Ayurveda by Dr. S. C. Dhyani (1988) 75-00

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी–२२१००१

VIDYAVILAS AYURVEDA SERIES
NO. 13

VĀGBHAṬA MAṆḌANAM

OF

BHAṬṬA NARAHARI

Edited by
Prof. K. R. SRIKANTHA MURTHY
LAMS; H. P. A.; F. A. I. M.
Principal (retired)
Govt. College of Indian Medicine
BANGALORE

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI DELHI

Publishers :

CHAUKHAMBHA ORIENTALIA

Post Box No. 1032

VARANASI-221 001 (India)

Telephone : 333476 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar

(Near Karorimal College)

DELHI-110 007 Phone : 2911617, 236790

© *Chaukhambha Orientalia*

First Edition : 1992

Price : Rs. 150-00

नवीन प्रकाशन

42 Clinical Methods in Āyurveda by K. R. Srikantha Murthy (1983) 150-00

58 Śārṅgadhara-Saṃhitā by Pt. Śārṅgadharācārya Son of Pt. Dāmodara. Sanskrit Text with English Translation, Critical Introduction and Appendix by Dr. K. R. Srikantha Murthy (1984) 200-00

६१ Mādhava-Nidānam. (Roga Viniścaya) of Madhavakar. Text with English Translation, Critical Introduction and Appendices by Dr. K. R. Srikantha Murthy (1987) 200-00

Respectfully dedicated

to the

Sacred memory of my father

Late Sri Kalale Rangaswamaiah (1894-1969)

Kannada pandit

प्रकरण-सूची

सूत्रस्थानोद्धारः

प्रथमं प्रकरणम्	१
द्वितीयं ,,	१४
तृतीयं ,,	१६
चतुर्थं ,,	१६
पञ्चमं ,,	२१
षष्ठं ,,	२३
सप्तमं ,,	२५
अष्टमं ,,	२८
नवमं ,,	३१
दशमं ,,	३४
एकादशं ,,	३८
द्वादशं ,,	४३
त्रयोदशं ,,	५५
चतुर्दशं ,,	५७
पञ्चदशं ,,	६२
षोडशं ,,	६४
सप्तदशं ,,	६७
अष्टादशं ,,	६९
एकोनविंशं ,,	७३

शारीरनिदानस्थानोद्धारः

विंशतितम प्रकरणं	७७
एकविंशतितमं ,,	८३
द्वाविंशतितमं ,,	८८
त्रयोविंशतितमं ,,	९५
चतुर्विंशतितमं ,,	१०३
पञ्चविंशतितमं ,,	१०५
षड्विंशतितमं ,,	१०७

चिकित्सास्थानोद्धारः

सप्तविंशतितमं प्रकरणम्	१०९

कल्पस्थान-उत्तरस्थानोद्धारः

अष्टविंशतितमं प्रकरणम्	११३

वाग्भटमण्डने प्रमाणतयोद्धृतानां ग्रन्थानामाचार्याणांश्च पृष्ठ संख्या सूची

अग्निवेशः १०७
अभिधान (चिन्तामणि) (हेमचन्द्रकोशः) २५
अमरकोशः ८७
अरूणदत्ताचार्यः ६, ९, ६८ इत्यादि
अष्टाङ्गहृदयदीपिका व्याख्या (भट्ट नरहरि विरचितम्) ५६, ६३.
आत्रेयः (भगवान्) १८
आयुर्वेद रसायन व्याख्या ६, ८६
ईश्वरसेनः १०६
ऋग्वेदः ८
कठोपनिषत् ३
कापिलः ५५
कार्तिककुण्डः ९७
कालिदास महाकविः ७, ८१ इत्यादि
काश्यपः ३६
कूर्मपुराणम् ४
कैयट व्याख्या ८५
क्षारपाणिः ८५
खरनादः १३, ५६, ६१ इत्यादि
गयदासः ११, २४, ४० इत्यादि
चरकः (चरकाचार्यः) ३, १४, १५, इत्यादि
चन्द्रिका व्याख्या (गयदास कृत) १०६
चिकित्सासारसंग्रह (चक्रदत्त) ११
चिकित्सासिद्धान्त ४१
जतूकर्णः १०३, १०४ इत्यादि
जेज्जटः २९, ३६, ३९ इत्यादि
जैमिनिः १७, ३३, ४४ इत्यादि
ज्योतिशास्त्रम् ५६
तन्त्रसारः १४
तन्त्रान्तरम् ७२
दृढबलः २, १३, ६५ इत्यादि
धन्वन्तरि (भगवान्) (दिवोदासः) ४३, ४४, ५२ इत्यादि
नागार्जुनाः ८५
नागार्जुनीयाः ७१, ७२
निबन्धसंग्रह व्याख्या (डल्हणकृत) २६, १११ इत्यादि
पञ्चदशी ५
पराशरः २८, ३०, ९५ इत्यादि
पुनर्वसु महर्षिः ६१, ७०, ७३इत्यादि
फणिधरः । फणीश्वरः (चरकाचार्यः) ५७,५८, ७८
बृहदारण्यकोपनिषत् ३
बोपदेव पण्डितः ६, १२
ब्रह्मसूत्रम् ६
भगवद्गीता ३, ४, ५
भट्टपादः (तन्त्रवर्तिककर्ता) ४, ५, ११ इत्यादि
भट्टारहरिश्चन्द्रः ३०,५२,५५ इत्यादि
भालुकिः ७४, ७५
भाव्यः ७६
भेडः २१, ६६ इत्यादि
भोगीश्वरः (चरकाचार्यः) ४६, ५१, ५८ इत्यादि

भोजः २७, ३२, ६६ इत्यादि
महाभाष्यम् ८५
माधवकरः ९७
मुण्डकोपनिषत् ४
मुनिः (चरकाचार्यः)
मेदिनीकोशः ८१
मृच्छकटिका १७
वाग्भट (अष्टाङ्गहृदयकर्ता) २, २१, २८ इत्यादि
वाव्यचन्द्रः २८, ६५, ९७
वैयासिकंसूत्रं (व्याससूत्रम्) ६
व्यासमहर्षिः १६, ८१
वृद्ध वाग्भट (अष्टाङ्गसंग्रहः) ६५, ९३ इत्यादि
वृद्ध सुश्रुतः ३२
संग्रहः (अष्टाङ्गसंग्रहः) ७
सहस्रफणिः (चरकाचार्यः) ५८
सुश्रुतः (सुश्रुताचार्यः दिवोदासशिष्यः) ३, ७, १०, १२ इत्यादि
सुश्रुतः (शालिहोत्रशिष्यः) ५१
स्मृतिः ३
हारीतः ७०, ९५
हेमाद्रिः ८६

सङ्केत विवरणम्

अ. सं.	अष्टाङ्ग संग्रहः—अनन्तदामोदरआठवले–१९८०
अ. सं. सू.	” सूत्रस्थानम्
अ. हृ.	अष्टाङ्गहृदयम्—सप्तमप्रकटनं—१९८२–चौखम्बा ओरियन्टालिया
अ. हृ. सू.	” सूत्रस्थानम्
अ. हृ. शा	” शारीरस्थानम्
अ. हृ. नि	” निदानस्थानम्
अ. हृ. चि	” चिकित्सास्थानम्
अ. हृ. सि	” सिद्धिस्थानम्
अ. हृ. उ	” उत्तरस्थानम्
च. स.	चरक संहिता–तृतीयप्रकटनं–निर्णयसागर–१९४१
च. सू	” सूत्रस्थानम्
च. नि	” निदानस्थानम्
च. वि	” विमानस्थानम्
च. शा	” शारीरस्थानम्
च. इ	” इन्द्रियस्थानम्
च. चि	” चिकित्सास्थानम्
च. सि	” सिद्धिस्थानम्
सु. सं.	सुश्रुत संहिता—चतुर्थ प्रकटनं १९८०–चौखम्बा ओरियन्टालिया
सु. सू	” सूत्रस्थानम्
सु. नि	” निदानस्थानम्
सु. शा	” शारीरस्थानम्
सु. चि	” चिकित्सास्थानम्
सु. उ	” उत्तरस्थानम्

INTRODUCTION

This treatise–Vāgbhaṭa maṇḍana–as its name itself suggests is intended to defend Vāgbhaṭa, the author of Aṣṭāṅgahṛdaya. It is the work of Bhaṭṭa Narahari who refutes the allegations made by another scholar Saura Vidyādhara, who finds many faults in Aṣṭāṅgahṛdaya and accuses its author, Vāgbhaṭa. Both the accuser and the defender justify their arguments with quotations from many earlier authorities. Thus, the treatise, is a literary criticism of high academic value, the only one of its kind known so far in Āyurveda literature. Hence its importance.

Despite remaining in manuscript form only till now in some of the libraries of India and Europe, it has attracted the attention of the present day scholars of Āyurveda. Its availability in print is being keenly felt and this edition hopes to fulfil that need.

Manuscripts—

Manuscripts of this treatise are available at the following libraries.[1]

1. Oriental Research Institute, Mysore. This has two manuscripts, viz,
   1. No. C. 2903–in Sanskrit script.
   2. No. A.-101 a copy of the above written in Kannada script.
2. Anup Sanskrit Library, Bikanir This has six manuscripts, viz,

---

1. Aufrecht-Catalogus Catalagorum-Vol-I. 1962.
   V. Raghavan. New Catalogus Catalagorum. Vol. I. 1968.
   B. Ramarao. Check-list of Sanskrit Medical Manuscripts in India. 1972.

1. No. 4398–Cikitsāsthāna
2. No. 4399
3. No. 4400–Sūtrasthāna.
4. No. 4401
5. No. 4402–Sūtra, Nidāna and Cikitsāsthāna.
6. No. 4403–Sārīrasthāna.

It is obvious that all these are the different parts of one book only. The title of the treatise mentioned in the colophon at the end is "Vāgbhaṭa-Khaṇḍana maṇḍana", the name of the scribe is given as Mādhava Bhaṭṭa who copied it at Prayag in 1739 Samvat (1681-A. D.)[1]

3. Bibliotheque Nationale-Paris.

Source of this Edition :

The manuscripts No. C. 2903 and A. 101 available at the Oriental Research Institute, Mysore, are the only sources of this edition.

Manuscripts no. C. 2903 is the original. It is a paper manuscript written in Sanskrit script, consists of 73 folios, each measuring 28 x 12.5cms contains twelve lines, each line having 40 letters.[2] Folios are brittle, moth eaten and difficult to read.

Manuseript No A. 101 is a replica of *mss.* No C. 2903, transcribed in Kannada script by the scholars of the same Institute. It consists of 200 pages of foolscap size paper, bound and well preserved.

As the treatise was found to be complete, it was decided to take up its publication.

---

1. Personal communication from the Curator, Anup Sanskrit Library, Bikanir.
2. Descriptive Catologue of Sanskrit manuscripts. Vol. XIII. Vaidyam. Oriental Research Institute. Mysore. 1986. Gn. Ed. H.P. Malledevaru. Director.

Editing :

On scrutiny of the manuscripts, it was noticed that the numbering of the chapters and their order of sequence were not correct. Misplacement of matter was also observed at some places. It was also noted that some errors have crept in during transcribing from Sanskrit to Kannada. All these have been suitably rectified, all such changes being indicated in the foot notes, words which are newly incorporated have been put inside parenthesis (   ). Blank spaces which could not be filled up have been indicated as................ A few grammatical and compositional errors which are not hindering the readability of the text and understanding of the subject, have been allowed to remain.

Author of the treatise :

In the concluding verses of the treatise, the author gives his name as Nṛsiṁha Kavi and that of his father as Bhaṭṭa Śiva. He says that his father was a great scholar in many branches of knowledge and considered as a jewel of Hārita Vaṁśa (gotra). In the colophon at the end of the book he states, "thus ends Vāgbhaṭamaṇḍana written by paṇḍita Bhaṭṭa-Narahari, son of Bhaṭṭa Śivadeva (Sudeva) and disciple of Rāmakavīśvara and a jewel among the scholars of Tarka and Tantra".[1]

At the commencement of the treatise he offers obeisances to Sri Nṛsiṁha, Sri Dakṣiṇakālika and Sri Gaṇeśa, and in the invocatory verses to Lord Śiva, the Dakṣiṇāmurti and to his preceptor Rāmakavīśvara, whom he describes as a "reputed scholar, author of

१. "इति तार्किक तान्त्रिकचक्र चूडामणि रामकवीश्वरशिष्य भट्टशिवदेवतनय पण्डित भट्टनरहरि विरचितं वाग्भटमण्डनम् समाप्तम्"

many books of great fame".[1] He also invokes the blessing of another scholar, Viṭṭhala Paṇḍita, whom he eulogises as "a navigator for the ocean of Caraka, in whom resides the popularity of Suśruta and who is a master on Aṣṭāṅga saṅgraha (of Vāgbhaṭa).[2] Elsewhere in the treatise he states that he is the author of 'Aṣṭāṅgahṛdaya dīpikā', a commentary on Aṣṭāṅga-hṛdaya of Vāgbhaṭa.

Apart from these he has not furnished any information about his place, vocation, date etc, in this treatise. Likewise he doesnot give any information about Saura Vidyadhara, hence arises the problem of determining these.

Except through this treatise neither Śiva Bhaṭṭa nor Rāmakavīśvara are known in the field of Āyurveda. Viṭṭhala paṇḍita is known as a commentator of Aṣṭāṅgahṛdaya[3] but his commentary has not been traced so far. The same is the case with the commentary of Bhaṭṭa Narahari also.

We come across two more persons of the name Narasiṁha / Narahari, as authors of Āyurveda treatises–

1. Narasiṁha—the commentator of Rasa vaiśeṣika Sūtra of Bhadanta Nāgārjuna and a disciple of Nagaviräacārya. Both Bhadanta Nāgārjuna and ·Nāgavīrycārya were Buddhist monks residing in Kerala. K. Shaṅkara Menon considers Narasiṁha also as a Buddhist and places him in the 8th cent A. D.[4]

---

1. Vagbhata mandana-prakarana 1. (pp 1.)
2. Vagbhata mandana-prakarana 1. (pp 2)
3. P. V. Sharma-Ayurveda-ka-Vaijnanik itihas. p-192.
4. K. Shankara Menon-Introduction to Rasavaisesika Sutra.

2. Narahari paṇḍita—the author of Nighaṇṭurāja (Rāja nighaṇṭu) also known as Abhidhāna Cūḍāmaṇi. He was the son of Iśvara Sūri, belonged to reputed family of physicians of Kashmir It is presumed that Narahari might have migrated to south India in later life and settled either in Maharastra or Karnataka, since he uses many synonyms popular in these regions. He may be assigned to 17th cent. A. D.[1]

We may conclude without any difficulty that Bhaṭṭa Narahari, the author of Vāgbhaṭamaṇḍana is a person different from the above two.

Date of the author :

The following points help in determining the date.

1. The latest authority whom Narahari quotes is Hemādri, the reputed prime minister of king Mahādeva (1260-71) and his son Rāmadeva (1271-1309), the Yadava rulers of Devagiri. Hemādri is the author of many books on Dharmaśāstra and of 'Āyurveda-Rasāyana' commentary on Aṣṭāṅgahṛdaya. Thus his date-13th-14th cent. A. D. forms the upper limit for the date of Bhaṭṭanarahari.

2. Narahari quotes a verse (partly) from a text which he names as "Abhidhāna".[2] Two important lexicons have this term in their name, viz Abhidhāna ciṁtāmaṇi of Hemacandra (1089-1173 A. D.) and Abhidhāna Cūḍāmaṇi popularly known as Rājanighaṇṭu (17th cent A. D.), The verse quoted above is found in Hemacandras lexicon and not in Rājanighaṇṭu.

---

1. Priyavrata Sharma. Ayurveda-ka-Vaijnanik itihas. p. 414.
2. Vāgbhata maṇḍanam-prakarana-7. pp-25.

3. Narahari does not refer either to Bhāvamiśra or to his treatise Bhāva prakāśa which was popular in the 16th cent A. D.

Based on the above points I am inclined to assign Bhaṭṭa Narahari to 15th cent A. D.

Saura Vidyādhara-the accuser :

He is the scholar who finds fault in Aṣṭāṅgahṛdaya and accuses Vāgbhaṭa, its author. Bhaṭṭa Narahari has not furnished any information about this scholar in this treatise, except his name. Except through this treatise, Saura Vidyādhara is not known in the field of Āyurveda. Even the source of the allegations-whether it is a separate treatise or whether a debate was held on the subject-is also not mentioned in this text. We may presume the latter as most likely. Narahari might have refuted the allegations during the debate and later wrote the treatise. Questioning the wisdom of Vāgbhaṭa, an authority and one of the Bṛhat traya-great triad of Āyurveda-is a daring act on the part of Vidyādhara reflecting his courage and scholarship, which deserve to be appreciated.

To summarise the informations :

Bhaṭṭa Narahari (Nṛsimha kavi) son of Bhaṭṭa Śivadeva, belonging to Hārīta gotra brāhmaṇa family devotee of Dakṣiṇa murti (Lord Siva) disciple of Rāmakaviśvara and Viṭṭhala paṇḍita, belonged to 15th cent A. D. He is the author of "Aṣṭāṅgahṛdaya dīpikā" commentary earlier and later of 'Vāgbhaṭa maṇḍana', intended to defend Vāgbhaṭa against the accusations of another scholar Saura Vidyādhara. Vāgbhaṭamaṇḍana is a scientific dissertation of great merit, the only one of its kind in Āyurveda literature.

Acknowledgement

I offer my thanks to Prof. H. P. Malledevaru. M. A. Ph. D., Director of Oriental Research Institute, Mysore, for granting permission, to copy the manuscript and publish it. I thank my sister Smt. K. R. Gayathri M. A., Lecturer in Sanskrit, Mahajanas college, Mysore who took the trouble of copying the text even in the midst of her busy tutorial work. I gratefully acknowledge the help in correcting the manuscript rendered by my erudite friend who doesnot wish to be named (that is his greatness and philosphy of life) and has made me indebted for ever. I convey my thanks to Prof. P. V. Sharma for his encouragement to my literary pursuits. I also thank Vidvan K. H. Puranik, Principal, Purnaprajna Sanskrit Vidyapitha, Bangalore, Sri H. V. Nagaraja Rao, M. A, Research scholar, Oriental Research Institute Mysore, and the Curator, Anup Sanskrit Library, Bikaner, for their valuable help. I am obliged to M/s. Chaukhambha Orientalia, Varanasi, the reputed Indological publishers for including this book in their Ayurveda series.

I content myself with the satisfaction of having been able to make an important addition to the literature of Ayurveda and appeal to the readers in these words —

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
ममैषाप्रणतिस्तस्मात् क्षन्तव्योऽयं बुधो जनैः ॥

"Nandana".
349, 16th Cross
Jayanagar, Mysore.

K. R. Srikantha Murthy

॥ श्रीः ॥

वाग्भट मण्डनम्

(प्रथमं प्रकरणम्)

ॐ नमः नृसिंहाय । श्रीदक्षिणकालिकायै नमः । श्रीगणेशाय नमः ।

आनन्दैकरसं विश्ववल्लीकन्दमुपास्महे ।
शिवंदेशिक कारुण्य सुधाऽविष्कृत विग्रहम् ॥ १ ॥

प्रत्याशं प्रतिवादिनिर्जयमहायज्ञैक यूपानिव
ग्रन्थान्यस्सुमनःप्रियान् ग्रथितवान् भूमण्डलीमण्डनान् ।
प्रापुश्चावनिपावनीयकतुलां ते यत्तुलापूरुषैः
भूयो **रामकवीश्वराय** गुरवे तस्मै नमः कुर्महे ॥ २ ॥

अष्टाङ्गहृदयाम्भोजे दोषासङ्गविनाशिनः ।
भानोर्विश्ववरेण्यस्य वरेण्यं धाम संश्रये ॥ ३ ॥

यं वर्णयन्ति चरकार्णवकर्णधारं
यत्राश्रितं जगति सुश्रुतसुश्रुतत्वम् ।
अष्टाङ्गसंग्रह निविष्टधियोऽस्य वाङ्मे
पाण्डित्यमावहतु, **विठ्ठलपण्डितस्य** ॥ ४ ॥

सुधामरुमरीचिकामरतरङ्गिणीभंगुरः
परिस्फुरतु, वादिनां बिरुदडिण्डिमाडम्बरः ।
यदद्य निरवद्यया जगति जृम्भते विद्यया
मदोद्भटभटावलीदलनदौहृदी **वाग्भटः** ॥ ५ ॥

प्रव्यक्तप्रकृति प्रपञ्चितरसं प्रख्यापितानुक्रमं
स्वाङ्गाविष्कृतसत्प्रयोगमपि चावस्थोचितांव्याहृतिम् ।
मन्येनाटकमेव वाग्भट गिरां तद्गुम्फनं सांप्रतं
वाचाटोयददो विदूषकपदं **विद्याधरो** गाहते ॥६॥

महिमानमथाकर्ण्य वाग्भटोऽयं मदोद्भटः ।
सौरविद्याधरोनाम धीरः प्रत्यवतिष्ठते ॥ ७ ॥

अयि भोः कोह्येष विवादसमर समुज्जम्भमाणशास्त्रकारः, अमरारिचूर्णन नरसिंहनखाङ्कुश प्रतिभा शास्त्रेषु (शालिषु) **दृढबल-प्रमुख** तन्त्रकार सुभटेषु जाग्रत्सु **वाग्भटो** नाम । स हि खलु त्रिभुवन-मलिनीकरणलम्पटः गाढान्धकार समुच्छाटनमान्त्रिकाणं तरुणतरणि किरणानामग्रे समग्रशक्तिरपि प्रद्योतते खद्योतः । तथा हि तन्त्रनिबन्ध-मौलिमाणिक्य भूतमभीष्ठदेवता नमस्कार श्लोकं प्रथमतः प्रष्टव्यो वाग्भट पाठकः यथा—"रागदिरोगान् सततानुषक्तानशेषकाय प्रसृतान-शेषान् । औत्सुक्यमोहारतिदाञ्जघान योऽपूर्व वैद्याय नमोऽस्तु तस्मै" (अ. हृ. सू. १।१) अस्यार्थः—यो रागादि दोषान् जघानतस्मै अपूर्व वैद्याय नमोस्त्विति । आदि शब्दात् द्वेषादयः । रागादीनां दुश्चि-कित्सितत्वदर्शनाय सततेत्यादीनि विशेषाणानि । तेन दुर्जयानपि व्याधीन् जघानेति नमस्क्रियमाणस्य देवस्याद्भुतशक्तिता निरूपिता भवति । स च देवः सुगत एव सुगतत्वात् । सौगतत्वं च भेषजप्रस्तावे सुगतमन्त्र लेखनात् स्पष्टमेव वाग्भटस्य । तद्यथा—"ॐ नमो भगवते भैषज्य गुरवे वेडूर्यप्रभराजाय । तथागतार्हते सम्यक् सम्बुद्धाय । ॐ भैषज्ये भैषज्ये महाभैषज्ये समुद्गते स्वाहा ॥ "(अ. हृ. सू. १८।१७–१८) । तेन सौगतेनसता वाग्भटेन सुगत एवात्र नमस्क्रियत इति तावत्स्थितम् । तच्चासंगतम् । विकल्पासहत्वात् । तथा हि— नमस्कार श्लोके सम्बन्धिनोऽभावात् । कस्यायं जघान रागादीनिति वाच्यम् । किमात्मन एव विश्वस्य वा । स्वभक्तानां सौगतानां वा । न तावदाद्यः, स्वगत रागदिहननात् पूर्वकाले स्वस्यैव रागादि रोगा-पातात् । किं च स्वस्मिन्प्राक्विद्यमाना रागादयो यौगबलोनानेन विजिता इत्युच्चमानेऽपि योगरहित निश्शेष संसाराशेषयोगि साधा-रण्येन नमस्क्रियमाणस्य सुगताख्यस्य देवताविशेषस्य न लाभः । तद्विशेष वाचक सुगतादिपदस्याभावात् । अथ यत् तच्छब्द सामान्य-निर्देशाद्यो योगनिहृत रागादि यो (रो) गः तस्मैयोगिने नमस्क्रियते-त्युच्यते तदा अपूर्व वैद्यायेतिपदं न घटते । तत्पदप्रतिपादने नमस्कार्यः सुगतो न लक्ष्यते । तेनापन्नोयं तुन्दिलमैथुनन्यायः । न द्वितीयः, सर्व-प्राणिषु रागादीनां प्रत्यक्षोपलम्भात् । नापि तृतीयः, स्वभक्तानामेव सौगतानां रागादीन् जघानेत्युक्तेऽपि अपादापद्यते नापरेषामिति । ततः स्वयमेव दूषितोऽपि । विवादात्मनि सुगते सः रागदिरोगयोग (?) इत्यापद्यते । ततश्च देवतास्वरूपमपह्नुवानेनारोपितं स्वदर्शनस्यास-

द्दर्शन चूडामणित्वम्। तस्मादसम्बद्ध एव रागादित्यादि वाग्भट श्लोक: इति **विद्याधरदूषण** प्रपञ्चतात्पर्यम्।

(न) तदेतदसुन्दरम्, प्रक्षत्रयेऽपि दोषाभावात्। तथा हि—प्रथम-पक्ष स्वीकारे तावत् न कश्चिल्लक्ष्यते दोषः। न त्वनन्तरमेवाभिहितः यत्सुगतस्य स्वगतानां रागादिरोगाणां प्रतीकारे तत्प्रतीकारात् पूर्व रागादिरोग योगित्वप्रसङ्ग इति, तदसत्। चिकित्सा हि नाम रोग-निर्हरणम्। तच्च स्वस्थ रोगद्वैविद्यात् द्विधा, तत्र स्वस्थे रोगाऽनु-त्पादनापरपर्यायं रोगाप्रादुर्भावपरिपालनम्। न तु रोगोपध्वंसः प्रसक्तेरभावात्। अत एव स्वस्थवृत्तानुपक्रमणीयादि प्रकरणभेदः प्राचामाचार्याणां। तथा च स्वस्थवृत्ताध्याये सुश्रुतः—"समदोषः समा-ग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रिय मनाः स्वस्थ इत्यभिधी-यते॥ (सु. सू. १५।४१) इति स्वस्थलक्षणमभिधायोक्तवान्। तस्य यद्रक्षणं कर्म तच्चिकित्सा प्रयोजनम्। "कृतावृतौ य एतेन विधिना वर्तते नरः। घोराननुकृतान् रोगान्नाप्नोति स कदाचन॥ (सु. उ. ६४।५५)। **चरकमुनिरपि** प्रोक्तवान"तच्च नित्यं प्रयुञ्जीत स्वा-स्थ्यंयेनानुवर्तते। अजातानां विकाराणामनुत्पत्तिकरं च यत्॥ (च, सू. ५।१२) अत्रापि किमतो यद्येवम्। एतदुक्तं भवति— यदीश्वरः स्वस्थे स्वस्थरुपे सर्वदैव रागादिरोगान् उत्पत्तिप्रतिबन्धेन जातान् जघान, अतः अस्मात्पूर्वकाले तस्य तद्योगित्व प्रसङ्गः। श्रुति-रपि त्रैकालिकं परमेश्वरे रागादिरोगाभावं दर्शयति—"असङ्गो ह्ययं पुरुषः" (बृहदारण्यकोपनिषत् ६-३-१५) असङ्गो न सज्जत इति। स्मृतिरपि—"क्लेशकर्मविपाकाद्यैः न स्पृष्टो यो विशेषतः। ईश्वरस्सतु विज्ञेयो व्रह्मातत् कीर्तितं विदुः॥" क्लेशकर्मविपाकद्यैर-परामृष्टः पुरुषविशेषः ईश्वरः इति। न च मुक्तत्वाविशेषाद्योगिमात्र साधारण्यमीश्वरस्येति वक्तुं युक्तम्। ईश्वरस्य रागादिहन्तृत्वं स्वात-न्त्र्येणकतृत्वात्, न इतरेषाम् इतरेषां तु स एव मुक्तिप्रदः। "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।" (भगवद्गीता. ७।१४), "तमैवेकं ये तु पश्यन्ति धीरास्तेषां शान्तिश्च शाश्वती (कठोपनिषत् २।५।१३) इत्यागमात्। तस्माददुष्ट एव आदिमः पक्षः।

अथ (तथा) विश्वगतानीश्वरो रागादिरोगान् जघानेति द्वितीयो-ऽपि पक्षो निरवद्यः। नन्वधुना सर्व प्राणिषु तेषां प्रत्यक्षोपलक्ष्यमान-त्वमेवास्तीति चेत् न। दिवादलित निश्शेषतमसो भगवतो भास्करस्य

तमस्विन्यां तमसः प्रतीयमानत्वं यथा न तिमिर (नाशक) त्वमपहरति। तथैवात्र न दूषणत्रासः स्वसाक्षात्काररूपस्योदयमात्रेण तथात्वात्। यद्वानेकतिर्यगादि योनि क्लेश क्लिष्टानां प्राणिनां अनुकम्पया प्रलयं चकार तत्र तथात्वमुक्तं दुःखाभावात्। "संसार खेदखिन्नानां प्राणिनामनुकम्पया। लयं चकार विश्वात्मा तेषां दुःख निवृत्तये" इति स्मृतिः। यद्वा यस्यैव जघान तस्य दुःखाभाव इति। सर्वस्य रागादिरोगान्, जघानेति सर्वस्य समुक्तिवादस्य प्रामाणिकत्वात्। दुःखसन्ततिरत्यन्तमुछिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यनुमानात्। अविद्यस्तमयो वा···तमो व्यक्तिभेदात्। तत्र तथाभवत्विति चेत् न, प्रस्तुतेऽपि तद्वस्तुबाधकाभावात्। अथवा यावतो विश्वस्य रागादयोहताः तावन्मुक्तमेव। विश्वस्य सर्वजगदादि शब्दानां लौकिकैः परीक्षकैरपि तदेकदेशे प्रयुज्यमानत्वात्। यथा विश्वविजया राजा सर्व विजया वा सर्वा ·········आनीयतामिति वा इति लौकिक प्रयोगः। "औदुम्बरी सर्वाविष्टितव्येत्यत्र परीक्षकसार्वभौमैः भट्टपादैरप्यधायि। तदेतत् "यदि द्वित्राङ्गुलीर्मध्ये विमुच्योत्तर भागतः। वेष्टयेतौदुम्बुरी तत्र किं नाम न कृतं भवेत्॥" (तन्त्रवार्तिकं १।३) इति विश्वकर्तृत्वमपि चेश्वरस्यैकदेशकर्तृत्वेनैव। नित्यद्रव्यगुणजाति समवायानां अकार्यत्वात्। जनपदोध्वंसादि शब्दाः अपि तथा वैद्यकसिद्धान्तेप्येकदेशे प्रयुज्यन्ते। यथा "दोषाश्च धातवस्सर्वे वृद्धिक्षय समुद्भवैः। विकारैरन्तरैर्बाह्यैं घ्नन्ति सर्वं कलेबरम्॥" (?) इति। अत्र सर्व शब्दः एकदेशे धात्वपि। अस्ति चागमे ईश्वरस्य विश्वरागादि हन्तृत्वे··· ··· ···। "सर्वस्य चाहं हृदि सन्निविष्टोमत्तः स्मृतिज्ञान मपोहनं च।" (भगवद्गीता १५।१५), "विश्वस्यमाथा मयमेव हन्मि मय्येव सर्व प्रविलीयते च।" विश्वप्रकाशक ज्ञानयोगान्मोहं तमिस्रं सूर्य इव नाशयति। सर्वज्ञोऽसौ जगज्जाड्य नाशको मधुसूदनः। सन्ति च ब्रह्मलोकादिगतानां मुक्तत्वप्रतिपादकानि श्रुतिस्मृति वाक्यानि। यथा—"ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" (मुण्डकोपनिषत ३।२) इति श्रुतिः। सर्वमुक्ति वादिनांमतमङ्गीकृतोऽपि सर्वमुक्तिवादः आचर्यवर्यैः। "ब्रह्मणासहते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते परात्मानः प्रविशन्ति परमंपदम्॥" (कूर्मपुराण. पू. १२।२६९), आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।" मामुपेत्यतु कौन्तेय पुनर्जन्मन

विद्यते ॥ (भगवद्गीता ७।१६) ··········प्रविष्टालवणार्णवे । (?) इति च । आङ् मर्यादायाम् आङ् अङ्गी कारे । ब्रह्मलोकगतानां मुक्तिप्रतिपादकबहुवाक्य विरोधात् । स्मर्यते चान्येऽपि लोके बहवो वामदेववसिष्ठयाज्ञवल्क्य प्रभृतयो मुक्तिभाजो मुनयः । स च प्रत्यक्षागमयोविरोधोऽपि विषय भेदात् प्रत्यक्षं हि विश्वगतान् रागादीननुगोचरयति । आगमश्च रागदिरोग हन्तृत्वम् न च परमेश्वरनिष्ठं रागाद्यपहन्तृत्वं प्रत्यक्षेण गृहीतुं शक्यते । परमेश्वरस्याप्रत्यक्षत्वेन तद्धर्मस्याप्रत्यक्षत्वादिति । अथ यदि विश्वगतान् रागादीन् हरेत्परमेश्वरः कथं ते जगति दृश्येरन्निति । तदा ईश्वरं पक्षीकृत्य विश्वगतरागादि हन्तृत्वभाव स्साध्यः । तथा च प्रयोगः 'विश्वस्मिन् रागादिप्रत्यक्षोपलभ्यमानत्वं हेतुर्वक्तव्यः। स च व्यधिकरण सिद्धतया न साधनम् । अन्यपक्षत्वे अन्यसम्बन्धि हेतुत्वे च भिन्नाधिकरण हेतुत्वात् । यथा नित्यश्शब्दः पटस्य कृतकत्वात् आगमविरोधे च कालात्ययोपदिष्टत्वात् अनुमानस्याऽप्रमाण्यम् । न च विश्वगत रागादीनां प्रत्यक्षोपलम्भः संभाव्यते । विश्वं मनसाप्रत्यक्षत्वात् तद्धर्माणां रागादीनामप्रत्यक्षत्वात् । मनोधर्मत्वे च रागादोनां पातञ्जल सूत्रं प्रयाणम्—'रजस्तमोभ्यां मनसो रञ्जनं . राग ईरितः ।' (?) इति । 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः । तस्मान्मोक्षाय कर्तव्यं विरागममलं मनः ॥ (पञ्चदशी १३) इत्यादिषु अयं (भावः) । प्रतिमहाकल्पं जगदानन्त्ये यावन्नकिंचिदीश्वर वादिनां विवादः । आगमसिद्धे विश्वमोहकत्वे चेश्वरस्य तत्रःस्मिन् कल्पे यद्यप्यस्मिन् जगति············रागादयः प्रत्यक्षेण गृह्यन्ते यद्यपीश्वरस्य कल्पान्तरे जगदन्ते रागादिहरत्वेन आगमप्रत्यक्षयोरविरोधसम्भवेन (अ) बाध्यो न्याय्यः । तदुक्तं **भट्टपादैः**— 'अविरोधात्समावेशे लभ्यमाने प्रमाणयोः । बाधो न पुज्यते कर्तुं समत्वाच्च तयोर्यतः ॥ (तन्त्रवार्तिकम्) इति । न चैवमुक्तौ केनापि न यतितव्यम् । विश्वमुक्तिदान प्रतिभुवः परमेश्वरस्य विद्यमानत्वादिति वाच्यम् । आगममेतद्विश्वमुक्तिदायकत्व प्रतिपादनात् संप्रति अनुरूप भूयमान भवदुःख निवृत्तये यतितव्यमेव । यस्य कस्यापि विश्वस्य यस्मिन् कस्मिश्चिद् कल्पे सर्वमुक्तौ सत्यमिति मुक्तिदायकत्वेनेश्वरस्व विश्वमुक्तिदायकत्वसिद्धेरागमस्य चरितार्थत्वादिति एकस्य जगतो मुक्तत्वेऽपि जगदन्तर सृष्टिविरोधः इति ।

किं वा अथेश्वरः स्वभक्तगतानेव रागादीन् जघानेत्यस्तु त्रितीयोऽपि

पक्षो न दुष्टः । न च बैषम्यनैर्घृण्याभ्यामीश्वरस्यैवरागादिमत्वापातः तत्तत्कर्मापेक्षया तदुपपत्तेः । यद्वा तत्सेवार्जित धर्मेण रागादिनाशो तस्योदासीनत्वात् । तथा च नैयायिकं (वैयासिकं) सूत्रं—'वैषम्यनैघृण्यै न सापेक्ष त्वात्' (ब्रह्मसूत्रं २।१।३४) स्मृतिरपि ईदृग्रागादिहन्तृत्वे परमेश्वरस्य······तत् नश्यति । 'न मे भक्तः प्रणश्यति' (भगवद्गीता ९।३१) 'तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात् पार्थ मय्यावेशित चेतसां (भगवद्गीता १२।७) इत्यादिभिरागमभूलतया पक्षद्वय स्वीकारेऽपि न काचित् क्षतिः ।

सांप्रदायिक व्याख्यानेतु, विकल्पोत्थानघटना न घटते । तथा च **वाग्भट टीकायां आयुर्वेद रसायने बोपदेवपण्डि**तैर्व्याख्यायि—'रागादीन्रोगन् जघानमोक्षशास्त्र प्रणयनेन हनने विविधोपायं दर्शितवान् न पुनः साक्षाद्धतवान्' (आयुर्वेदरसायनव्याख्या[1]—अ. हृ. सू १।१)[2] । कुतः । अधुनातद्दर्शनानुपपत्तेरितरे यस्य मोक्षशस्त्रोपायाभ्यासः, तस्य तेष्वामूलतो नश्यन्ति नान्यस्येति । ईश्वरस्येति नाशकत्वं कल्प्यते । आसाध्यव्याधि विध्वंसनेनेतर········ वैलक्षण्यं ईश्वरस्य द्योतयितु रागादीनामसाधारण्यं वर्णयता सततेति अनवरतमात्मना संबद्धान् । ननु यथा ज्वरादयोप्येवम् तत्राऽपि अशेषेति सकलशरीर व्याप्तान् । ननु सर्वमपि कार्यं स्वकारणे सदावसतीति सत्कार्यवादिनांमतम् । तेन सर्वशरीर व्यापि स्वकारणदोषगतितया सर्वेऽपि रोगाः इत्थं स्फुरन्तीत्यथ आह अशेषेति । स्वकारणमूलप्रकृतिसहितानीत्यर्थः । रागादीनामसाध्यत्वे हेत्वन्तरमाह औत्सुक्येति । औत्सुक्यमविचार्यप्रवृत्तिः, मोहोविचाराशक्तिः, अरतिरसंतोषः । तथा च असाध्यव्याधिप्रकरणे स्वयमेव वक्षति—'औत्सुक्यमोहारतिकृद्' (अ. हृ. सू. १।३३) इति ।

यदि वा भवन्तुसततानुषङ्गित्वादि स्वरूपो रागादयः । रोगत्वं तु दुःखदायकन्त्वमन्तरेण न घटते । अत आह औत्सुक्येति । तेत असाध्यव्याधि विध्वंसनेनाद्भुत शक्तितया योऽपूर्व वैद्यः तस्मै नमस्क्रियेति । **अरूणदत्ताचार्यः** पुनः 'न विद्यते पूर्वो यस्मात् असौअपूर्व इत्यनादित्वं अपूर्वपदनोच्यते' इति व्याचष्टे (सर्वाङ्गसुन्दरी व्याख्या—अ. हृ. सू. १।१) । तेन एवं विध विशेषण विशिष्टो नेश्वरमन्तरणापरे वैद्ये विद्यते इति अनेन श्लोकेन जगदीश्वर एव नमस्क्रियते इत्यनवद्यमेवाद्यं पद्यम् ।

1. FN : ref mss 2. FN : ref mss

अथ वाग्भटस्य सुगतमन्त्र लेखनेन सौगतत्वेसिद्धे तत्प्रणीत शास्त्रादिपद्ये सुगत एव नमस्कार्यो भवितुमर्हतीति चेत्, तन्न, अथर्ववेदोपवेदायुर्वेदप्रवृत्त परमवैदिकात्रेयादि महर्षितन्त्रसंग्रहमात्र प्रवृत्तस्य कथं परम कुशलस्य **वाग्भटस्य** अन्यमतानुसारिशास्त्र प्रणयनमेतत् घटते। किं च यद्येवं नाभिप्रैष्यदाचार्यः। कथं प्रतिप्रकरणे स्वशास्त्रस्य 'इति ह स्माहुरात्रेयादयो महर्षयः इत्युक्तम्। वैदिकमूलत्वात्। अन्यथा स्वकपोलकल्पितत्वादप्रामाण्यं स्वशास्त्रस्य कारणमिति। तस्मात् प्रतिप्रकरणार्थं एतदुक्तमनेनैव। **संग्रहे** स्वयमेव 'न मात्रामात्रमप्यत्र किंचिदागम वर्जितम्। तेऽर्थास्सग्रन्थबन्धश्च संक्षेपेण क्रमोऽन्यथा॥ (अ. सं. सू. १।२०) इति। 'आयुर्वेदोपदेशेषुविधेयः परमादरः। (अ. हृ. सू. १।३) इत्यत्रै वोक्तवानाचार्यः। तस्माद्विरुद्धक्रियत्वादसङ्गतमिति संतोष्टव्यं भवता। अत्रार्थेरित्थं विचार्यते यत्............भिलाषुकाः सौगताचार्याणां चरणपरिचरणं चिरं आचरन्नखिलदूषकतया कुशिष्य लक्षण लक्षणीयः। तैरेव विचक्षणैः कुतः किमत्यर्हत् पदमात्रं तथा समुपदिश्य विप्रलब्धो लौल्यविडम्बितकाकः **सौरविद्याधरो** वराकः। यदयं सौगतागमपण्डितंमन्यः असौगतमपि मन्त्रं सौगत मन्त्रोपदिष्टपदसादृश्यलेशगन्धाघ्राण सौगततया प्रत्यभिजानीते। सौगतत्वं न ह्यत्रमन्त्रे किंचिदनेकान्ततया सौगतत्व व्यञ्जकमस्ति। तथा हि भगवान् षड्गुणैश्वर्यसंपन्नो भेषज्यगुरुर्धन्वन्तरिरेव। तथा व्याख्यातं धन्वन्तरि पदं, धनुर्धर्मः, तस्यान्तो देहव्याघातकतया रोगः, तस्यान्तस्य अरिः भेषज्यप्रण यनात् धन्वन्तरिरिति शाकन्ध्वादिपाठान्यरूपते। (निरूच्यते) यस्य तं एनं लोकं सम्य.........यथा परमकारुणिकः काशिराज व्याजेन लोचनगोचरतया लोकस्य सुखाराराधनीयो भवति। तच्च भगवान् धन्वन्तरिरेव स्पष्टमाचष्टे—'अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणाम्। शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूयइहोपदेष्टुम्'॥ (सु. सू. १।२२) इति। यच्च **सुश्रुतादिभिर्मुनिभिः** आदि देवतया सम्यक्संबुद्धो ज्ञातः। अर्हन् पूजनायः, न अर्हन्निति पदं सुगतस्यैव संबोधनतया विद्वद्भिः प्रयुज्यते। तथा च दृष्टं ब्राह्मणेषु। कौत्सप्रति विहित विश्वजित् यागस्य रघोरुक्तौ **महाकवि कालिदास** प्रयोगः—'द्वित्राण्यहान्यर्हसि सोढुमर्हन्' (रघुवंश ५।२५) इति, तथा दिलीपाश्रमे दिलीपं प्रति 'अर्हणामर्हते चक्रुः' (रघुवंश १।२५५) इत्यादि। तथा च श्रुतिरपि—'अर्हन् बिभर्षि सायके'

(ऋग्वेद २।३३।७०) इत्यादि गोपनीयतमोमन्त्राः सौरविद्याधर भ्रान्तिनिवारणाय कियानपि प्रकाशितः तत् सुधीभिः क्षन्तव्यम् । तथा च विहितविविधबुध शास्त्राम्बुधर मनःप्रसादपीठबन्धभूतादि पद्यखननोद्यतः प्रामाणिकयुक्ति दण्डेन त्रासात् सार्वत्रिकं स्वैराचार-मलभमानः क्वापि निलीयनिवसतु सौरविद्याधर दूषिकमूषकः । भवति चात्र—

पदं वैदूषकं बिभ्रददभ्रग्राम्य पण्डितः ।
स्पर्धतां सूत्रकारेण सौरविद्याधरः स्वयम् ॥
गूढोक्ति रसिक प्रौढो रमते न तवोक्तिषु ।
रम्भारति ········· घट चेटिषुचेष्टिते ॥
ततश्च खण्डनोक्तीनां खण्डसाम्योपवर्णने ।
विद्याधरत्वया पद्यमनवद्यं निगद्यते ॥

वाग्भटा खर्व गर्वोक्ति पित्तं शान्तं न यान्ति याः । (यातियत्)
कथ्यन्ते सांप्रतं खण्डतुलया खण्डनयुक्तयः ॥
अबलाबालगोपालैराभिः खण्डनयुक्तिभिः ।
खेलनं क्रियते नित्यं वाग्भटे दोषमेलनम् ॥ इति

उपक्रमः पुनरपि क्रियते । न त्वदुक्तौ भवदुक्तीनां बालगोपल-योग्यत्व प्रसिद्धं इति न प्रेक्षावतां तदधिक्षेपणेऽत्यादरः इत्यलं विस्तरेण ।

चरकचरितामुद्रामुद्रितत्वादमुद्रं
प्रथयति पृथुलोके यो यशश्चन्द्र गौरं ।
पुनरपि कृतमौलिर्नास्पदं वाग्भटस्य
स्मृतिरिव निगमश्री भूषणं दूषणानाम् ॥

अथ वेदानुसारिण्यां स्मृताविव चरकानुसारिण्यां वाग्भटकृतौ तदनुसारित्वं भूषणमेव, न दूषणं इत्याकर्ण्याऽसहमानः पुनरपि सौर-विद्याधरो दूषणदानाय संनह्यति । तथा हि—स्वकपोलकल्पित दोषं परिजिहीर्षता भिषङ्मानिना वाग्भटेन स्व शास्त्रारम्भे 'इति ह स्माहुरात्रेयादयो महर्षयः' इति प्रतिजज्ञे । न चैतत्संवादि, तथा हि तैरुपदिश्ते 'सोऽयमायुर्वेदः शाश्वतोनिर्दिश्यते' (च. सू. ३०।२७) न ह्यायुर्वेदस्य भूतोत्पत्ति (पूर्वोत्पत्ति) रुपलभ्यते अन्यत्रावबोधोप

देशाभ्याम्। तस्याष्टावङ्गानि तद्यथा—कायचिकित्सा, शालाक्य-मूर्ध्वाङ्गचिकित्सा, शल्यम्, विषगरवैरोधिक प्रशमनम्, भूतविद्या, कौमारभृत्यम् रसायनम् वाजीकरणमिति। एष चार्थो वाग्भटेनापि वचनचातुर्याद्दर्शितः यथा च—'कायबालग्रहोर्ध्वाङ्ग शल्यदंष्ट्रा जरावृषान्। अष्टावङ्गानि तस्याहुः चिकित्सायेषु संश्रिता ॥ (अ. हृ. सू. १।५) अस्यार्थः तस्यायुर्वेदस्याष्टावङ्गानि कायादीनि वृषान्तानि महर्षयो ब्रुवन्ति। येषुचिकित्सा व्याधिप्रतीकारास्संश्रिताः। तत्र काय शब्देनैकदेश वाचिना सत्यासत्यभामेति वत्······काय-चिकित्सा समुदाय एवोच्यताम्। बाल शब्देन तु कुमारवाचिना न कौमारभृत्यं लभ्यते। ग्रहसामान्यवाचिना ग्रहशब्देन न भूतविद्या। देहोपरितनभाग वाचिना ऊर्ध्वाङ्ग शब्देन न शालाक्यम्। दंष्ट्र-शब्देन कथमपि शब्दव्युत्पत्या न विष गरवैरोधिक प्रशमनरूपं लभ्यते अगदतन्त्रम्। जरा शब्देन न रसायनतन्त्रम्। वृषशब्देन न वाजीकरणतन्त्रं लभ्यत इति। नापि कायादि पदानां चिकित्सा शब्द सम्बन्धानां तत्तदर्थ बोधकत्वम्। तथा हि ऊर्ध्वाङ्ग चिकित्सा इत्युक्ते किमङ्गापेक्षमूर्ध्वाङ्गं स्यात्, समाङ्गवाचक पदाभावात् हृन्नाभ्यपेक्षत्वे प्लीहादि चिकित्सा प्रसङ्गः। न च शालाक्यं ऊर्ध्वजत्रुगतानां श्रवण-नयनवदनादि संश्रितानां रोगाणां प्रशमनार्थमिति सुश्रुतोक्तेः, जत्रु-स्कन्ध सन्धिरूर्ध्वाङ्गविधिरिति युक्तं वक्तुम्। तेनैवार्थसिद्धे वाग्भ-टानर्थक्यात्। तथा दंष्ट्रा शब्देन दंष्ट्रस्थं विषं गृह्यते इत्युक्ते गर-रसस्पर्शादि विषाणि न लभ्यन्ते असम्बन्धात्। तस्मात्सञ्जाता-न्यूनतमतन्त्रदोष स्वाराज्य व्याप्तिः। तथा जराचिकित्सा इत्युक्ते नीलीतैलादिषु रसायनत्व प्रसङ्गः रसायनकल्पे अनुक्तत्वादिति। वृषचिकित्सेत्युक्ते न च वाजीकरण तन्त्र लाभः तेन वृषचिकित्सा-शब्देन वाजीकरण तन्त्रंबोधयता अरुणदत्तादीनामप्यबोधो दुर्निवारः व्याख्यान्तर स्याविद्यमानत्वात्। तथा हि, अकार प्रश्लेषेण न विद्यते जरा यस्यां सा अजरा चिकित्सा। तथा अवृषो सवृषो ·········· तस्यचिकित्सा तथा च सति गमनिकामात्रमेवैतत्स्यात्। न तु चरका-दिप्रणीतार्थावाप्तिः। यतोऽस्माभिः स्वबुद्ध्योद्भासितम्। न तु सूत्रकारस्यायमभिप्रायः। तस्मादवाचक शब्दाभिधेयत्वेन अधिकरण कवलितत्वादुन्मत्त प्रलपितमेतदिति।

अत्र ब्रूमः—किमनेनात्रेयादिभाषितसंवादितया वाग्भट कृतेः

स्वकपोलकल्पितत्वमात्रेणादेयत्वमुच्यते। अथाङ्गवाचकपद प्रयोगात् न्यूनतमाधिकरणदोषाख्यतन्त्र बहुदुष्टत्वम्। न तावदाद्यं— 'इति ह स्माहु रित्युक्त्वा यदुक्तमाचार्येण 'आयुष्कामयपानेन धर्मार्थ-सुख साधनम्। आयुर्वेदोपदेशेषु विधेयः परमादरः।' (अ. हृ. सू. १।२) इत्यादि। अस्यार्थ,—चतुर्वर्गफलमायुरभिलषता आयुर्वेदो-पदेशेषु परमादरो विधेयः कर्तव्यः। तत्प्रतिघात प्रशमनोपायं आयु-र्वेदं पाठावबोधाभ्यां अभ्यसेदिति। धर्मः अर्थः सुखं कामो मोक्ष-श्चेति न चात्रेयादि विप्रतिपत्ति लेशोऽपि। तथा दीर्घं जीवितीये **भगवान् आत्रेयः** प्रोक्तवान्—'तपस्यन्तं महात्मानमात्रेयं कर्मको-विदम्। ऋषयो व्याधिशोकार्ताः प्रणेमुस्ते हिमालये। स्तुत्वा स्तुति-भिरर्घ्याभि प्रहृष्टा वाक्यमूचिरे॥ धर्मार्थ काममोक्षाणामारोग्यं मूलमूत्तमम्। रोगस्त स्यापहर्तारः श्रेयसो जीवितस्य च॥ प्रादुर्भूतो मनुष्याणामन्तरायो महानयम्। तस्मात्तेषां शमोपायं ब्रूहि त्वं ध्यान-मास्थितः॥ तेनोक्तमिन्द्रमाराध्व स्वकार्यं वो भविष्यति। स वक्षति शमोमाथं यथावदमरप्रभुः। अथ ते शरणं शक्रं ददृशुर्ज्ञान चक्षुषा' इत्युपक्रम्य 'सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः। यथावदचि-रात्सर्वं बुबुधे तन्माहामुनिः॥ आयुर्वेदं तथात्रेयो भरद्वाजमजिग्रहत्। सचायुरमितं लेभे भरद्वाजस्सुखावहम्॥ ऋषयस्तु भरद्वाजाज्जागृहु-स्तं प्रजापतिम् (प्रजाहितम्)। दीर्घमायुश्चिकीर्षन्तो वेदं वर्धनमा-युषः॥ त्रैलोके कृपयासर्वं आयुर्वेदः प्रकाशितः (मया प्रकाश्यते सोऽयं सुश्रुतत्वं विबोधय॥'[1] इति। **सुश्रुताचार्योऽपि**— 'आयुरस्मिन् विद्यते, अनेन वाऽऽयुर्विन्दति इत्यायुर्वेदः' (सु. सू. १।१५)। तेन नात्रेयादिभाषितं विसंवादः। नाप्यवाचकप्रयोजित तन्त्रदोषपातः आर्षोक्ति समानत्वात्। यथा हि—कायोवह्निश्शरीरं वा इत्यौ-णादिकः प्रत्ययः तत्र (स्य) चिकित्सा रोगच्छेदः कायचिकित्सेति शब्दार्थः। बालः कुमारः, तस्य चिकित्सा, सा च बालग्रहधात्री स्तन्यदुष्ट्यादीनि वृत्या कुमारभृतिरूपैवेति कौमार भृत्यं बाल-चिकित्सा शब्देन लभ्यत एव। ग्रहचिकित्सा शब्देन भूतविद्या लभ्यते, भूतविद्याशब्देन भूतचिकित्सा आचार्याणामभि प्रेता। अन्यथा आयुर्वेदाङ्गत्वस्यैवानुपपत्तिद्वाराभावात्। तत्र भूतविद्या भूतज्ञानम् नान्यप्यज्ञानमात्रस्यानुपयोगादतो नैतत् किंतर्हि प्रशमोपाय एव

1. There is some variation between these verses and those found in the extant Caraka samhita.

ग्राह्यः ? आयुषः प्रतिपालकत्वादायुर्वेदस्येति। गृह्णति ग्रहाः इत्युक्तरीत्या ग्रहशब्दस्य भूतपरत्व व्युत्पादनस्य सुकरत्वात्। ऊर्ध्वाङ्ग शब्दो जत्रुस्कन्ध वाच्यो देहोपरितन भागे सम्यक् सुश्रुतादिशास्त्र प्रसिद्धैर्वाग्भटेनापि स्व शास्त्रे तत्र प्रयुज्यमानत्वात् यथा—'जत्रूर्ध्वकफवातोत्थ विकाराणामजन्मने।' (अ. हृ. सू. २।१), 'ऊर्ध्वजत्रुविकारेषु स्वप्नकाले प्रशस्यते।' (अ. हृ. सू. १३।४२); 'शिरोन्तराधीर्द्वौबाहूसक्थीनीचेति अङ्गषट्कस्यमध्ये यथान्यङ्गापेक्षया उत्तमाङ्गत्वं शिरसः तथैवोर्ध्वाङ्गमिति। अत एवाचार्यो नस्य विधौ 'ऊर्ध्वजत्रु विकारेषु विशेषान्नस्यमिष्यते।' (अ. हृ. सू. २०।१) इत्युक्तवान्। तद्भेषजगुणकथने तु ऊर्ध्वं जत्रुं शोधयन्ति इति वक्तव्ये 'त्रुट्यौपृथ्वीका शोधयन्त्युत्तमाङ्गम्' (अ. हृ. सू. १५।४) इति प्रयुक्तवान्। तत्रोर्ध्वजत्रुत्वं शिरसो यदङ्गापेक्षया, तत् स्कन्धादूर्ध्वावेति कथं ऊर्ध्वाङ्ग शब्देन न तल्लाभाः। तथा च शालाक्य शब्दस्य **गयदास** प्रभृतीनां टीकाकाराणां व्याख्या--'शिरो रोग प्रतिपादकं तन्त्रं शालाक्यमिति। शल्यचिकित्सापदेन शल्यहन्तृक प्रतिपादनं सुकरमेव। तथा दंष्ट्रा चिकित्सा इत्युच्यमाने यद्यपि मुख्यतथा वृत्त्या विषतन्त्रालाभः तथापि गौण्यावृत्या विषतन्त्रं लभ्यत एव। तथा हि दंष्ट्रत्वं लक्षितादर्थात् गम्यते, विषं दंष्ट्रा शब्देन विषगरवैरोधिक प्रशमनं, विषस्थावर जङ्गमम् गरंकृत्रिमम् वैरोधिकं स्पर्शादिविषमिति ग्राह्यम् इति' कथं न तल्लाभः। तस्य चिकित्सेति लक्षणया लक्षितलक्षणया च जङ्गमस्थावरकृत्रिमं गृह्यते आयुर्वेदाङ्गत्व दंष्ट्राचिकित्सायां सर्वस्योक्तत्वात्। तेनसादृश्याद्विषरोगहेतुमात्र जनक सकल विषप्रतीतिर्भवति। तेन दंष्ट्रत्वं लक्ष्यमाणं दंष्ट्रागम्यमान विषद्वय जननगुणयोगात् गरस्पर्शादीनि गृह्यन्ते। इयं गौणीवृत्तिः दंष्ट्रा शब्दस्य। यदुक्तं **भट्टपादैः**—'लक्षमाण गुणैर्योगाद्वृतेरिष्टातु गौणतः इति (तन्त्रवार्तिकम्) योगसादृश्ये इदमपि स्पष्टीकृतं आचार्यपादैरेव—वह्नित्वं लक्षितादर्थात् यद् पैङ्गल्यादिगम्यते तेन माणवके बुद्धिसादृश्यादुपजायते इति। जराचिकित्सा हि रसायनमेव। जराव्याधिहरस्यैव भेपजस्य रसायनत्वात्। यथा चोक्तं—'यज्जरा व्याधिविध्वंसिभेषजं तद्रसायनम् (चक्रदत्त-रसायनाधिकार) इति। स च नीलीतैलादिषुः (?) अतिप्रसङ्गः। लक्षणानुमतस्यास्पष्टत्वात्। यद्यपि रसायनकल्पे विशेषेण नोक्तं तथापि सामान्योक्तौ तज्जातीयत्वेन उक्तत्वात् लक्ष-

णाक्रान्तत्वाच्च भवति तत् रसायनमिति। वृषः शुक्रः तदर्थं चिकित्सा, सा च वाजीकरण रूपैव। यथोक्तं—'येन नारीषु सामर्थ्यं वाजीवल्लभते नरः। व्रजेच्चाभ्यधिकं येन वाजीकरणमेव तत्' (च. चि. २ पा ४।५१) तच्च शुक्रलमन्तरेण न सिध्यतीति वृष शब्देन वाजीकरणतन्त्रं लभ्यते। नापि कौमार भृत्यादिपदैरेव वाग्भटेनापि व्यवहर्तव्यमिति वाच्यम्। चिकित्सापर्यवसायित्वेनैव आचार्याणामङ्गत्वम्याभिमतत्वादन्यथा वा भावादङ्ग त्वस्यैव अनिर्विष्टु (अनिर्दैष्टु) मिति। तदुक्तम नेन—'तेऽर्था स्सग्रन्थ बन्धश्च संक्षेपाय क्रमोऽन्यथा। (अ. सं. सू. १।२०) इति। अन्यथाक्रमः संक्षेपाय नत्वर्य विपर्यासः, तथा हि भवत्येषां चिकित्साप्रतिपादकायुर्वेदपरार्थ्यादङ्गत्वमायुर्वेदस्य। लिङ्गत्वमस्तु वा तदङ्गत्वमेषां सामर्थ्याल्लैङ्गिकमायुर्वेदाङ्गत्वे प्रसिद्ध्या सामाख्यनिबन्धनं वा तन्निर्वाहस्तु द्वारमन्तरेण न घटत एव। द्वारं चोपकारः स च चिकित्साश्रयत्वमेवेति तदेतदभिसन्धाय न्याय तत्वविदा वाग्भटेनोक्तम् 'चिकित्सा एषु संश्रितेति' तस्मादवाचकशब्दान्वितत्वेनाधिकरणदोषेण कवलित्वादुन्मत्तप्रलापित्वं न वाग्भटस्य।

अथ[1] यद्यप्यन्यदुक्तं—'ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वं संश्रयाः।' (अ. हृ. सू. १।७)। अत्र कस्येत्याकांक्षायां समस्त निर्देशात्। ऊर्ध्वं कफस्येत्यत्र नाभि शब्दस्य इति। तस्मादनर्थकत्व तन्त्रदोषाभिहतमेतद्वाक्यमिति। तन्न, पित्तस्य मध्यभागाश्रयतयोरुभयोरपि सार्थक्यादिति। पण्डित वोपदेवैस्तु 'हृन्नाभिशब्दाभ्यां तदवच्छिन्ने देशै लक्षत' इति व्याख्यातम्। तथा च नापार्थता शंकाऽपि।

अथ अन्यदप्युक्तम्—'कोष्ठः क्रूरो मृदुर्मध्यो मध्यः स्यात्तैः समैरपि।' (अ.हृ. सू.१।९) इति। स चतुर्विधत्वं कोष्ठस्य न मुनिमतम्। यदुक्तं भगवच्छुश्रुताचार्येण—'मृदुः क्रूरो मध्य इति त्रिविधः कोष्ठः। (सु. चि. ३३।२१) अतः कोष्ठे चतुर्विध्याभिधानं मुनिविरुद्धमिति। तन्न, असदनुवाद दूषणस्योपेक्षणीयत्वान्नहि चातुर्विध्यमभिधीयते कोष्ठस्य वाग्भटेन। न च मध्ययोः द्वित्वाच्चातुर्विध्यसिद्धि-

---

1. The following two paras have been shifted from the seventh chapter as they are reated to this chapter only and not to the seventh Ed.

रिति द्वित्वोक्तौमानाभावात् । द्विरुक्तिरेव मानमिति चेत् अनन्यर्था हि पुनश्श्रुतिर्भेदिका । अयमर्थः प्राकरणिकः । यथा विषमादि······ दोषाकार्यं । तथा क्रूरादि भेदभिन्नो विविधः कोष्ठोऽपि । तत्र क्रमप्राप्तं कफजन्यत्वमध्यास्यादिति तदपवादाय पुनरनुवादः मध्यस्स्यात्तै स्समैरिति कार्यमुच्चावचार्थं । न च कफस्य क्रमप्राप्तकोष्ठ जनकत्वं घटते । 'वातोल्बणास्याद्ग्रहणी क्रूरकोष्ठस्य देहिनः । पित्तलान्मृदु कोष्ठस्य योगवाहितयो कफः ॥' इति **दृढबल** (खरनादः[1]) वाक्यविरोधात् । व्याख्याविस्तारस्तु टीकायां प्रपञ्चित इति नेह । संक्षेपेक्तौ वितन्यते । पुनश्शृति भ्रान्तिमुपागतस्य रहस्य विज्ञान विधौ मुनीनां पुरश्शृतेनैव तवाधिकारः ।
भवति चात्र—

(न चा) धिकरणोद्भेदो भूषणं न तु दूषणम् ।
वाग्भटे प्रतिवादीन्द्रे हेतर्हेति रणोद्भटे ॥

इति वाग्भट मण्डने प्रथमं प्रकरणम् ।

---

1. This verse, stated to be of Kharanāda is also found in Ayurveda Rasayana commentary (A. H, Su. 1/8–9).

(द्वितीयं प्रकरणम्)

अथ मास्त्वधिकरणदोषः प्रमाणाननुगृहीतत्वेन तन्त्रदोषेण **वाग्भटं** निग्रहिष्यामीति पुनः **विद्याधरः** प्रत्यवतिष्ठते। यथा हेमन्त-प्रकरणे 'बलिनश्शीत संरोधाद्धेमन्ते प्रबलोऽनलः। भवत्यल्पेन्धनो धातून् स पचेद्वायुनेरितः॥' (अ. हृ. सू. ३।७) इति। अस्यार्थः—हेमन्ते शीतसंरोधात् प्रवलः अनलः अल्पेन्धनोभवति। सोऽनलो वायुना ईरिताः धातून् पचेदिति। तत्रानुकल्पते। हेमन्ते कथं अनलो अल्पेन्धनो भवति ? कथं च वायुनेरितो धातून् पचेदिति अनलापेक्षया स्तोकाशनत्वादिति चेत् तन्न ऋत्वन्तर वैषम्याभावात्। यदा ऋत्वन्तरे अल्पाशनः तथाऽपि धातुक्षयस्य तुल्यत्वादिति। तस्मादनागम-मूलमेतदिति।

अत्रोच्यते—'शीते शीतानिलस्पर्श संरुद्धो बलिनां बली। पक्ता भवति हेमन्ते मात्रा द्रव्यगुरुक्षमः। (स यदानेन्धनं युक्तं लभते देहजं तदा) रसं हिनस्त्यतो वायुः शीतः शीते प्रकुप्यति॥ (च. सू. ६।९–१०) इति **भगवच्चरकाचार्य** वचनमेवात्रागमयितव्यम्। यथाऽत्र वायुनेरितो धातून् पचेदित्यर्थाभावाद्विसंवादः इति चेत् न हि प्रसरन्तीनामुदयानल ज्वालानां निरोधे बाह्याग्नि दृष्टान्तेन हेमन्त बलत्वम्। अग्नेर्दारुक्षपणे तस्य को हेतुरित्यपेक्षायां वायुनेरितः इति चरकवाक्य तात्पर्यम्। कालसाम्येन प्रकुपितो वायुः वह्निमीरत्येव। व्यजन वातेरितो बाह्यनलो यथेन्धनं पचति तद्वदिति वाग्भटेनापि भणितम्। तथा हि न ह्यत्र यतो धातुमग्नि क्षपयति। अतो वायुः प्रकुप्यतीति वचनव्यक्ति प्रतीतिको युज्यते। धातुक्षपणस्य निर्युक्ति-कत्वात्। इन्धनेन अग्निवृद्धिरिति वैद्य सिद्धान्तः। तथा च **तन्त्रसारे** 'आहारकाले संप्राप्ते यो न भुङ्क्ते बुभुक्षितः। तस्य सीदति कायग्नि-र्निरिन्धन इवानलः॥' इति। यदि चेदाचार्यस्य वातप्राकोपोऽभिहित-स्स्यात् तदा वर्षास्विव निरूहादिकमाचार्येण उपदिश्येत। 'चयप्रकोप-प्रशमाः पित्तादीनां यथाक्रमम्। भवन्त्ये कैकशः षट्सु कालेष्वभ्राग-मादिषु॥' (च. सू. १७।११४) इत्यनेन **चरक**वाक्येन दुष्परिहारो विरोधस्स्यात्। व्यायामव्यवायौ च हेमन्ते सकलागमादिषु उपदि-

श्येते । तौ च वातप्रकोपे तत्करितया न संगच्छेते । तस्मादिह वात-प्रकोपो नाम धातुपाकार्थानत प्रेरकत्वम् । कोपो विकृतिः । धातु-पाकप्रेरणे एवं विधस्य वातप्रकोपः । 'वातप्रकोपो द्विविधो दोषकारी तथापरः । धातुपाकार्थमनल प्रेरकत्वं द्वितीयकः । (?) इति । तथा मेदोनिदाने कथितो मुनिभिश्चरकादिभिः—'मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः । चरन् सन्धक्षयत्यग्निमाहारं चापि शोषयेत्' (च. सू. २१।५) इति । तेनोचितमेवायं वचः ।

मानानुगृहीतत्वं कीर्तिपूरेऽस्य दृश्यते ।
सत्यं चपलमेतत्तु गुनिप्रोक्तमतेमते ॥

इति वाग्भटमण्डने द्वितीयं प्रकरणम्

(तृतीयं प्रकरणम्)

अथ माभूत्प्रमाणानगृहीतत्वम् निग्रहं न्यूनाख्येन तु तन्त्रदोषेण दूषयिष्यामीति पुनः विद्याधरः प्रत्यवतिष्ठते तथा हि—ग्रीष्ममधिकृत्योक्तं वाग्भटेन—'तीक्ष्णांशुरति तीक्ष्णांशुग्रीष्मेसंक्षिपतीव यत्। प्रत्यहंक्षीयते श्लेष्मा तेन वायुश्च वर्धते ॥'(अ. हृ. सू. ३।२६) अस्यार्थः—तेन (येन) कारणेन प्रत्यहं श्लेष्माक्षीयते वायुश्चवर्धते यस्माद्धेतोः ग्रीष्माकाले तीक्ष्णाँशुर्भानुः दुस्सहमयूखैः संक्षिपतीव संहरतीव। तत्र किं संहरतीत्यकांक्षायां भगवच्चरकाचार्य वचनं टीकाकारैः अध्याहारेण व्याख्यातम्—स्नेहमिति। 'मयूखैर्जगतः स्नेहं ग्रीष्मेपेपीयते रविः।' (च. सू. ६।२७) इति मनसि कृत्वा व्याख्यातम् स्नेहमित्यर्थाल्लभ्यते। तद्वचनं सहृदयहृदयान्यावर्जयति। यतो नात्र वाक्यन्यूनतायामर्थापत्ति तन्त्रयुक्तिः प्रभवति विषयभिन्नत्वात्। तथा च सुश्रुतेनोक्ता—'यदकीर्तितं अर्थादापद्यते साऽर्थापत्तिः। (सु. उ, ६५।२०)। अनुक्तमर्थतः प्राप्तमर्थापत्तिस्सु सा भवत् यथा ओदनं भोक्ष्ये इत्युक्ते अर्थादापन्नं भवति नायंपिपासुर्यवागूमिति (सु. उ. ६५।२०) न नक्ते दधिभुञ्जीतेत्युक्ते आर्थादापन्नं दिवा भुञ्जीथेति भवति। अत्र न तथा विचारे वाग्भटस्यासीदर्थापत्तिरनर्थकृत्—' त्यागभोगविहीनस्य कृपणस्यैव सन्ततम्।' अनुक्तमर्थादापद्यते·················तत्तश्चोपपादकमेवानुपपद्यमानस्य अर्थस्येति प्रकृतेन तथा। तस्मान्नार्थापत्ति नापि वाक्यशेषः तन्त्रयुक्त्या न्यूनतापरिहारः तस्य भिन्नविषयत्वात्। यदुक्तं सुश्रुतेन—'येन पदेन न्यूनेन वाक्यं समाप्यते स वाक्यशेषः-यथा शिरः पाणिपार्श्वोदरवानित्युक्ते पुरुष ग्रहणं विनापि गृह्यते पुरुषस्य इति। (सु. उ. ६५।१६) तेन न्यूनमेवैतत्। तथा 'यश्चनिम्बं परषुना यश्चैनं मधुसर्पिषा। यश्चैनं क्षीरसर्पिश्यां सर्वस्य कटुरेव सः॥' (व्यास वचनम्) अत्र भिनत्ति लिम्पति सिञ्चतीति न दृश्यते क्रियापदाभावात्। न्यूनताकरणं चात्र वाग्भटस्य वाक्यस्य शेषो न जीवनं भवेत्प्रभुर्मतस्य जीवनं (इत्यत्र) यथा भिन्नविषयत्वात् न वाक्याशेषः। विशेषणे उक्ते युक्तस्यैव विशेष्यस्याध्याहारः न त्वयुक्तस्येति। तथा इव शब्दः श्रूयमाणे उत्प्रेक्षालङ्कारमभिधत्ते यथा 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं

नभः । असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥" (मृच्छकटिका--१।२९) इति । विचार्यमाणे न उत्प्रेक्षाघटते । सम्भावनमात्रेत्युत्प्रेक्षा न तु पारमार्थतः सम्भावनं तत्र नास्ति । ग्रीष्मे पुनर्जगत्स्नेहस क्षोभः परमार्थतोऽप्यस्ति । तस्मान्न्यूनेन तन्त्रदोषेण दुष्टं वाग्भट वचः इति ।

अत्रोच्यते--दुस्सहमयूखतिग्ममयूखः संस्नेह हरणकर्मत्वयोग्यानां सौम्यानामनुषङ्गेण वाक्यसमाप्तौ संभवत्यां न्यूनता दोषस्य सुपरिहारत्वात् संहारकारकेण योग्यस्यैव संक्षीयमाणस्य क्रियते। अन्यथाऽति प्रसङ्गः । तीक्ष्णोष्णानां सौम्यसंहरण योग्यत्वमिति भवत्यनुषङ्गः । अर्थापत्यपि भवति योग्यार्थं परिकलितत्वात् । योग्यत्वं परिकलितं परिकलित्वादिति । यथा 'याते अग्नेऽयाशया' इत्यत्र (कृष्णयजुर्वेद तैत्तरीयसंहिता १-२-११) अन्त्येन तनूर्वर्षिष्ठेतिवाक्यशेषेणायाते अग्नेरयाशया याते अग्नेहरिशयेति वाक्यद्वयस्यानुषङ्गेण समाप्तिः । तदुक्तं **भगवज्जैमिनिना**--'अनुषङ्गो वाक्य समाप्तिः । (मीमांस सूत्र २।१।२६-४४) सर्वेषु तुल्ययोग्यत्वात् तद्भूतानां क्रियापदसम्बन्धस्य तुल्यत्वात् ।

सन्ति चोत्तरायणस्यादानस्य सूर्याक्षेप्यत्वेनोक्ता सौम्यगुणाः ...."आदानं च तदादत्ते नृणां प्रतिदिनं बलम् । तस्मिन् ह्यत्यर्थं तीक्ष्णोष्णा रूक्षामार्ग स्वभावतः ॥ आदित्यपवनास्सौम्यान् क्षपयन्ति गुणान् भुवः । तस्मादादानमाग्नेयं (अ. हृ. सू. ३।२-४) इति । तथानन्तरं ऋत्यभावादनुषङ्गो युक्तइति वक्तुं युक्तम् । असन्निधानोऽपि योग्यानुषङ्गस्य न्याय्यत्वात् । तदुक्तं **भट्टपादैः**--आकांक्षा सन्निधानं च योग्यता चेति च त्रयम् । सम्बन्धकारणत्वेन क्लृप्त नानन्तरं श्रुतिः ॥ (तन्त्रवार्तिकम् २।१) तथा "पदेस्वस्मिन्नलब्धश्चेन्मृग्यो वाक्ये ततः पुनः । तथाऽपिनलब्ध श्चेन्मृग्यः प्रकरणे ततः ॥" (तन्त्रवार्तिकम्) । यदि प्रकरणेन स्यान्मृग्यः प्रकरणान्तरे वाक्यनिर्णये च जैमिनि व्यास न्यायस्यैवाचार्याणामभिप्रेतत्वात् । तथा तत्र युक्तीरुक्तवानाचार्यः **सुश्रुतः**— "द्वात्रिंशदुक्तयो ह्येतास्तन्त्रसार गवेषणे । मया सम्यग्विनिहिता शब्दार्थ न्याय संयुताः । यो ह्येता विधिवद्वेत्ति दीपी भूतास्तु बुद्धिमान् ॥ (सु. उ. ६५।४१-४२) सो..........प्रकाशनापि ह्यर्थाः तन्त्रेस्मिन् प्रतिबुध्यते । अथवा ह्यन्यथा तन्त्रयुक्त्या द्विविध मन्नपानमिव संक्षेप्य कर्मकारकमात्रोच्यते । तथा च **सुश्रुतः**—"यद-

निर्दिष्टं बुध्यावगम्यते तदूह्यम्" (सु. उ. ६५।४०) अनया ह्यूहा-ख्यया तन्त्रयुक्त्या क्वचिल्लिङ्गमप्यूह्यते, क्वचिद्बुध्या क्वचिद्वचनं क्वचिदवयवः। तद्यथा अन्नपानविधौ--चतुर्विधमन्नं भक्ष्यं भोज्यं लेह्यं पेयमिति। एवं चतुर्विधे वक्तव्ये द्विविध मभिहितम्। (सु. उ. ६५।४०) तेन यत्रानुषङ्गयोग्यं क्रियादिकं प्रकरणे न लभ्यते तत्र न्यूनतैव। यथा 'यश्च निम्बं परशुना' इत्यादौ नान्यत्रेति। आदानस्य परस्समो ग्रीष्मः। तेन तत्राधिकं सौम्यान् गुणान् संक्षिपन्, जगत्संहारप्रवृत्त इव भास्वान् भवति। अतः सौम्यगुणसंक्षेपः स्पष्ट एवेति नाचार्येण साक्षादुक्तः इति न दोषलेशोप्याचार्यस्येति सङ्गतम्। न च सर्वथा सौम्यगुणसंक्षेपो ग्रीष्मे जगत्प्रध्वंस प्रसङ्गात्। तस्मात्संक्षिपतीवेत्येव साधु। यदुक्तं इव शब्दादुपेक्षा (इति) विचार्यमाणाऽपि न सा परमार्थत्वात्। तन्न, सर्वस्य स्नेहस्य संहरणाभावात् किंचित्संहरणत्वेन युक्ता इति सर्वमनवद्यम्।

न्यूनता सत्यमस्त्येव तन्त्रेऽस्मिन वाग्भटोदिते।
प्रस्तावे तन्त्रदोषाणां न मुनिप्रोक्तवर्णने॥

इति वाग्भटमण्डने तृतीयं प्रकरणम्।

(चतुर्थ प्रकरणम्)

अथ व्यर्थत्व तन्त्रदोषेण निग्रहिष्यामीति पुनर्विद्याधरो प्रत्यवतिष्ठते । यथा हि--"कुन्देन्दु धवलं शालिमश्नीयात् (अ. हृ. सू. ३।३०) इति निदाघमधिकृत्योक्तं तच्च (तत्र) व्यर्थं कुन्देति विशेषणम् । अत्र अखण्डितशुक्लाश्शालयः खण्डितशुक्ला व्रीह्यः इत्याचार्यपादैअभिहितत्वादिति व्यर्थं भविष्यतीति विशेषणम् । एतदप्यसत् यतो "यवगोधूमविकृतीश्शालीश्च विविधानपि" इति ग्रीष्मप्रकरणे सुश्रुतेनाभिहितम् (सु. उ. ६४।५०) । विविधत्वं च परिमळबाहुल्यातिशायेनेत्याचार्याभिप्राय प्रकटनेन विशेषेण साफल्यात् । तस्मात् कुन्दादि विशेषणस्य वैयर्थ्यम् ।

तन्न, अखण्डितग्रहण निराकरणार्थं विशेषणम् । अत्र यच्चोक्तमाचार्यैः शालिग्रहणं तत् खण्डितमेव लक्षणया अन्येषां अनाभोगात् । तस्मादत्र साधु विशेषणम् । अतिखण्डितानां परिमळयुक्तानां ग्रहाणार्थमाचार्येण कृत इति ।

यच्च विद्याधरेण "शशाङ्क किरणान् भक्ष्यान् रजन्या भक्षयन् पिबेत् । ससितंमाहिषं क्षीरं चन्द्रनक्षत्र शीतलम् ।। (अ. हृ. सू. ३।३२) इति यदुक्तं तत्र दूषणमभ्यधायि । अत्र माहिषक्षीरस्य महाभिष्यन्दिनो वह्निनाशकत्वात् स्वस्थस्य न कदाचिदपि योग्यत्वमिति दूषणमभिधायि ।

तदप्यसत्, यतः सुश्रुतः--"सशर्करेण पयसा रात्रावपि च पूजितम् । शाल्योदनं समश्नीयात् कोष्णं पित्त प्रशान्तिकृत् ।।" (?) इति वचनात् विशेषोक्ता वपि श्रेष्ठतया गव्यस्यैव ग्रहणप्राप्तेः । "तथा महिषाणां गुरुतराङ्गत्वात् शीततरं पयः । स्नेहन्यूनमनिद्राणांमत्यग्नीनां च शस्यते ।।" इति चरकेण (च. सू. २७।२१९) माहिषस्य निन्दितत्वाच्च तद्ग्रहणमनुचितमेवेति चेदत्र ब्रूमः--"जगत् स्नेहं करैः ग्रीष्मे आददानस्तु भास्करः । वात चक्र समुद्भूतं शुष्कपर्णं समन्वितम् ।। रौक्ष्यं संजनयेत् काये ततः शुष्यति देहिनः ।...... ......इत्यभिधायोक्तं सुश्रुतेन" प्रसहानां च मांसानि ....प्रकारैर्विविधैरद्यान्निदाघेऽम्ल...........विना । सुपक्वैर्विविधैः रागैः गौडिकैश्च सुसंस्कृतैः । अत्यर्थं शीतमधुरैस्तर्पयेच्छोषितां

तनुम् । इत्यभिधायोक्तं—"सशर्करेण पयसा रात्रावपि च पूजितम् । तत् श्लेष्मलं बृंहणं ...... ॥ इति (?) ।[1] शीततर सेवाविधौ प्रायेण पठितस्य क्षीरस्य तद्गुणत्वेन माहिषस्यैवात्र ग्रहणोचितत्वात् साधूक्तं सशीतं (ससितं) माहिष क्षीरमिति पाठोऽयं पाठकन्यायात् । रौक्ष्य निवृत्तये ग्रीष्मे रात्रं दिनं च निद्रा सुश्रुतादिभिर्विधीयते—"रौक्ष्य निवृत्तये ग्रीष्मे निद्रारात्रौदिवापि वा (?) ।"[2] अतोऽपि (ति) निद्राकरत्वात् माहिषं क्षीरमुचितं ग्रीष्मे इति गम्यते । गव्यस्य श्रेष्ठत्वं ऋत्वन्तरे भविष्यति । ग्रीष्मे तु माहिषक्षीर सेव्यत्वो हि अमृताविव नवान्नवसातैल .... इति साधूक्तं वाग्भट पाठकेन । श्लेष्मलत्वं माहिषं क्षीरस्यसेव्यत्वे त्वया कारणमुक्तं तच्चाहरहः श्लेष्मक्षयाय जृम्भमाण रौक्ष्यजायमाने देहशोषणे ग्रीष्मसेव्यत्व एव हेतुतया पर्यवस्यति । न च यदत्यग्निहितं तदग्निनाश करमिति नियतिरस्ति । शिलाजित्वादौ व्यभिचारात् । "मूत्रकृच्छ्राश्मरी पाण्डुमेहहृच्छीतलं मतम् । शिलाजतुं दीपनीयमत्यग्नीनां च शस्यते ॥ (?) स्वस्थाचरणं नाम दोषसाम्यानुपालनम् । तच्च श्लेष्म क्षये श्लेष्मवर्धनमन्तरेण किमन्यद्भविष्यति । स च तत्कफोदासनेन न गोपयसा लभ्यत इति ।

व्यर्थता तन्त्रदोषाणां खण्डनाडम्बरस्य च ।
ज्ञेया चपलतास्सैषा मुनिवाक्योपवर्णने ॥

इति वाग्भटमण्डने चतुर्थं प्रकरणम् ।

1–2. These verses are not found in the extant Susruta samhita.

(पञ्चमं प्रकरणम्)

अथ यदन्यदुक्तं **विद्याधरेण**—"शीतेवर्षासु चाद्यांस्त्रीन् वसन्तेऽन्त्यान् रसान् भजेत् ॥" (अ. हृ. सू. ३।५५) इत्यत्र वर्षासु मधुराम्ललवणानमाद्यानां त्रयाणां रसानां...... । मधुरतिक्तकषाया एव हिताः पित्तसञ्चयकालत्वात्, मधुरेण वायुश्शाम्यति तिक्तकषायाभ्यां च कफ इति । तथा च **सुश्रुतः**—"प्रक्लिन्नत्वात् शरीराणां वर्षासु भिषजा खलु । मन्देऽग्नौ कोपमायान्ति सर्वेषांमारुतादयः ॥ तस्मात्क्लेदविशुद्धर्थं दोष संहरणाय च । कषायतिक्तकटुकै रसैर्युक्तमथाऽद्रवम् ॥ नाति स्निग्धं नातिरूक्षमुष्णं दीपनमेव च । देयमन्नं नृपतये यज्जलं चोक्तमादितः ॥ (सु.उ. ६४।७–८) इति । **भेडेनाप्युक्तं**—"वर्षासु देहिनमग्निर्मृदुत्वमुपगच्छति । तेन निष्यन्दजो वायुस्तस्मिन् काले प्रकुप्यति । तस्मान्नसेवेद्वर्षासु कट्वम्ललवणान् रसान् ।" इति (भेलसंहिता विमानस्थान ८।३)[1] इति । तस्मादनुचितं वाग्भटीयं वचः ।

तन्न, प्रव्यक्तवर्षाभिविषयत्वात् शीतेवर्षासुचाद्यां त्रीनिति वाक्यस्य एतदेवाचार्यणाभिहितम्—"व्यक्ताम्ललवणस्नेहं भोजनं त्वतिदुर्दिने" (अ. हृ. सू. ३।४६) इति तथा च **चरकाचार्यः**—"व्यक्ताम्ललवणस्नेहं वात वर्षाकुलेऽहनि । विशेषशीते भोक्तव्यं वर्षास्वनिल शान्तये ॥ (च. सू. ६।३७) । **सुश्रुतोऽपि**—" अह्नि मेघानिलाविष्टेऽत्यर्थं शीताम्बुसङ्कुले ॥ (सु. उ. ६४।९) कायाग्नि रक्षणार्थं व्यक्ताम्लस्नेहलवणमिति अव्यक्त चिह्नासुवर्षासु साधारण एव विधिर्विधेयः । तदुक्तं **वाग्भटेन** वर्षा प्रकरणे "भजेत् साधारणं सर्वमूष्मणस्तेजनं च यत्" (अ. हृ. सू. ३।४४) । **चरकोऽपि**—"भूबाष्पान्मेघनिस्यन्दात् पाकादम्लाज्जलस्य च । वर्षास्वग्निबले हीने कुप्यन्ति पवनादयः । तस्मात्साधारणः सर्वो विधिर्वर्षासु शस्यते । (च.सू. ६।३४) इति । किंचित्वदुद्भावित **सुश्रुतभेड** वाक्यानामपि अनभिव्यक्तचिह्न वर्षा विषयत्वमेवाङ्गीकार्यम् । अन्यथा तेषां व्यक्ताम्लस्नेहेति **चरक** वाक्येन, अह्निमेघेति **सुश्रुत** वाक्ये-

---

1. In the extant Bhelasamhita this verse reads as—"वर्षासु देहिनामग्निमृदुत्वमुपगच्छति । ततो विष्टम्भजोवायुर्यस्माच्छीघ्रं प्रकुप्यति ॥ तन्न सेवेत वर्षासु कट्वम्ललवणान् रसान् ।"

तन्त्रविरोधस्य दुष्परिहारत्वापातात् स्यादेतत् । यद्यम्ललवणयोर-विरोधाय शीते वर्षास्विति वाक्यस्य प्रव्यक्तचिह्नवर्षाति विषयत्वं व्यक्ताम्लेति वाक्यानुसारात् कथ्यते तदा मधुरस्य विरोधः । तत्र मधुरानुपादानात् । अथ तदविरोधाय वर्षामात्रविषयता तदा अम्ल लवणोयोर्विरोधः । सेयमुभयतः पाशारज्जुरिति चेत् तन्न, व्यक्ताम्ले-त्यत्र हि वातशान्त्यर्थं अम्ललवणावुपदिश्येते । तेनानिलशमनमुख्यस्य मधुरस्य कैमुतिक न्यायौचित्याभ्यां अनुक्तस्याप्यनुमतत्वं गम्यत इति । तस्मात् सुश्रुतचरक वाक्यतात्पर्य मूलमेव वाग्भट वचः ।

युधिष्ठिरे सेवितसत्यवाचि
श्रीवाग्भटे (अ) गर्वित भीम भावे ।
सद्वादि वादैकजये वराके
भवेदपार्थत्वपदं कथं न ॥

इति वाग्भटमण्डने पञ्चमं प्रकरणम् ।

(षष्ठं प्रकरणम्)

अथ पुनः क्षीरादिवचन दूषणाय विद्याधरः प्रत्यवतिष्ठते । यथा हि—"अल्पाम्बुपान व्यायामकटुतिक्ताशनैर्लघु । आजं शोषज्वरश्वास रक्तपित्तातिसारजित् ॥ (अ. हृ. सू. ५।२४) अत्र अजाक्षीर लाघवे हेतूपन्यासः उचितः । तथा च क्षीरं द्रव्यं, द्रव्यं च सर्वमपि पाञ्चभौतिकत्वेन मुनिसंमतम् । अतो द्रव्ये लाघवादयो गुणाः भूतगुणैरेव उपलभ्यन्ते, नेतरे । यदाह **चरकः**—"लघूनि द्रव्याणि वाय्वग्नि गुण बहुलानि पृथ्वीसोमगुण बहुलानि इतराणि । (च. सू. ५।६) **सुश्रुतो**ऽपि वमनद्रव्यमधिकृत्य "वमन द्रव्याण्यग्निवायुगुण भूयिष्ठानि, अग्निवायू हि लघू, लघुत्वाच्च तान्यूर्ध्वमुत्तिष्ठन्ति । (सु. सू. ४२।६) तस्मात् स्वभाव एव द्रव्ये लाघवादौ हेतुः । तथा च **चरकः**— स्वभावाल्लघवोमुद्गास्तथा लावकपिञ्जलाः ।" (च. सू. २७।३३६) इति तत्रापि लाघवेऽल्पाम्बुपानादि हेतूपन्यास स्यात् यतु गौरवलाघवे स्वभावातिरिक्तं संस्कारादिकमपि कारणम् । तत् स्वभावादवगत गौरवलाघवेद्रव्ये तदादानापनयनयोरेव चिकित्सार्थमुपयुज्यते । तथा हि क्षीरं स्वभावाल्लघ्वपि संस्कारेण गुरु भवति । यदाह **सुश्रुतः**— "तदेवातिशृतं शीतं गुरुबृंहण मुच्यते । (सु. सू. ४५।६३) तथा व्रीहि गुरुस्वभावस्यपि सस्काराल्लाघवम् । एवं मात्रादोन्यप्युदाहार्याणि । लाघवादिकराणि **सुश्रुताचार्येणो**क्तानि—" गुरुलाघव चिन्तेयं स्वभावं नातिवर्तते । तथा संस्कारमात्रान्नकालांश्चाप्युत्तरोत्तरा । (सु. सू. ४६।४४३) तस्मात् वाग्भटोक्त स्वभावाल्लघ्वजा क्षीरं विरुद्धतन्त्रदोषजालके ·········पाकाश्चामाशये पाचकाग्नेस्तत्र स्थितत्वात् । तदुक्तं **चरके**—"नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः । अशितं खादितंलीढं पीतं चात्र विपच्यते ॥ (च. वि. २।१७) तस्मात् पाकसंभावनमभूषण (?) विरोध संभावनम् । विरोध संभवे च विरोध हेतूपन्यासः । तस्मादपरीक्षितमेतदुक्तं वाग्भटेन मधुपानक्रीडापरेण निरर्थक तन्त्रदोष विलासिना सुखमापद्यत इति ।

अत्र ब्रूमः—यदजाक्षीर लाघवहेतूपन्यासे समयविरुद्ध तन्त्रोद्भावनं क्रियते तत्र पृच्छते किं यत्रक्वापि द्रव्यगौरवलाघवयोराचार्यैर्हेतवः उपन्यासादिति समयसाक्षादेव कुर्मः ? । अथवा यदि हेतूप-

न्यासः आचार्याणामभिमतस्यात् तर्हि क्वापि कुर्युर्नच तदस्तीति तेनार्थात् गम्यते ?। नाभिप्रेत एवायमित्याद्यः। द्रव्यलाघवादिषु हेतवो न वाच्या इति। साक्षान्निषेधाश्रयणान्नापिद्वितीयः। अनेक द्रव्ये लाघवदौ सुश्रुतादिभिरेव हेतूपन्यासस्स्यात्। तथा च मांसवर्गे मत्स्यप्रकरणे—"नादेया गुरवो मध्ये मत्स्या यस्मात् पुच्छास्य-चारिणः॥ (सु. सू. ४६।१२१)। अधस्ताद्गुरवो ज्ञेया मत्स्याः सागर संभवाः। उरोविचरणात्तेषां पूर्वमङ्गं लघुस्मृतम्॥ (सु. सू. ४६।१२४) इत्यादि। तथा पक्षिवर्गेपि—"पक्षोत्क्षेपात्समो दृष्टो मध्यभागस्तु पक्षिणाम्। (सु. सू. ४६।१३३) इत्यादि। न चैव-मादिषु स्थलेषु हेतुप्राप्तं लाघवादि चिकित्साश्रयमपनेतुमाधातुं वा शक्यते। किं च सौश्रुत एव साक्षादजापयसि लाघवस्येव हेतूप-न्यासः। नन्वनेकौषधि रसः प्रसादात् क्षीरतां गतः। "सर्वप्राण भृतां तस्मात्सात्म्यं क्षीरमिहोच्यते" (सु. सू. ४५।४८) "अजानामल्प-कायत्वात् कटुतिक्त निषेवणात्। नात्यम्बुपानात् व्यायामात् सर्व व्याधिहरं पयः॥ (सु. सू. ४५।५२) इति। तेन न कश्चित् विरोधो-मुनिमतैकशरणस्याचार्यस्य।

नापि यान्त्रिकेक्षुरस विदाहित्वे हेतुरुपपन्नः। तथा हि इक्षुप्रकरणे दन्तपीडितः कथं शर्करातुल्यो यान्त्रिकस्तु विदाहीत्याथिप्योत्तरमुक्तं **गयदासाचार्य** प्रभृतिभिष्टीकाकारैः—दुष्टत्वं यन्त्रादिपातात् काल विलम्बाच्च यान्त्रिको विदह्यत इति सयुक्तिमुच्यतया तन्त्रान्तर-मप्युदाहृतम्—"दुष्टकाण्डादि विक्षेपात्कालविक्षेपणादपि। रस-इक्षोर्विदाहिस्यात् यान्त्रिकम्········। इति। शेषमुपलालमित्यु-पेक्ष्यते। मधुवर्गोक्त तूपन्यासानामपि सुधियामग्रे लज्जावहत्वात्तू-ष्णीमेव अस्माभिर्गम्यते। भवता तु तन्त्रदूषणपाठवत्प्रकटनैक लम्पट-तया सर्वतो निस्त्रपेण पाठ्यताम्॥ भवति चात्र—

मधुरलिप्सुतया परितोरटन्
मधुप एष मलीमस विग्रहः।
सुमनसां वर रक्षिणि वाग्भटे
प्रभविता किमुदूषयितुंरटन्॥

इति वाग्भटमण्डने द्वादशं (षष्ठं) प्रकरणम्।

(सप्तमं प्रकरणम्)

अथ पुनः प्रत्यवतिष्ठते **विद्याधरः**—"षष्टिको व्रीहिषु श्रेष्ठो। (अ. हृ. सू. ६।७) इति निर्धारणसप्तमी। निर्धारणं च गुणैः क्रियमाणं सजातीयानां भवति। तथा व्रीहीणां विजातीयत्वान्नघटते। व्रीहयोप्यन्ये अन्ये षष्टिकाः। तथा च **सुश्रुतः**—"षष्टिककङ्गुक-मुकुन्दक पीतकप्रमोदककाकलकासनपुष्पकमहाषष्टिक चूर्णककुरवक-केदार प्रभृतयः षष्टिकाः। रसेपाके च मधुराः शमना वातपित्तयोः। शालीनां च गुणैस्तुल्या बृंहणा कफशुक्रलाः॥ षष्टिकः प्रवर स्तेषां (सु. सू. ४६।८-१०) तथा "कृष्णव्रीहिशाला मुखजतुमुखनन्दीमुख-लावाक्षकत्वरितककुक्कुटाण्डक पारावतकपाटल प्रभृतयो व्रीह्यः। कषायमधुराः पाकेऽमधुरा वीर्यतोऽहिमाः। अल्पाभिष्यन्दनस्तुल्याः षष्टिकैर्बद्धवर्चसः॥ कृष्णव्रीहिर्वर स्तेषां (सु. सू. ४६।१२-१३) इत्यादि। तस्मात् षष्टिकाणां ब्रीहीणां चैक जातीयता नास्ति। अपरं च बिजातीयानामपि मध्ये यदि षष्टिको वरो व्रीह्यस्तववरास्यु-स्तदा सुश्रुतः किं षष्टिके तुल्यत्वं व्रीहीणां पठेत् ? पठितं च तुल्यत्वं, तस्मादसंगतमेतत्।

उच्यते--व्रीहि शब्दः सामान्य धान्ये वर्तते यदुक्तं**अभिधाने** (?) "धान्याव्रीहिस्तम्भकरः।" आतो धान्यमात्रे षष्टिकः प्रवरो भवि-ष्यति। किं वृथा दूषणत्वात्पावनमिति चेत् नैवं। तत्र लोहितशालीनां पट्टाभिषेकः। तथा च **चरकः**--"तत्र लोहित शालयः शूक धान्यानां पथ्यतमत्वे श्रेष्ठतमा भवन्ति, मुद्गाः शिम्बी धान्यानां। (च. सू. २५।३८) इत्यादि। तस्मात् यत्किंचिदेतदुच्यते वाग्भटेन "एवं च "उष्ण स्त्वच्यो हिमस्पर्श केश्यो बल्यस्तिलो गुरुः।" (अ. हृ. सू. ६।२३) इत्यादि वाक्येषु हिमस्पर्शादयो दोषाः सुव्यक्ता एव। तथा-न्नवर्गमुद्दिश्यापरमुक्तम्-"कुकूलकर्परभ्राष्टूकट्वाङ्गार विपाचितान्। एकयोनीन्लघून् विद्यादपूपानुत्तरोत्तरम्॥ (अ हृ सू. ६।४२) अत्र कुकूल्यादिपाकमात्रमुत्तरोत्तरं लाघवे कारणं न भवति। किं तर्हि तनुत्वादि संस्कार विशेषः। कर्परेचाङ्गारे वा पावको भवतु, सम्यक्पाकश्चेत् तदा तुल्यलाघवम्। तथा विशेषोप्युक्तः।

"सुपक्वास्तनवश्चापि भूयिष्टं लघवो मता:"। तस्मादुत्तरोत्तरं लाघवमाधारं (हारं) विशेषेणोक्तम्। असंगतमेतत्। पाकमात्र संस्कारो हि आमापेक्षया सर्वेषु समानलाघवः। तथा च चरकः— "संस्काराल्लघवस्सन्ति भक्ष्यगोधूम पैष्टिका:" (च. सू. २७।२७२) तथा "द्रव्यसंयोगसंस्कारं द्रव्यमानं पृथक् तथा। भक्ष्याणामादिशेत् बुद्ध्वा यथास्वं गुरुलाघवम् ॥" (च. सू. २७।२७६) एवं अन्नपानाद्याहार निर्णयः। सर्वोऽपि मुनिमतमतिक्रम्य वर्तते। अतः प्रत्यहं बुभुक्षासमये समयविरुद्ध तन्त्रदोषश्चैषास्वाद्यत इति।

अत्रोच्यते––द्विधा तण्डुलः शालिव्रीहिभेदात् यदाहुराचार्याः–– "अकण्डित शुक्लाश्शलयः कण्डितश्शुक्ला व्रीहयः इति (डल्हणव्याख्या, सु. सू. ४६।४) तेन शालिव्यतिरिक्तानां षष्टिकानां सर्वेषामपि व्रीहित्वेस्थिते तेषु षष्टिकाः श्रेष्ठा भवन्ति। यथा सर्वेष्वपि षष्टिकेषु········शालिव्रीहि भेदेन द्वित्वम्। कुन्देन्दु धवळं शालिमित्यस्य दूषण प्रस्तावेन पैजोक्तिमधुन्यत्वमेव न त्यजति।

तिक्तस्य स्पर्शहिमत्वं द्विव्रणीयेध्याये—"कल्कः संरोपणः कार्यस्तिलजो मधुसंयुतः (सु. चि. १।६५) इत्यत्राक्षिप्य समर्थितः तस्मादाचार्य **जेज्जटेन** यथा हि—" ईषत् कषायोमधुरःसतिक्तः संग्राहिकः पित्तकरस्तथोष्णः। तिलो विपाके कटुको[1] बलिष्टः स्निग्धो व्रणेलेपन एव पथ्यः ॥ (सु. सू. ४६।३९) अत उष्णत्वात् कथं त्रिदोषजेव्रणे तत्कल्पो हितस्यात्। कल्पो हि त्रिदोषघ्न इत्याशङ्क्योक्तम्। यथा काञ्जिकादयोन्तरुपयुक्ता दाहकारिण त्वगादिषु नियुक्तादाहहारिणः प्रतिनियता हि इत्याशयो अधिष्ठानविशेषात्कर्मविशेषः। तेन तिलोप्यन्तरुपयोगे पित्तकरः आलेपे तु पित्तहरः इति। तथा निर्विवाद शीतगुणत्वे यव कल्कस्य तिलवत् साम्यमुच्यते तिलवद्यवकल्क इति। तेन लेपे तिलस्य शीतलत्वात् गम्यते। अतः स्पर्शहिमत्वमुपपन्नमेव तिलस्य।

किं च अग्निसंयोगो हि लाघवहेतुतयासद्रव्याणां सर्वाशयं संप्रतिपन्नः। अतस्तस्य यथा यथा यो सन्निकर्षस्तथा तथा द्रव्यस्य लाघव-

---

1. In the extant Susruta samhita it is विपाके मधुरः with its variant विपाकेकटुकः mentioned in the foot-note.

प्रकर्षः युक्तमेवोक्तमाचार्येण कुकूलककर्परेत्यादि । तथा च **भोजः**–यथा यथा भवेत्पाके संपर्कोऽग्नि स्तथा तथा । भक्ष्याणामेकजातीनां लाघवे वैद्य आदिशेत् ।। भवति चात्र–-

प्रथित शासन दीपतथा (स्थि) तं
सकल भोज्य विलुण्ठन लम्पटः ।
समनुजो व्यवतिष्ठदसाध्वयं
(अपधिया) कथमद्य न सीदति ।।

इति वाग्भटमण्डने त्रयोदशं (सप्तमं) प्रकरणम् ।

(अष्टमं प्रकरणम्)

अथ "पादेनापथ्यमभ्यस्तं पादपादेन वा त्यजेत्। निषेवेत हितं तद्वदेकद्वित्र्यन्तरी कृतम्॥ (अ. हृ. सू. ७।४८) इत्यत्र भूयो **विद्याधरः** प्रत्यवतिष्ठते। अस्यार्थः--स्वस्थेन वसंतकाले तीक्ष्णरूक्षाद्यन्नपानं सेव्यं हितत्वात् मधुर स्निग्धाद्यं च वर्ज्यं अपथ्यत्वात्। अतो वसन्ते स्वस्थेन तीक्ष्णादिकमन्नपानं हितमभ्यस्तं ग्रीष्मकाले च प्राप्ते अपथ्यं जातं मधुरादिकं च पथ्यम्। अतस्तेन क्रमेणाभ्यस्तमपथ्यं त्याज्यं अभ्यस्तं च पथ्यंसेव्यमित्याकांक्षायां अनेन वाक्येन क्रममाह। अभ्यस्तं सेवितं अपथ्यं अहितं पादेन आहार चतुर्भागेन पादपादेन आहार षोडश भागेन त्यजेत् पथ्यं चानभ्यस्तं चैक द्वित्र्यन्तरो कृतं सेवेतेति। न च सामान्यमत्यन्त विरुद्धम्। यो मत्स्यादि स्वस्थस्य विहितमस्ति यदभ्यस्तं स्वस्थो अनेन प्रकारेण परिहरेदिति। तस्मादन्यप्रकरणस्यार्थं अन्य प्रकरणे निवेशयन् क्रमभङ्ग तन्त्रदोष गृहीतो **वाग्भट भट्टः**। तथा पादपादेन चेति यदृच्छाशिल्पमेव। यथा स्वस्थं प्रति **चरकाचार्यः** "उचितादहिताद्धीमान् क्रमशो विरमेन्नरः। हितं क्रमेण सेवेत क्रमश्चात्रोपदिश्यते॥ प्रक्षेपापचये ताभ्यां क्रमः पादांशिको भवेत्। एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा। (च. सू. ७।३६-३७) प्रक्षेपः स्वीकारः अपचयस्त्यागः एकान्तरमेक भोजनमन्तरीकृत्य पादांशिक क्रमस्यात्। तथा द्व्यन्तरं भोजनद्वयमन्तरीकृत्य, त्र्यन्तरं भोजनत्रयमन्तरीकृत्य पादभागिकः क्रमस्स्यात्। स्वस्थस्य एकस्मिन् दिने द्वौकालौ भोजनं विहितम्। यदुक्तं **चरकाचार्येण**--"समधातोस्तथाऽहारो द्विकालमपि पूजितः" (?)। **सुश्रुताचार्यः**--"समाग्नये तथाऽहारो द्विकालमपि पूजितः। (सु. उ. ६४।६२) तस्मात् सप्तसु दिनेषु चतुर्दश भोजनकाला भवन्ति। तेषु चायंक्रमो बोद्धव्यः। सप्तदिनानि च प्रकृति भोजन कालावधिभूतानि पच्यन्ते। तथा ह्याचार्यश्चरणादेशः--"अत ऊर्ध्वं अन्नगुणक्रमेणोपभुञ्जानः सप्तरात्रेण प्रकृति भोजनमागच्छेदिति" (च. सू. १५।१६) **पराशरोप्याह**--"तस्मात् पथ्यापथ्याभ्यां आहाराभ्यां नृणां ध्रुवं। सप्तरात्रेण शुध्यन्ति विशेषात्सप्तधातवः॥" तथा पादभागिक एव क्रमः सर्वाचार्याणां मतम्। अस्मिन्नर्थे **वाप्यचन्द्रेण**

तन्त्रान्तरमप्यलेखि--"सात्म्यादप्यहिताद्धीमान् क्रमशोऽविरमेन्नरः। संत्यज्य पादमहिताद्धीनपादेन पूरयेत् ॥ सात्मीभूतं यदाजातमनेनैव क्रमेण तु। संत्यागोपचयौ कार्यावहितस्य हितस्य च ॥" तथा "ऋत्वोरंत्यादि सप्ताहादृतुसन्धिरिति स्मृतः। तत्र पूर्वो विधिस्त्याज्यस्सेवनीयोऽपरः क्रमात् ॥" (अ. हृ. सू. ३।५८) अत्र अन्त्यादिसप्ताहौ चतुर्दशदिनानि ऋतुसन्धिः। अनेन क्रमेण पूर्वर्तुविधिस्त्याज्यः परर्तुविधिस्वीकार्यश्चेति अस्यार्थः। न चायुर्वेदे चतुर्दश दिनेषु ऋतुसन्धिव्यवहारोऽस्ति। किंतु पूर्वर्तुविधि क्रमेणस्त्याज्यो वर्तमानर्तुविधिश्चसेव्योरिति महर्षीणां प्रकृतमुपदिष्टम्। तस्मान्मुनिमतमुल्लङ्घ्याभिधीयमानत्वात् विजितमेव समयविरुद्ध तन्त्रदोषेण।

भवतिचात्र--

वादाहवे वाग्भट वाक्यभेरीविधाय हस्ताङ्गुलि चालनानि।
श्रीतन्त्र वैरोधिकदोषशेषे सुशिक्षये द्वासपदाधिकारम् ॥

अत्रोच्यते--न तावदन्यप्रकरणस्थं अन्यप्रकरणे लिख्यते इति प्रथमदोषोद्भावनं युक्तम्। कालकृत पथ्यापथ्य विभागस्य ऋतु चर्यादिषु स्वस्थंप्रति सर्वागम सिद्धत्वात् यदप्युक्तं स्वस्थस्य हि व्यवस्थितं द्रव्यमस्तीति तदृतुचर्यादिष्वेव व्यभिचारि। न हि दुग्धं प्रावृषिहितमिति। किं च पादेनापथ्यमित्येतस्य वाक्यस्यान्यप्रकरणस्थत्वं वदता भवता स्वोक्ति······प्रलापित·· ·····त्वमेव प्रकटी क्रियते तथा च त्वदुक्तिरेव पादेनपादपादेन चेति वाक्यस्य स्वरूपद्वयमपि वाग्भट यदृच्छाशिल्प मिव कल्प्यते। तथा हि स्वस्थवृत्तंप्रति भगवच्चरकाचार्य चरणादेशः--"उचितादहिताद्धीमान्" (च. सू. ७।३६) इति। अत्र न वाक्यविसंवादता लेशोऽपि। चतुर्दश दिन ऋतुसन्धि निरूपणं वाग्भटीयं न आगमविरोधी। पूर्वर्तुविधिः क्रमेण त्याज्यो वर्तमानर्तुविधिश्च सेव्यो इति प्रकट एव महर्षीणामुपदेशः। तत्र च क्रमाकांक्षायां स्वस्थवृत्तोक्त क्रमस्वीकार एव न्याय्यः। स चयादिकं क्रियमाणं चतुर्दशभिरेव दिनैर्भवतीति। स्यादेतत्। "एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा" इति चरकवाक्यस्यादिमदिनानामन्तरं विशेषतो यस्मात। न च तदस्ति भोजनान्तरस्यानन्तरमेव समर्थितत्वादिति। न च भोजनान्तरत्व निरूपण व्याख्यानस्य निर्मूलत्वात्। किं च यदि भोजनकालान्तरितत्वमत्रोच्यते तदा सप्ताहे सर्वंप्रति सात्म्यक्रमोपदेशो नियतो नोक्तस्यात्। तथा हि एकद्वित्रिवेळाभुजां

स्वस्थानां भूयिष्ठं दृश्यमानत्वात् यच्चरकाचार्य वाक्यं "समधातो स्तथाहारो द्विकालमपि शस्यते।" तदभ्यनुज्ञामात्रपरं न नियमपरमिति सकल टीकाकारप्रतिपन्नोऽयमर्थः। नियमपरत्वे च त्रिवारैकवारादि भोजन सात्म्यानि हितोपदेशोऽयं न स्यात्। मितेन भोजनान्तरे तच्चेकद्विकाला भुजः सप्ताहात्प्रकृति भोजनं विधेयम् एककाल भुजस्तु चतुर्दशहात् त्रिकाल भुजस्तु किंचिदूनपञ्चरात्रेण्येत्यादि विरम्य व्यापराद्वाक्य भेदापातः। दिनान्तरितत्वाद्व्यवस्थित एव शास्त्र निर्णयस्स्यात्। एतदेवाभिप्रेत्य प्रकारान्तरम्। ततश्च दव्यन्तरं त्र्यन्तरं तथेत्यत्र नयविदा भट्टारकहरिश्चन्द्रेण दिनान्तरितमेव व्याख्यातं। स्वव्याख्यामूलतया तन्त्रान्तरमुदाहृतम्—"अपथ्यं सात्म्यमभ्यग्नं चेष्टां च पादशस्त्यजेत्। भजेच्चपादशः पथ्यमेकद्वित्रिदिनान्तरम्॥ इति। पराशर वाक्य विरोधः चरक वचन वाक्यभेदपरिहार न्यायान्याय गतिकं तन्त्रान्तर वाक्यानुसारेण। सप्तरात्रेणेत्यावृत्ति मात्रकरणेन विरोधस्य सुपरिहारत्वात्।

अथ यदुक्तं विद्याधरेण सप्तदिनानि च प्रकृति भोजनकालावधि भूतानि पच्यन्ते...तथा ह्याचार्यचरणादेशः 'अत ऊर्ध्वं अन्नगुणान् क्रमेणोपभुञ्जानः सप्तरात्रेण प्रकृतिभोजनमागच्छेदिति तद्विरेचनप्रकरण प्रधानम्। शुद्धिशुद्धस्य त्रिकालपेयादि विधायक वाक्यशेषतया न पथ्यापथ्यक्रम विधायकस्यैकान्तरम्। ततश्चोर्ध्वं अस्य वाक्यस्य कथमित्याकांक्षापूरणं सम्बन्ध योग्यमिति।

भवतिचात्र—

वादाहवे तत्र भुवां बलेन किंचापि
 (कृतानि) भद्राणि विमुखस्यतस्य।
सद्युक्ति (सत्युक्ति) योगिन्य-
 नुकूलतायां स्यात्सौर वाग्भिः किमु वाग्भटस्य॥

इति वाग्भटमण्डने सप्तमं (अष्टमं) प्रकरणम्।

(नवमं प्रकरणम्)

अथ भूयो प्रत्यवतिष्ठते **विद्याधरः**—यथा हि—"सेवेत कामतः कामं तृप्तो वाजीकृतां हिमे । त्र्यहाद्वसन्तशरदोः पक्षाद्वृष्टि निदाघयोः ॥ (अ. हृ. सू. ७।७३) । अत्र सर्वर्तु कामसेवाविध्युपदेशः । तत्रैव पृच्छते विशेषणद्वयं परस्यास्मिन् वाक्यमस्ति । तथा भूत पुरुषो हिमकाले कामं स्वेच्छया सेवेत । एतच्चातीवायुक्तम् । यतो वाजीकरण सेविनः सर्वस्मिन् काले सामान्योपदेशात् । तदाह **सुश्रुतः**—"कल्पस्योदग्रवयसो वाजीकरण सेविनः । सर्वेष्वतुष्वहरहर्व्यवायो न निवार्यते ॥ (सु. चि. २६।३) अथ विशिष्टस्य वाजीकरण सेविनः विधिकृतः कामं स्वेच्छया सेवेत इति । अकृत वाजीकरणस्य हिमकाले स्वेच्छया कामं सेवेतेति चेदयुक्तं तदा समुच्चायार्थो दुर्घटस्यात् तद्बोधक शब्दाभावात् । न्यूनेन तन्त्रदोषेण जितम् । अपरं च सुश्रुतोक्त वाक्यबलात् अकृत वाजीकरणो वसन्तशरदो द्वयहात् कामं सेवेत । तत्र त्र्यहाद्दिन त्रयानन्तरं वसन्ते शरदि च कामं सेवेत । तथा वृष्टिनिदाघयोः पक्षादनन्तरं कामं सेवेत । अनेन चोपदेशेन एकवारमेव वसन्ते दिनत्रयानन्तरं कामसेवोपदिष्टा भवति । तथा शरदि च । एवं वर्षासु पक्षादनन्तरमेकवारम् । तथा निदाघेऽपि । एतच्चतावदसंगतम् यतः सर्वेष्वृर्तुषु त्र्यहात्कामसेवा । तद्यथा घर्मे पक्षात्पक्षात् । यदाह **सुश्रुतः** "त्रिभिस्त्रिभिरहोभिर्वा समीयात् प्रमदां नरः । सर्वेष्वृर्तुषु, घर्मेषु पक्षात्पक्षाद्व्रजेद्बुधः ॥ (सु. चि. २४।११३–११४) । तस्माद्वीप्सा ज्ञानार्थं सुश्रुत चरणौवाराध्यताम् ।

न तु भवतामपि स्ववचने परस्परविरोधः । तथा च **सुश्रुते** वर्षासूपदेशः—"तरुणत्वाद्विदाहं च गच्छन्त्यौषधयस्तदा । मतिमांस्तन्निमित्तं च नातिव्यायाममाचरेत् ॥ अत्यम्बुपानावश्यायग्राम्य धर्मातपांस्त्यजेत् । (सु. उ. ६४।१०–११) अत्र वर्षासु कामसेवा निषेधः तथा शरदि च "रात्रौ जागरणं चैवमैथुनं चापि वर्जयेत् । (सु. उ. ६४।१७) तथा घर्मेष्वपि—"व्यायाममुष्णमायासं मैथुनं परिशोषि च । रसां श्चाग्निगुणोद्रिक्तान् निदाघे परिवर्जयेत् ॥ (सु. उ. ६४।४०) शीतकाले वसन्ते च निषेधो नास्ति । "शयीत शयने तैस्तैर्वृतो गर्भगृहोदरे । स्त्रीः श्लिष्टाऽगुरु धूपाढ्याः पीनोरु

जघनस्तनीः (सु. उ. ६४।२५) उत्सादनं तथा स्नानं वनिताः काननानि च। सेवेत निर्हरेच्चापि हेमन्तोपचितं कफम् ॥ (सु. उ. ६४।३८-३९) चरकेप्येवमस्ति क्वचिदृतौ विधि क्वचिन्निषेधः। युक्तमुच्यते भवता ? परं सुश्रुतचरकाचार्य वाक्यवीराणां गतिरधिगन्तु न शक्यते। तथा हि तेषां रहस्यं स्वस्थवृत्तं हितानि तानि विधिनिषेध वाक्यानि प्रतिपादितानि। अत्र संदेहः, यत्र निषेधस्तत्र किमात्यन्तिको निषेध एव उतास्ति काचित् व्यवस्था। तथापरतश्च विधिस्तत्र च किं प्रतिपाद्य विधिरथवा व्यवस्थाविधि। तत्रैव संदेहो भवत्यपरिभाषया। सुश्रुताचार्योक्त व्यवस्था क्रियते "त्रिभिस्त्रिभिरहोभिर्वा समीयात्प्रमदां नरः। सर्वेष्वृतुषुधर्मेषु पक्षात्पक्षात् व्रजेद्बुधः ॥ (सु. चि. २४।११४) तस्मात्पुनः समय बिरुद्ध तन्त्रदोषाभ्यां हतास्तीति।

अत्रोच्यते--हेमन्ते वाजीकरणविधिर्नव्यर्थः। "अति व्यवाय शीलो न च वाजीकृतो नरः। ध्वजभङ्ग मवाप्नोति सशुक्रक्षय हेतुकम् ॥ (सु. चि. २६।११-१२) तेन पाक्षिकस्यापि परिहारार्थं न व्यर्थो वाजीकरणोपदेशः। तथा वृद्धसुश्रुतः--"स्त्रीः श्लिष्टाऽगुरु धूपाढ्याः पीनोरुजघनस्तनीः। प्रकामं च निषेवेत मैथुनं तर्पितो नृपः॥ (सु. उ. ६४। ६-२७)। तर्पितत्वं देहौचित्याद्वाजीकरण योगैरेव। न त्वनेनायुक्तवतो मैथुन निषेधात्। भोजोऽपि--" परिष्वज्य स्त्रियं मूढीं स्वप्यात्समदमन्मथः।" इति। समद मन्मथत्वं च वाजीकरणमन्तरेण न घटत इति। तेन युक्तियुक्तं मुनिवचनानुसारि चाचार्यवचः। अस्तुवा हिमे वाजीकृता च तृप्त इति वाक्यार्थद्वयम्। न च समुच्चय वाचिना चकारादि शब्देनावश्यं भवितव्यमित्यस्ति किंचित्प्रमाणम्। नापि घर्मव्यतिरेकेण व्यवायस्य सर्वत्र त्र्यहान्तरित्व विधिविरोध वाक्यतात्पर्य पर्यालोचनया विरोधस्य परिहारत्वात्। त्रिविधोऽहि व्यवायः सुरतसुखं, लौल्या, सन्तानोद्देशयात्रायै चेति। तत्र त्रिभिस्त्रिभिरित्येतद्वाक्ये उपष्ठम्भ प्रकरण स्थत्वात्। एवं यात्राभिर्वाहविधिपर एव न स्यात्। उपष्ठम्भो हि नाम देह निर्वाहः। तेनोचितमेवोक्तं आचार्येण त्र्यहादिति। किं च प्रावृषि व्यवाये त्र्यहान्तं विधित्वा पक्षान्तर एव यै लक्षीकार्यः तस्यैव बलदायकत्वेनोपष्ठम्भरूप प्रधानोपकारकत्वेन प्रधानाङ्गत्वात्। त्र्यहान्तस्थ तु बलहानिकरतया न प्रधानाङ्गत्वम्। तेन यथेच्छया

वा क्रियते इति स्वरे भुक्तप्राप्तस्योच्छिष्टस्य बोधेन तुल्यो ज्योतिष्टोमाख्य प्रधानाङ्गतया जुष्टमुपायांशत्वमेव वक्तव्यमभूत्। तथैव प्रावृषि घर्मर्तुष्वप्रयुक्तं त्र्यहान्तरबाधेन प्रधान पक्षान्तर स्वीकार एव न्यायः। तदुक्तं भगवता जैमिनिना--"गुणमुख्य व्यतिक्रमे तदर्थत्वान्मुख्ये न वेदस्संयोगः" (मीमांससूत्र ३-३-२-९) इति। तद्व्याख्यायां भट्टपादैरप्यभ्यधायि-"गुणैस्स्वरूपतो धर्मः प्रधानद्वारतोपरः। यत्रस्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनम्॥ (तन्त्रवार्तिकम्) इति। नापि त्र्यहात्पक्षादित्युच्यमाने एकमेव व्यवायेचरितार्थत्वात्। त्रिभिरिति सुश्रुतोक्त वीप्सार्थस्यालाभ इति वक्तुं युक्तम्। अनावृतस्य त्र्यहपदस्य द्वाभ्यां वसन्तशरदाभ्यां सम्बन्धायोग्यत्वेनावृत्तिरर्थलभ्यत्वात्। तथा च त्र्यहपदवृत्तौ कथं वीप्सालाभः। एवं पक्षभेदेऽपि विज्ञेयं। तेन सर्वेष्वृतुष्वित्यत्र सर्वशब्दः शरद्वसन्तयोरेव पर्यवस्यति। घर्मेत्विति तु शब्दस्तूपशब्दार्थे निपातानामनेकार्थत्वादतो घर्मेऽपि पक्षाद्यथा प्रावृषीत्यर्थः। इति दिङ्मात्रमुपदिष्टम्। विस्तरस्तु वाग्भट टीकायां द्रष्टव्यः॥

इति वाग्भट मण्डने चतुर्दशं (नवमं) प्रकरणम्।

(दशमं प्रकरणम्)

विदूषकतया **विद्याधरो** विगतत्रपः "आहार शयनेत्यत्र" भूयः प्रत्यवतिष्ठते। अथ यत् **चरकाचार्यै**रुपदिष्टं यथा--"त्रय उपस्तम्भाः आहारस्वप्नो ब्रह्मचर्यमिति"। (च. सू. ११।३५) तत्स्पर्धया **वाग्भटेना**प्यभाणि-- "आहारशयनाब्रह्मचर्यैर्युक्तया नियोजितैः। शरीरं धार्यते नित्यमागारमिव धारणैः॥ (अ. हृ. सू. ७।५२), तत्राहारोऽन्नपानं च। तत्र पानमधिकृत्योक्तं-'जीवनं तर्पणं हृद्यं ह्लादि बुद्धि प्रबोधनम्। तन्वव्यक्त रसं मृष्टं शीत लघ्वमृतोपमम्॥ गङ्गाम्बु नभसो भ्रष्टं" इत्यादि। (अ. हृ. सू. ५।१-२) तन्वव्यक्त रसं मृष्टमिति परस्परं व्याहतम्, अव्यक्त रसं चेत्कथं मृष्टम्। मृष्टंमधुर-मुच्यते। मधुरं चेत्कथं अव्यक्त रसमिति। पानीयस्य स्वाभाविको मधुररस इति चेत् स किं पानीयं व्यक्तेवाप्यव्यक्तेपि पानीय दोष एव। यदुक्तं **सुश्रुताचार्येण**--"व्यक्तरसता रसदोष इति। (सु. सू. ४५।११) अव्यक्ते वा तर्हि कथं मृष्टपदरक्षणे·········अव्यक्त-मधुररसमितरेमितरे च व्याक्रियताम्। इष्यते चाऽव्यक्तरसत्वं पानीये मुनिभिः। तथा हि **सुश्रुताचार्यः**--"निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचिशीतलम्। अच्छंलघु च हृद्यं च तोयं गुणवदुच्यते (सु. सू. ४५।२०) अथाऽन्यदप्युक्तं--" येनाभिवृष्टममलं शाल्यन्नं राजते स्थितम्। अक्लिन्नमविवर्णं च तत्पेयं गाङ्गम् अन्यथा। सामुद्रं तन्नपातव्यं मासादाश्वयुजाद्विना॥ (अ. हृ. सू. ५।२-३) तत्रा-स्मिन् वाक्ये गाङ्गसामुद्रयो परीक्षालक्षण विधिर्निषेधो उक्तः। तत्र गाङ्गसामुद्र ज्ञानेसति सामुद्रनिषेधमाह-"तन्नपातव्यमासादाश्वयुजा द्विना" इति। अस्यार्थः, आश्विनं मासं परित्यज्य अपरकार्तिकादि-मासेषु तत्सामुद्रमुदकं न पातव्यम्। आश्वयुजे पुनः पातव्यम्। एत-च्चासत्। आश्वयुजो हि पानेनाधिकृतः किं तर्हि ग्रहणे सामुद्रमपि आश्वयुजे गृहीतं सर्वदा पेयम्। यदाह **सुश्रुतः**—"सामुद्रमप्याश्वयुजे मासिगृहीतं गाङ्गवद्भवति।" (सु. सू. ४५।७) तथा मदान्धेनाप्य न्यदप्युक्तम्--"नाम्बुपेयमशक्तया वा स्वल्प मल्पाग्नि गुल्मिभिः। पाण्डूदरातिसारोर्शो ग्रहणी शोष शोथिभि॥ ऋते शरन्निदाघाभ्यां पिबेत्स्वस्थोऽपि चाल्पशः॥ (अ. हृ. सू. ५।१३-१४) इति। अत्र

शरन्निदाघं च वर्जयित्वापरकाले स्वस्थोऽपि अल्पमल्पमुदकं पिबेदिति। शरन्निदाघयोस्तु स्वेच्छया पिबेदिति स्वस्थं प्रत्युपदेशः। एतच्च विचार्यमाणं दूरं प्रयातुमीहते। स्वस्थस्य शरदि स्वल्पमुदकपानमुपदिश्यते मुनिभिः न स्वेच्छया। यदाह **सुश्रुतः**--"वर्षासु न पिबेत्तोयं पिबेच्छरदि मात्रया। वर्षासु चतुरोमासान् मात्रावदुदकं पिबेत्। उष्णं हिमे वसन्ते च कामं ग्रीष्मे च शीतलम्॥ (सु. चि. २४।१०३-४) तत्र हि वर्षासु न पिबेत्तोयं इत्यस्य भाष्यं स्वयमेवाचार्यः कृतवान्। "वर्षासु चतुरोमासानिति"। तस्माच्छरदि स्वेच्छयानुपानोपदेशोऽयमदूर इति स्वस्थभयमावहति। तच्चाप्यन्यदप्युक्तं--"वर्षासु दिव्यनादेये परं तोये वरावरे। (अ. हृ. सू. ५।२०) अस्यार्थः, वर्षासु परं केवलं दिव्यनादेये तोये यथासंख्यं वरावरे दिव्यमुदकं वरं नादेयं निन्द्यम्। तत्र दिव्यमुदकं यत्तत्परं वर्षासु वरम्। नादेयं यत्तावदतीव विरुद्धम्। यतो दिव्योदकस्य सर्वदा श्रेष्ठत्वात्। यदाह **चरकः**--"आन्तरीक्षमुदकानाम्" (श्रेष्ठम्) (च. सू. २५।३८)। प्रकृत्यैव सर्वदा सर्वेषां हिततमाभवतीत्यर्थः। तथा च **सुश्रुतः**--"तत् सर्वकालमुपयुञ्जीत तस्यालाभे भौमम्। (सु. सू. ४५।७)। तस्माद्वर्षास्वेव दिव्योदकस्य यद्वरत्वाभिधानं तत् बालप्रलपितमेव।

अत्रोच्यते—वर्षास्वेवेति नियमाभावात् कथं अनिष्ठापादनं शङ्क्यत इति चेत् नियमप्रतिपादकस्य परशब्दस्य विद्यमानत्वात्। अथ पर शब्दस्य वरावरत्वे न सम्बन्धादन्यार्थत्वपरं प्रकर्षाप्रकर्शप्राप्तम्। वरमवरेति चेत् नैवम्। तदा वर्षासुप्रकृष्टं वरत्वं नान्यदित्यायातं बलात्कारेणावरत्वमन्यथा दिव्यौदकस्य। अन्यच्च, तदा नादेय जलेनसह दिव्यौदकस्य का मैत्री। नादेयं हिमवर्षास्वेवात्यन्तमवरम्। नान्यथा अपरकालस्य सर्वैरादृतत्वात्। यदाह **सुश्रुतः**—"शरदि सर्वं प्रसन्नत्वात्।" (सु. सू. ४५।८) तस्मादत्यन्त तृषिताभ्यां व्याहतविरुद्धतन्त्रदोषपथिकाभ्यां वाग्भट तोयवर्गः पीयैत इति।

अप्यत्रोच्यते—जीवनेत्यत्र मृष्टत्वाव्यक्तरसत्वयोर्नविरोधः। मृष्टं हि नाम शुद्धं दोषानुपहतं मृजं शुद्धावित्यस्य शुद्धयर्थस्य निष्ठान्तस्येद रूपम्। तेनमृष्टं शुचिद्रव्यमित्यर्थः। तथा च **सुश्रुताचार्यः**—"निर्गन्धमव्यक्त रसं तृष्णाघ्नं शुचि शीतलम्। अच्छं लघु च हृद्यं च तोयं गुणवदुच्यते॥ (सु.सू. ४५।२०) इति। नापि येनाभिवृष्टमित्यत्राश्वयुजस्य एवाधिकृतत्वात् तस्मिन् सामुद्रव्य पानीयमेवोपपन्नः सामुद्रस्य आश्वयुजे

एव पेयत्वात् । सामुद्रमप्याश्वयुजे गृहीतं गाङ्गवद्भवतीत्यत्र हि ग्रहणे स्वीकारः पानमभिप्रेतं न तु सङ्ग्रहणम् । यतोगाङ्गस्यपथ्यत्वात् । तत आश्वयुज एव ग्रहणार्हत्वात् । तथा हि वर्षाविहायत्वं तावन्नगाङ्ग गृहीतुं युक्तम् अनार्तत्वात् । दिव्यमप्यनार्तवं न ग्राह्यमिति वचनात् । वर्षार्तावपि अगस्त्योदयात्पूर्वं निषेधः । तथा वर्षाप्रकरणे काश्यपः—"बलाहकाद्यास्समदा कीटालूताश्च खेचराः । तद्विषोत्सर्ग संसर्गादग्राह्यं तत्तदाजलम् ॥"[1] ग्राह्यमित्यत्र—"काले तु धौतवस्त्र शिलादिभिः । दिवा सूर्यांशु संतप्तं निशि चन्द्रांशु शीतलम् ॥ कालेन पक्वं निर्दोषं अगस्त्येनाविषीकृतम् । (च. सू. ६।४६) इति । अतएव वर्षास्वन्तरिक्षमौद्भिदं वा सेवेतेत्येव । वर्षा शब्देन वर्षान्ते आश्विनो गृह्यत इति व्याख्यानयन्ति सर्वे जेज्जटाचार्य प्रभृतयः टीकाकाराः । भाद्रपदादौ प्रागश्विना गृहीत गाङ्गं शृतशीतं वा समुद्रजलं पेयमिति चोपदिशान्ति । तथा च—"जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात् । नभस्तपतितं चैव देशकालावपेक्षते ॥ (च. सू. २७।१९६) इति चरकवाक्यस्यान्ते जेज्जटाचार्य ग्रन्थः—"कालो वर्षा तथा आश्वयुज एव ग्राह्यत्वात् एवाह सामुद्रमप्याश्वयुजे इति । सामुद्रमप्याश्वयुजे गृहीतं गाङ्गवद्भवति गुणवद्भवति । किमुवाच्यं आश्वयुजे गृहीत गाङ्गमेवेति भावः ।" सुश्रुताचार्यस्तु साक्षादाश्वयुज एव गाङ्गस्य ग्रहणमुक्तम् । पानं तु सार्वकालिकम् । तद्यथा सामुद्रमप्याश्वयुजे गृहीतं गाङ्गवद्भवति । गाङ्गं पुनः प्रधानं तदुपपाददीत आश्वयुजेमासि । शुचि शुक्लविततपटैकदेशच्युतमथवा हर्म्यतलपरिभ्रष्टमन्यैर्वा शुचिभिर्भाजनै गृहीतं सौवर्णे राजतेमृन्मये वा पात्रे निदध्यात् । तत् सर्वकालमुपयुञ्जीत तस्यालाभे भौमम् । (सु. सू. ४५।७) इति । तत्रहि प्रधान भूतस्य गाङ्गस्यैवाश्वयुजे गृहीतस्य सुरक्षितस्य सार्वकालिकः पानाद्युपयोगः प्रतीयते । न तु सामुद्रस्य नापि वर्षास्वान्तरिक्षमिति वचनाद्भाद्रपदादौ गाङ्गग्रहण प्राप्तिनिषेधस्योक्तत्वात् । तेन गाङ्गमाश्वयुजे एव ग्राह्यं पेयं च सर्वदेति स्थितम् । अथ यदि सामुद्रमपि तथैव स्यात्तदा तस्य परीक्षणं कुर्वीत । तत्र शाल्योदन पिण्डमुत्क्व-

---

1. This verse is not found in the extant Kāśyapa Samhita but is quoted by Dalhana (Nibandha sangraha vyakhya, Susruta sūtrasthāna 45/8) without mentioning its source.

थितमविदग्धं रजतभाजनोपहितं दैवेवर्षति कुर्वीत। स यदि मुहूर्तस्थितस्याद्‌भृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यम्। वर्णान्यथात्वेपि प्रक्लेदे च सामुद्रमिति विद्यादिति तयोर्लक्षण निरूपणं सौश्रुतं व्यर्थमेव स्यात्। तेन सामुद्रस्याश्वयुज एव तत्पानं सार्वकालिकमिति मुनिवचन तात्पर्यं गम्यते। अतएव गङ्गालाभे भौमंग्राह्यमिति उक्तवान् सुश्रुतः न तु सामुद्रम्। तेनोपपन्नमेव येनाभिवृष्टिमित्याचार्य वाग्भट वचः। नापि च शरन्निदाघाभ्यामित्यत्र शरदिमात्र विधायक सुश्रुत वचो विरोधः। तथा हि—"वर्षासु न पिबेत्तोयं पिबेत् शरदि मात्रया। वर्षासु चतुरोमासान् मात्रावदुदकं पिबेत्॥ (सु. चि. २४।१०३) इत्यनेनैवं संसाध्यते न शरदा। अन्यथा शरदि सर्वमिति स्वस्थवृत्ताध्यायवाक्यापार्थक्यापातात्। न ह्यत्र दिव्य व्यतिरिक्तानां जलानां प्रतिप्रसवः सर्वपदेन क्रियते। शरदि सर्वं प्रसन्नत्वादिति जलवर्ग एव तस्य कृतत्वात् तेन पदमात्रं पानं निषिद्धं जलस्य। तस्यैव प्रतिप्रसवः सर्वपदेन क्रियते। एवं सति मात्रावदुदकं पिबेत् उष्णं हिमं वसन्ते चेत्यत्राकांक्षितमात्रासमर्पकत्वेनापेक्षितार्थ समर्पणमपकृतं स्यादिति। नापि वर्षासु, दिव्य नादेयेत्यत्र वर्षास्वेव वरत्वोक्तिरन्यत्र दिव्यस्यावरत्व युक्तंस्यात्तदा दिव्योदकस्य सार्वकालिकवरत्व प्रतिपादक मुनिवचो विरोधस्स्यादिति। तथा हि न ह्यत्र वर्षासु दिव्यस्य वरत्वमात्रं प्रतिपाद्यते येनान्यत्रार्थादवरत्वमुक्तं स्यात्। किं तु प्रकर्षवाचि पर शब्दाभिनिहितगुणमहत्वयुतं वरत्वम्। तदुक्तं सुश्रुतेन—"वर्षास्वान्तरिक्षं औद्भिदं वा सेवेत, महागुणत्वात्" (सु. सू. ४५।८) इति। अतश्च वर्षासु दिव्यस्य वरिष्ठतमत्वम्। अन्यत्र तु वरिष्ठत्वमात्रमर्थादापद्यते। तदा न कश्चिद्विरोधः। वर्षेनादेयस्य वरावरत्वं चरकाचार्येणोक्तम्—'वर्षे नादेयमित्यपथ्यतमत्वं नेति। न चान्तरिक्षमुदकानामिति पथ्यत्वेन प्रकृष्टतमेष्विति चरकविरोधः। सुश्रुतानुसारेण वर्षास्वन्तरिक्षवषयत्वेनाविरोध इति सर्वमनवद्यम्। विस्तरस्तु वाग्भट टीकायां द्रष्टव्यः नेह ग्रन्थविस्तर भयाल्लिखितः। भवति चात्र

विरुद्ध······धारस्स्तोयवर्गं विलोडितुम्।
संरब्धस्सहसा हासं सूरीणामधिगच्छति॥

इति वाग्भटमण्डने (दशमं) प्रकरणम्।

(एकादशं प्रकरणम्)

अथ विपाकस्वरूप निरूपणे वाग्भटीये **विद्याधरः** प्रत्यवतिष्ठते यथा—"जाठरेणाग्निना योगाद्यदुदेति रसान्तरम् । रसानां परिणामान्ते स विपाक इति स्मृतः ।। (अ. हृ. सू. ९।२०) अत्र हि रसाख्यो विपाकोऽभिधीयते । विपाकस्य क्रियारूपत्वात् । तथा च **चरक** वचनं-"आहाराख्ये विपाकार्थे जाठरानल योगतः । यदुदेत्यौष्णसापेक्षान्निष्ठाकाले क्रियान्तरम् ।। तण्डुलेष्विवविक्लित्तिः स विपाकः उदाहृतः ।।[1] निष्ठाकाले परिणामकाले । तेन रसरूपविपाक कथनं मुनिमत विरुद्धम् । न च क्रियायां गुणसम्भवात् मधुरपाकः कटुपाकः गुरुपाको लघुपाक इत्येतेषामेव प्रयोगाः कथंस्युरिति वक्तव्यं उपचारात् । तथा हि यस्य द्रव्यस्य पाके मधुररसकार्यं वातशाम्यादिकमुत्पद्यते तत्रपाको मधुरः । यदाह **सुश्रुताचार्यः**—"द्रव्येषु पच्यमानेषु येष्वम्बु पृथवीगुणाः । निवर्तन्तेधिकास्तत्र पाकोमधुर उच्यते ।। तेजोऽनिलाकाशगुणा पच्यमानेषु येषु तु । निवर्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते ।। (सु. सू. ४०।११-१२) तेन क्रियायामौपचारिको मधुरादि व्यवहारः इति । तस्मान्मुनिमतविरोधादप्रमाणिकं वाग्भट वचनमिति । किं च यदि रसरूपपाकःस्यात् तदा "रसै रसौ तुल्यफलः" इति पुनरुक्तंस्यात् यथा—"तद्द्रव्यमात्मना किंचित् किंचिद्वीर्येण सेवितम् । किंचिद्रसविपाकाभ्यां दोषान् हन्तिकरोति वा ।। (सु. सू. ४०।१४), पिप्पली द्रव्यप्रभावात् वातं हन्ति (?) इत्येवमादिषु स्थानेषु रसविपाकादीनां पृथक् फल श्रवणात् रसरूपताविपाकः मुनिमतविरुद्ध एव ।

अत्रोच्यते—रसरूप एव पाकः न च आहाराश्रयः इति न मुनिमतविरोधः । क्रियापदस्यैव गुणे उपचारात् । अन्यथा पाकमाधुर्यादिप्रतिपादक बहुवचन विरोधापातात् । न तु क्रियापदंमधुरादिपदयोः मिथो विरोध परिहारायावश्यमेवात्रोपचारिकत्वे वक्तव्ये मधुरपद एवोपचारोऽस्तु । अन्यथा रस रूपत्वे विपाकस्य रसादिभ्यः पृथक् फल श्रवण नैष्फल्यापातात् इति चेत्, तन्न, क्रियापदस्यैवोपचारि-

1. This verse is not found in the extant editions Nirnayasagar and Chowkhambha) of Carakasamhita.

कत्वे बहूनां मधुरादिपदानां मुख्यार्थ लाभोऽन्यथा बहूनां मुख्यार्थ बाधागौरवात्। किं च यदुक्तं त्वया "यस्य द्रव्यस्य पाको मधुरकार्यं वातशान्त्यादिकमुत्पद्यते स पाको मधुरः इति तदसत्। नियतस्य संग्राहकाभावात् वातशान्तिरूपं कार्यमेवास्त्वीति चेत् तन्न, मधुरा मधुराःपाके ग्राहिणो रूक्षशीतलाः। मकुष्टकाः प्रशस्यन्ते रक्तपित्त ज्वरादिषु॥ (च. सू. २७।२७) इत्यादि वाक्यात् मधुरकार्येण पाकेमधुरोपचारः। तथा "मधुरश्चाम्ल पाकश्च व्रीहिः पित्तकरो गुरुः।" (च. सू. २७।१५) इत्यादिषु अम्लोपचार इत्यनियतिरेव। "मधुरा मधुराः पाके त्रिदोष शमनी शिवाः। लघवो बद्धविण्मूत्राः शीता श्चैणाः प्रकीर्तिताः॥ (च. सू. २७।७७) "शल्यको मधुराम्लस्तु विपाकेकटुकस्मृतः। वातपित्तकफघ्नश्च श्वासकासहरस्तथा॥ (च. सू. २७।७१) इत्यादिषु विरोधएव। कटुपाकता नाम त्वन्मते कटुरसकार्यं वातजनकत्वमेव। तथा च वातजनको वातहा चेति विरुध्यते। न च वस्तु विकल्पने न विरुद्ध स्वभावतया वस्तुहानि प्रसङ्गः। नन्विदं भवन्मतेऽपि तुल्यमिति चेत् अस्मन्मते विरोधिनो विपाककार्यस्य रसादिकार्यवत् बलवता प्रभावेन बाधितत्वात् स्वभावद्वैविध्य प्रसङ्गात्। रसादीनां प्रभावबाध्यत्वं नाम कार्यप्रतीघातः। न तु स्वरूपेण। त्वन्मते च कार्यरूप एव विपाकः। न च कार्यस्य कार्यान्तरमस्ति। यत्प्रभावेन विरुद्धं वस्तु स्वभावात् द्वैविध्यभङ्गाय कल्पेते। तथा "गोधाविपाके मधुरा कषायाकटुका रसे। वातपित्तप्रशमनो बृंहणी बलवर्धिनी॥" (च. सू. २७।७०) इत्यादि पुनरुक्तता। रसरूपत्वे च विपाकस्य द्रव्येषु पच्यमानेष्वित्यादि गुणरूपविपाकपरं सुश्रुतादि वाक्यैरप्यविरोधंस्यादिति। किं च यन्निमित्तं विद्याधरस्य वाग्भटाचार्यं दूषणविकृतिः तेषां सुश्रुतनिबन्धकृतामपि जेज्जटप्रभृतीना बलमस्माकम्। अन्यान्यपि प्रकरणे वाग्भट विद्वेषिणां ताण्युपन्यस्य आपातरमणीयतां नीयन्ताम्।

तत्र तावत् 'जाठरेणाग्निना' इत्यत्र जेज्जटः—"एषा हि दोषसंबन्धास्तिस्रोवर्गास्सर्वस्याहारस्य, द्रव्य विशेषतारहितस्य कुतो विशेषः। न पुनरत्र निष्ठापाकार्थं तत्र पक्वाहाराद्योऽसौ मधुर एव। रसः रस धातुः स्नेहात् तर्पणादि विशेषैः सौम्य एव गण्यते। न तु पाक द्वैविध्य घटनाच्चैवम्। पाको हि क्रिया, सा च गुरुलघुद्वारेण कार्येणानुमीयमानापि द्वितयोच्यते, गुरुकार्यकारकरणान्मधुरः लघुकार्यकरणात्कटुः। "आतपः कटुको रूक्षः छायामधुर शीतला।

ज्योत्स्ना कषायमधुरा तमः कटुक शीतलम् ॥" इतिवदुपचारात् । तत्रेदमुच्यताम् । कार्यान्यथानुपपत्त्या कारणेकल्पे क्लुप्त शक्तितया क्रियया न चानुगम्यः पाकव्यभिचारात् क्षीरवदिति । इदं कटुककषायकं वातकरत्वात् वेणु यवादिवत् । अनुमानद्वय-प्रयोगः तच्च न साधकं व्यभिचारात् । तथा हि "यद्यद्वातहरं तत्तन्मधुरपाक मिति न व्याप्तिः। अतस्यादौ वातहृत्त्वेपि कटु त्रिपाकित्वात् । यदुक्तं सुश्रुते—"उष्णाऽतसीस्वादुरसाऽनिलघ्नी पित्तोल्बणास्यात् कटुका विपाके । (सु. सू. ४६।४६) इति । नापि कटुकत्व वातकरत्वयोर्व्याप्तिः । वातलेष्वाविकदध्यादौ कटुपाकि-त्वाभावात् । तदुक्तं तत्रैव "रसे पाके च मधुरमत्यभिष्यन्दि दोष-लम् । कोपनं कफवातानां दुर्नाम्नां चाविकंदधि ॥" (सु. सू. ४५।७१) इति। अपि प्रत्यक्षः पाकः अनुभवात् पाकविप्रतिपत्तेरभाव प्रसंगाच्च। न हि प्रत्यक्षे वस्तुनि वादिनो विवदन्ते। तेनागमैकसमधिगम्य पाके सत्यात्रेयागम प्रामाण्यादुचितमेव त्रैविध्यं पाकस्य । तथा चात्रेयः—"मधुरस्सृष्टविण्मूत्रो विपाक कफशुक्रलः । पित्तकृत्स्सृष्ट-विण्मूत्रः पाकोऽम्लः शुक्रनाशनः । शुक्रहृद्बद्धविण्मूत्रो वातलः कथितः कटुः ॥" (च.सू. २६।६१–६२) न च सुश्रुतविरोधः लाघवगौरवाभि-प्रायेण द्वैविध्योपपत्तौ सुश्रुतवाक्यस्याम्ल पाक प्रतिषेधपरत्वाभावात्। अत एवाहसुश्रुतः—"मधुराख्यो गुरुः कटुकाख्यो लघुरिति ।" (सु. सू. ४०।१०)। चरकोप्येतदेवाह—"तेषां गुरुःस्यान्मधुरः कटुकाम्ला-वतोऽन्यथा ।" (च. सू. २६।६२) अयमभिसन्धिः। इह तावत् सुश्रुतचरकयोर्विरोधेनाम्लविपाकस्य सिद्धरूपत्वात् । तेनावश्यम तुल्यबलयोरस्ति च लाघवगौरवपरमतया विरोधः । तदुक्तं भट्टपादैः— "अविरोधास्समावेशे लक्ष्यमाने प्रमाणयोः । बाधो न युज्यते कर्तुं नच दूरात्फल श्रुतिः ।" (तन्त्रवार्तिकम्) गयदासाचार्यस्तु सुश्रुता चार्यमतानुसारिणि विपाके षोढापि प्रतिपत्तीर्निरूप्य मधुरकटुक रूपतयैव द्विविधंपाकं सुश्रुताचार्याभिप्रेतं मन्वानः स्वाभिप्रायानु-रूपमेव द्रव्येष्विति वचनस्यार्थं समर्थितवान् तथा हि "दृष्टा षष्टिक शाल्यद्या······· पाकाश्च ·····तद्रसां । यान्ति नान्यत्वमित्येके पाकंप्रतिरसं विदुः । बहवो हि भवत्यल्पान् बर्हिर्मिश्रीकृतान् रसान् । तेनानियतमेवैके पाकमाहुर्मनीषिणः । कफ वातकफान् स्वादुरम्लः पित्तं कफोद्भवः । दोषाश्रयोऽनिलात्पित्ताद्वातपित्तात्कटुर्मतः । दोषाश्रयप्राभावेण तद्भावस्यानुषङ्गनात् ॥ रसे स्वाश्रयपाकात्तु

स्वाद्वम्लकटुकास्त्रयः। वस्तुतो द्विविधः पाको मधुरः कटुरेव च॥ गुर्वाद्यैर्यज्जगद्द्वेधा रसो भूतगुणैश्च यत्॥" तत्र भूतगुण विवरणम् "येतेषु पञ्चभूतेषु तेजसः पाकसंविधौ। प्राधान्यं पावका वह्निस्तोय-भूम्यो रसास्थितः॥ यदा तदा विरेकंस्याद्भूतयोर्भूजलाख्ययोः। पाकस्यान्ते गुणस्स्वादुरग्नेरग्निगुणः कटुः॥ नभोनिमित्तहेतुस्तु सर्वेषां पाककारिणाम्। प्रधानगुणमन्वेति योगवाहि तथानिलः॥" इति। तेन भूजले एव रसाधार भूते। ते च स्वादुरस एव। तेजश्च पावकं तच्च कटुरसमेवेति। भूतगुणानुसारात् द्विविध एव पाकः इति। इदं च श्रद्धा जडशिष्य तोषणाय व्याख्या प्रक्रियामात्रमाचार्यगयदासस्य। तथा हि यदि भूतगुण बाहुल्यात् द्विविधो विपाको उच्यते तदा रसेष्वपि षड्रसभङ्ग प्रसङ्गस्स्यात् हेतुसाम्यात्। तथा च सुश्रुता-चार्यः—"स खल्वाप्यो रसः, शेषभूतसंसर्गात् विदग्धः षोढा विभ-ज्यते" इति (सु. सू. ४२।३) अभिप्रेत्योक्तवान्। "तत्र तेषु पृथ्व्यम्बु-गुण बाहुल्यान्मधुरः भूम्यग्निगुण बाहुल्यादम्लः, तोयाग्निगुण बाहुल्या-ल्लवणः, वाय्वग्नि गुण बाहुल्यात्कटु, वाय्वाकाश गुण बाहुल्यात्तिक्तः, पृथ्व्यनिलगुण बाहुल्यात्कषायः" इति (सु. सू. ४२।३) न च पाके तेजसः पाधान्यमनुरसस्य इति वक्तुं युज्यते। रसो हि विदग्धः षोढा विभज्यते। न च तेजसाप्यापादमन्तरेण विदग्धत्वं घटते। किं चैवं-सत्येकमेव भूतगुणबाहुल्यं विपाकस्य द्वैविध्याय। रसस्य तु अपहाया-चार्येणोच्यत इति सुश्रुताचार्यवचसामेव मिथो विरोधः आपद्यते। यदा च मधुर कटुकावेव पाकावाचार्योऽभिप्रैषत् तदा तौ गुरुलघुतया न व्याकरिष्यात् पृथ्व्यापश्च गुर्व्यः शेषाणि च लघूनि इत्यपि नावशिष्येत्। इत्यलमुपजीव्यैरति कलहेन।

अथ सुखग्रहणाय विपाकप्रकरणस्य परमतोपन्यासादनन्तरं सुश्रुत-ग्रन्थः कियन्तोऽपि व्याक्रियन्ते। परमतदूषणमुपसंहरति तस्माद-सिद्धान्त एवेति। एषामेक विधः पाकः कस्तर्हिसिद्धान्त इत्यत्र आह। आगमे द्विविध एव पाको मधुरः कटुकश्चेति। आगम शब्दः सिद्धा-न्तवाचीति गयदासादयः। चिकित्सासिद्धान्तेऽपि "चिकित्सितं द्विविधं बृंहण लङ्घन भेदेन, तदुपयोगिता च द्वावेव, मधुरकटुपदे यत्परत्वे······स्पष्टयति। तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति। तेन बृंहणोपयोगितया मधुरपदोदितो गुरुर्ज्ञेयः। लङ्घनोपयोगितया च कटुपदोदितो लघुरिति। किं बहुधा विप्रतिपत्तेत्यर्थः। अयमेवार्थो भूतानुसारितया युक्तः इत्याह पृथ्व्यप्तेजोवाय्वाकाशानां द्वैविध्यं

भवतीति। भवतु द्वैविध्यम्, प्रस्तुतो किमायातमित्यत आह। गुरु-साधर्म्याद्गुरुतालधुता चेति। गुणौ सौम्याग्नेयौ तदेव भूतविभागेन स्पष्टयति पृथिव्यापश्च गुर्व्यः शेषाणिलघुरिति। फलितमाह तस्माद्विविधपाकः इति उक्तमेवार्थग्रहणाय श्लोक द्वयेनाह "द्रव्येषुपच्यमानेष्विति" अम्बुपृथवी गुणाः स्निग्धादयः मधुरो गुरुः, तेजोऽनिलाकाश गुणाः रूक्षादयः कटुर्लघुरित्यर्थः। (सु. सू. ४०।११-१२) तेन बृंहणलङ्घनोपयोगित्वाभिप्रायेण पाकद्वैविध्यमिष्टं सुश्रुतस्य। अतएव मधुरकटुपदे परित्यजत्। तत्र गुरुलघुपदाभ्यामेव सुश्रुतस्य पाकव्यवहारः। यथा "मधुरं रक्तपित्तघ्नं गुरुपाके कफावहम्। वात पित्त प्रशमनं सुशीतं माहिषं घृतम्॥ (सु. सू. ४५।९९) आजं घृतं दीपनीयं चक्षुष्यं बलवर्धनम्। कासेश्वासेक्षये चापि पथ्यं पाके च तल्लघु॥" (सु. सू. ४५।९८)। न च गुर्वादीनामम्लादिभिर्विरोधः। त्रिविधपाक वादिनश्चरकाचार्यस्याप्येवमभिप्रायं। द्वैविध्यम विरुद्धमेव। अतएव तेनाप्युक्तं--"तेषां गुरुस्स्यान्मधुरः कटुकाम्लवतोऽन्यथा।" इति (च. सू. २६।६२) अतो बृंहणाद्युपयोगिद्वैविध्यं सर्वानुमतम्। दोष प्रकोपशमनाभिप्रायाणि च प्रतिरसापादीनि मतान्तराणि इति सर्वमनवद्यम्। भवति चात्र--

द्राक्सारमेय इव दूषयितुं प्रवृत्तः
श्रीवाग्भटस्य रसपाक विधिं त्रिभेदम्।
तत्पण्डितैर्ध्रुवमखण्ड्यत मानखण्डैः
विद्याधरस्य स च दूषणधीविपाकः॥

इति वाग्भटमण्डने अष्टमं (एकादशं) प्रकरणम्।

(द्वादशं प्रकरणम्)

अथ दोषसंचयाद्यधिकृत्यप्रवृत्तस्य **वाग्भट** वाक्यस्य दूषणाय **पुनर्विद्याधरः** प्रत्यवतिष्ठते । यथा हि—"उष्णेनयुक्ता रूक्षाद्या वायोः कुर्वन्ति संचयं । शीतेनकोपमुष्णेनशमं स्निग्धादयोगुणाः ।। शीतेन-युक्तास्तीक्ष्णाद्याश्चयं पित्तस्य कुर्वते । उष्णेन कोपं, मन्दाद्याश्शमं शीतोपसंहिताः ।। शीतेनयुक्ताः स्निग्धाद्याः कुर्वते श्लेष्मणश्चयम् । उष्णेन कोपं, तेनैव गुणा रूक्षादयः शमम् ।। (अ. हृ. सू. १२।१६-२१) चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु । वर्षादिषु च पित्तस्य, श्लेष्मणः शिशिरादिषु ।। चीयते लघु रूक्षाभिरोषधीभिः समीरणः । तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति ।। अद्भिरम्लविपाकाभि रोषधीभिश्च तादृशम् । पित्तं यान्ति चयंकोपं न तु कालस्य शैत्यतः ।। चीयते स्निग्धशीताभि रुदकौषधिभिः कफः । तुल्येऽपि कालेदेहे च स्कन्नत्वान्न प्रकुप्यति ।। इतिकाल स्वभावोऽयमाहारादिवशात्पुनः । चयादीन् यान्ति सद्योऽपि दोषाः कालेऽपि वा न तु ।। (अ. हृ. सू. १२।२४–२८) अत्र रूक्षाद्याः गुणाः उष्णगुणेनयुक्ताः वायोः संचयं-कुर्वन्ति, शीतेनगुणेन रूक्षाद्याः वायोः कोपं जनयन्ति, उष्णेनयुक्ता-स्निग्धाद्या वायुं शमयन्ति । तत्र निराश्रयणां गुणानां संचयादि-कार्यासामर्थ्यात् द्रव्याश्रितैरेवगुणैस्संचयाद्याः कार्याः ।। तत्रैषां रूक्षा-दयोगुणाः वायोः संचयं कुर्वन्तीति उपदिष्टो वाग्भट पाठकः औष-धीनां गुणाः वायोस्संचयं कुर्वन्तीति । न च वाच्यं ततश्च रूक्षलघ्वा-दिगुणयुक्ता ओषध्यो वायोः संचयं कुर्वन्तीत्ययमर्थः परिणतो भविष्य तीति । ततश्च पौनरुक्ति वज्रापातः यतोऽयमर्थो वक्तव्य एवाभिहितः "चीयते लघुरूक्षाभिरौषधीभि" रित्यादि वाक्यैः । अन्यच्च,··· उष्णेन युक्ता रूक्षद्याः वायोः संचयं कुर्वन्तीति, अत्रोष्णगुणो वायो-स्संचय हेतुर्भवति, येनोच्यते उष्णेनयुक्ता रूक्षाद्याः इति । वायुर्हि शीतः तद्विरोधीचोष्णगुणः । अतः प्रशम हेतुः । यदुक्तं **धन्वन्तरिणा**—"सूर्यतापोपशोषित देहानां देहिनां रौक्ष्याल्लघुत्वाच्च वायोस्संचय-मापा दयति ।" (सु. सू. ६।११) ननु यदुष्णगुणो वायोस्संचयहेतु-र्भवति तदा निदाघे संचय एव न प्राप्नोति निदाघकालस्स्यौष्ण्यादिति चेन्न, कालस्यौष्णेन वायोश्शीतगुण एव प्रतिरुध्यते । ननु वायोः प्रधानगुणौ रूक्षलघू, कथं पुनर्वायोः शैत्यस्य प्राधान्यं, रौक्षादीनां

तु न प्रधानमिति चेत् उच्यते, कटुरसेन वातस्यप्रकोपात् मधुर रसेन प्रशमादवशीर्यते। यदि वातस्यगुणेषु प्राधान्यं स्यात्तदा कटुकेनवोम्लेन वातस्य प्रशम एव स्यात् न तु कोपः। तथा यद्यपि वातगुणेषु रौक्ष्यशैत्येतु तुल्येस्यातां। तथा कटुकेन रसेनाम्ल रौक्षेण वायोर्नप्रशमो नापि प्रकोपः स्यात्। प्रकोपश्च दृश्यते। तथा मधुरेणस्निग्धशीतेन वातस्य रूक्षशीतस्य प्रशमादवसीयते। वातगुणेषु शीतं न प्रधानं रूक्षं प्रधानमिति। अतएव **भगवता धन्वन्तरिणाभाणि**--"रौक्ष्याल्लघुत्वाच्च वायोस्संचयमापादयन्ति" इति (सु. सू. ६।११) अत्र हि रूक्षलाघवे प्रधानत्वेन निर्दिष्टे। तस्मादुष्णेनयुक्ताद्याः वाग्भट वचो बालालापितमिव सदा सहृदयानामुपहसनीयपदवीमवगाहते।

अत्रोच्यते--उष्णेनयुक्ता रूक्षाद्या इत्यत्रोष्णस्य न साक्षाद्वातसंचयहेतुत्वं मतमाचार्यस्य। किंतु वात प्रकोपे शैत्यस्य सहकृतानामेव रौक्षादीनां हेतुत्वमिति तावत् स्थितिः। तत्र सहकारिणः शैत्यस्योष्णेन प्रतिबन्धात् रूक्षाद्याः वायोस्संचय मेव कुर्वन्ति। न पुनः प्रकोपाख्यां द्वितीयां गतिं कर्तुं क्षमन्ते। सहकारि बिरहितेन ये रूक्षाद्याः गुणाः निष्प्रतिबद्धशक्तयो वातस्य प्रकोपहेतवः। त एवौष्ण्य सहिताः प्रतिबद्धसामग्रीकतया संचयमात्रे पर्यवस्यन्तीति तात्पर्यमस्यवाक्यस्य। मतान्तरम्--"चीयते लघु रूक्षाभिरौषधीभिस्समीरणः। तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति॥" (अ. हृ. सू. १२।२५) इत्यादि उपपादितरीत्या पित्तप्रकोप प्रतिबन्धकतैवोष्ण्य शीतादि गुणानां स्पष्टीकृतत्वात्। तदुक्तं **जैमिनिना**--॥ "विषये प्रायदर्शनादिति" अत एवैतदाशंकनिवृत्त्यर्थत्वात्।

"चीयते" इत्यादि वाक्यानां न पौनरुक्तिदोषः सहकारि विरहात्। कार्यकारणत्व भावे **सुश्रुताचार्य** संवादोऽपि "ये रसा वातशमना भवन्ति यदि तेषु वै। रौक्ष्यलाघव शैत्यानि न ते हन्युस्समीरणम्॥ (सु. सू. ४०।६) रौक्ष्यलाघवाभ्यां च वातप्रधानगुणाभ्यां सहपठितस्य शैत्यस्य प्रागपवादादेव प्राधान्यमिति। तद्विरहे संचयमात्रे पर्यवसानं रौक्षादीना युक्तमिति। अत्रहास्यादेतत् एवं यदि शैत्यस्य रौक्षदिवत् वात गुणेषु प्राधान्यं स्यात् न त्वेतदस्ति। उष्णेनापि कटुरसेन वातस्य प्रकोपात् शीतेनापि मधुररसेन प्रशमादिति चेत्, न, विकल्पासहत्वात्। तथा हि--कटु रसेनाम्लेनेत्यत्र किं कर्मधारयाश्रयेण कटुरसएवाभिप्रेतः। अन्यपदार्थाश्रयणेन वा कटुरसं द्रव्यम्।

नाद्यः, गुणानां निर्गुणत्वेन तत्रौष्ण्याद्यसंभवात् । कटुरुष्णो मधुरश्शीतः इत्यादि प्रयोगाणां चौपचारिकत्वात् । तथा च चरकाचार्यः– गुणागुणाश्रयानोक्तास्तस्माद्रस गुणान् भिषक् । विद्याद्द्रव्यगुणान्···॥" (च. सू. २६।३६) इति । न च गुण व्यतिरेकेण शीतोष्णाद्याः वीर्यरूपाः अन्येधर्मास्संभवन्ति । "विशत्ययौ बलीयांसावसंख्येय गुणेषु तु । तावाद्वृद्धौ गुणौ वीर्यमष्ठावन्ये बलीयसः ॥" (?) आचार्य सुश्रुतोऽपि––"वीर्यसंज्ञा गुणा येऽष्ठौ तेऽपि द्रव्याश्रया स्मृताः । (सु. सू. ४०।१७) तस्मात् रसपरत्वे कटुरसपदस्य वातगुणेषु शैत्यस्य प्राधान्य भङ्गः ।

नापि द्वितीयः नियमाभावात् । न हि यत्कटु, रसं द्रव्यं तदुष्णं वातकोपनमिति नियतिरस्ति पिप्पल्यादावेव व्यभिचारात् । मधुरं च शीतवीर्यं वातंशमयति नास्ति क्षौद्रकौसुम्भशाकेक्षुरसादिषुव्यभिचारात् । किं च ये रसा वातशमना भवन्ति यदि तेषु वै । रौक्ष्यलाघव शैत्यानि न ते हन्युस्समीरणम् ॥ (सु. सू. ४०।६) इति सौश्रुत वाक्यस्य कण्ठ तोऽर्थः । तत श्चायमर्थस्संपद्यते । तत्र कण्ठतो यथा ये स्वाद्वम्ललवण रसाः वातशमनाः रौक्ष्य लाघवशैत्यान्विताः ते न वातं हन्युरिति । अर्थाच्चयो कटुतिक्तकषाया स्ते स्निग्धादियुता न वातप्रकोपशमना इति । तथा वातगुणेषु शैत्य प्राधान्यभङ्गाय यदुक्तं कटुरसेनोष्णेन वातस्य प्रकोपात् मधुर रसेन च शीतेन प्रशमादिति तदागमविरुद्धम् । किं च स्निग्धगुरुप्रायौषधी हिमे वायुप्रकोपं शैत्यमेव केवलं हेतुरभिधीयते चरकादिभिः ।

अत्रोच्यते । वायुः शीतश्शीतकाले प्रकुप्यतीति तेनापि शैत्य मेवप्रधानमिति । यदि चोष्णं सहकृताभ्यां रौक्षलाघवाभ्यां वातसंचयः इत्याचायाभिप्रेतं न स्यात्तदा सूर्यप्रतापोपतप्तदेहानामित्यनर्थकमेव स्यात् । तस्मात् वाग्भट वैराय गयदासस्स्वं विहितमपि तत्फलितमिति । यदा च रौक्षलाघवाभ्यां शैत्यविरहिताभ्यां वायोस्संचयमात्रमापद्यते, शैत्यसहिताभ्यां तु कोपमिति व्यवस्थितं तदा शीतेनकोपमिति सुघटमेव । अतएव ग्रीष्मे भगवता धन्वन्तरिणा वायोस्संचयहेतुतया रौक्ष्यलाघवे स्वामित्वर्थके प्रकोपाय वायुर्नपेक्षत इति । न स वर्षासुभवन्तमन्तरेण विचक्षणाः के व्याचक्षते । तस्मादुष्णेन युक्ता इति समंजसम् । शरदि च प्रशाम्यति स वायुः शरच्च दक्षिणायनत्वेन सौम्यकालतया शीत स्वभावा । यश्च तत्र पित्तप्रकोपः स काल-

स्स्वाभाव्येनैव मध्यरात्र इव शैत्योऽपि संपद्यत इति तदसत्। शरदुष्णतायाः प्रत्यक्षत्वात् अपराह्णवायोग्यत्वात्। यदाह **चरकाचार्यः**–"वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः। तप्तानां संचितं पित्तं प्रायः शरदि कुप्यति"॥ (च. सू. ६।४१) शरत्स्वरूपणे सुश्रुतोऽपि–"बभ्रुरुष्णः शरद्यर्कः श्वेताभ्रविमलं नभः। (सु. सू. ६।३५) शरन्निरूपण प्रस्तावे पुराणेषु–" आवापुस्तापमत्यर्थं शफर्यः पल्वलोदके। तथा सोऽभवद्दुस्सहावीरश्शारदीव दिवाकरः॥

यच्च त्वयोक्तं–"तदुष्णैरुष्णकाले च घनान्ते च विशेषतः। मध्याह्ने चार्धरात्रे च जीर्यत्यन्ने च कुप्यति॥ (सु. सू. २१।२२) इति पित्त प्रकोप निरूपकमार्षवचनम्। तत्र यदि शरदुष्णतास्यात्तदोष्ण कालेन शरत्कालस्य गृहीतत्वात् मेघान्तग्रहणं व्यर्थमेवस्यात् तेन शरच्छीततान्द्योत्यते। तन्न, उष्णकाल शब्दस्य निदाघपरत्वात्, अन्यथा वसन्तस्यापि शीतत्वप्रसङ्गात्। न च प्रत्यक्षागम सिद्धस्यौष्ण्यस्य बाधकमन्तरेणाऽन्यथात्वं न युक्तम्। औष्णप्रतीतिश्च प्रावृषि शीताभिहतानां शरदि सहसार्क रश्मिभि प्रकाशनिमित्तम्। यच्च–"शीतेनयुक्तास्तीक्ष्णाद्याश्चयं पित्तस्य कुर्वते। उष्णेन कोपं···॥" (अ. हृ. सू. १२।२०) इत्यत्र दूषणमधायि, यथा–न हि शीतगुणः संचयहेतुः किं तु प्रशमः न च शीतादिगुणस्वभावो वर्षाकालस्य महर्षिभिरुक्तः पित्तसंचय हेतुः। किं तर्हि उदकौषधीषु कालेनाहितो विदाह एव। यदुक्तं **सुश्रुताचार्येण**–"तत्र वर्षास्वौषधयस्तरुण्यः अल्पवीर्या आपश्चाप्रशान्ताः क्षितिमलप्रायाः, ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवात विष्टम्भिताग्नीनां विदह्यन्ते, विदाहात् पित्तसंचयमापादयन्ति।" (सु. सू. ६।११)। तस्मादज्ञान विलसितं यत्पित्तसंचयप्रति कालस्वभावं परिहृत्यान्यहेतूपन्यासः। तथा शीतेन गुणेनयुक्तास्त - क्ष्णाद्याः पित्तप्रकोपं कुर्वन्ति। न च शरदुष्णस्वभावेनेति सप्रपञ्चोऽयमर्थो दर्शितः प्रागेव। न चौषधि पानीयेषु शरत्काले न तीक्ष्णाद्यागुणाः आधीयन्ते। तत्र ओषधयः आपश्चकालपक्वा मृदुस्निग्धमधुरादि गुणयुक्ता भवन्ति। ततुक्तं **भगवता भोगीश्वरेण**– "वर्षाशरद्धेमन्तेषु दक्षिणाभिमुखेऽर्के कालमार्ग मेघवातवर्षाभिहतप्रतापे, शशिनि चाव्याहतबले, माहेन्द्र सलिल प्रशान्तसन्तापे जगति, अरूक्षा रसाः प्रवर्धन्तेऽम्ललवणमधुरा यथाक्रमं तत्र बलमुपचीयते नृणामिति।" (च. सू. ६।७) तथा "दिवासूर्यांशु सन्तप्तं निशि चन्द्रांशु शीतलम्।

कालेनपक्वनिर्दोषमगस्त्येनाविषीकृतम् ॥ हंसोदकमिति ख्यातं शारदं विमलं शुचि। स्नानपानावगाहेषु हितमम्बु यथाऽमृतम् ॥ (च. सू. ६।४६–४७) तस्मात् शरत्काले वाग्भटोद्भावितहेतुर्नसहृदयान्यावर्जयतीति।

तथा कफकोपंप्रति चोक्तं--"उष्णेन कोपमिति," उष्णगुणयुक्ता स्निग्धाद्यागुणाः कफकोपं कुर्वन्ति, न चोष्णगुणः कफप्रकोपक हेतुः केनापि स्वीक्रियते तथा च **सुश्रुतः**--"दिवास्वप्न व्ययामालस्यमधुराम्ल लवण शीतस्निग्धेत्यादि (सु. सू. २१।२३) ॥ "स शीतैः शीतकाले वसन्ते च विशेषतः। पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति।" (सु. सू. २१।२४) अतः कफप्रकोप गुणः अत्र शीतगुण एवपठितोनोम्लः, उष्णेन हि शमएव क्रियते। तथा च वसन्ते न पानीयैषधीषुगुणा नोत्पद्यन्ते। कुतः कफकोपहेतुतामालिङ्गति। वसन्तो हि रूक्ष तस्माद्यदाकालं प्रति हेतूपन्यासः क्रियते तदा प्रत्युत वसन्ते प्रशम एव प्राप्नोति वसन्तेऽम्लरूक्षत्वात्। तथा च **चरकाचार्यः**--"आदानं पुनराग्नेयम्·····" तत्र रविर्भाभिराददानो जगतस्स्नेहं वायवस्तीव्ररूक्षाश्चोपशोषयन्तः शिशिरवसन्तग्रीष्मेषु यथाक्रमं रौक्ष्यमुत्पादयन्त रूक्षान् रसांस्तिक्तकषायकटुकांश्चाभिवर्धयन्तो नृणां दौर्बल्यमावहति ॥ (च. सू. ६।५–६) कफप्रकोपश्च दृश्यते तस्मात् कालस्वभाव एव कफप्रकोपहेतुर्नान्ये स्निग्धादयो हेतवः। ते हि स्वप्रधाना कफकोपहेतवो वसन्तश्च प्रधान एव। न तं प्रति कफकोपेऽन्यो हेतुरन्वेष्यत इति।

तथा हि अक्षिनिमीलनेन रजनीं विधाय पौनरुक्तयमागमयन् अन्यदपि अवादीत्। "चय प्रकोपप्रशमा वायो ग्रीष्मादिषु त्रिषु" (अ. हृ. सू. १२।२४) अत्र त्रिष्विति समयविरुद्धम् यथा हि ग्रीष्मेवायुश्चीयते प्रावृषि वर्षासु च कुपित एवानुवर्तते शरदि च प्रशमः। तत्र यदि ग्रीष्मादिषु त्रिष्विति तदा ग्रीष्मेसंचितो वायुः प्रावृषिप्रकुप्य वर्षासु च शाम्यति। स च वर्षासु प्रशमनः। यदाह **सुश्रुतः** "प्रक्लिन्नत्वाच्छरीराणां वर्षासु भिषजा खलु। मन्देऽग्नौ कोपमायान्ति सर्वेषान्मारुता दयः॥ (सु. उ. ६४।६)। **चरकाचार्योऽपि**--"वर्षा स्वग्निबले हीने कुप्यन्ति पवनादयः।" (च.सू. ६।३४) **सुश्रुताचार्यः**–"······वातिकानां शरदि स्वभावत एव प्रशमः।" (सु. सू. ६।१३) तस्मात् ग्रीष्मादिष्वनुपपन्नम्। तथा च श्लेष्मणः **शिशिरादिषु**,

शिशिरवसन्त ग्रीष्मेषु कफस्य चयादयो भवन्ति। तदप्यसमञ्जसम्। यतो दोषसंचयं प्रकोपनिमित्तम्। शिशिरादि क्रमोमाहृतोमहर्षिभिः। तथा च सुश्रुताचार्यः—"इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षडृतवो भवन्ति दोषोपचयप्रकोपोपशम निमित्तम्। ते तु भाद्रपदा द्येनद्विमासिकेन व्याख्याताः (सु. सू. ६।१०) तस्मादायुर्वेदोपदेश बाह्योऽज्ञ एवास्पृश्य एव वाग्भट पाठकः।

तथा "चीयते लघुरूक्षाभिः" (अ. हृ. सू. १२।२५) इत्यादि वाक्येषु कालस्यौष्ण्यान्नकुप्यति ग्रीष्मेवायुः स्तथा वर्षासु संचितमेव पित्तं भवति न तु कुप्यति शैत्यात् तथा हेमन्ते कफश्चीयत एव स्कन्नत्वान्नकुप्यतीति चयकाले कोपंप्रतिहेतूपन्यासो न विमर्शभानुतापं सहेत्। तथा हि ग्रीष्मे यदुष्णो गुणो वातं निवारयते तत्किं कालकृतं कोपं निवारयेदुतान्यहेतुकृतम्, न तावदाद्यः, न हि ग्रीष्मकालो वात प्रकोप हेतुर्महर्षिभि पठ्यन्ते। किं तर्हि प्रावृट्काल एव। तस्मात्कालकृतो ग्रीष्मवातप्रकोप एव नास्ति। किं उष्णोगुणो निवारयिष्यति। नापि द्वितीयः, बलवद्विग्रहादिकृतश्च ग्रीष्मे वातप्रकोपो महर्षिभिरङ्गीक्रियते। न च ग्रीष्मस्यौष्णगुणो निवारयितुं शक्तोऽस्तीतीति। एवं पित्तप्रकोपंप्रति विकल्पद्वयं वाच्यम्। तस्मादौष्ण्यादि हेतूपन्यासोऽसमञ्जसतम इति।

अथ यथाक्रमं समाधीयते। उष्णप्रतिबद्ध सामग्रिकतया रौक्षादीनां वातसंचयकर्तृत्वमिव शीत प्रतिबद्धसामग्रीकतया तीक्ष्णादीनां पित्तादिसंचयं क······इत्यस्यापि उपपत्तेः। किं च यदुक्तं तस्माद ज्ञानविलसितं वाग्भटस्य यत्पित्तसंचयंप्रति काल स्वभावं परिहृत्यान्यहेतूपन्यासः तदिदं स्ववचन विरुद्धमेव। तथा हि स्वयंवादाववादि, न चापि तीक्ष्णदि गुणस्वभावो वर्षाकालस्य महर्षिभिरुक्तः संचयहेतुः। किं तर्हि उदकौषधीषु कालेनाहितो विदाह एवेति। यदि काल एव हेतुस्स्यात्तदा प्रत्युत वातादिसंचये रूक्षदि हेतूपन्यासो न स्यादाचार्याणाम्। तथोष्ण गुणयुक्तानां तीक्ष्णादीनां अप्रतिबद्धसामग्रीकतया पित्तकोपत्वं युक्तमेव शरदि। शरदश्चौष्ण्यत्वमनन्तरमुक्तं, किं च वर्षाशरद्धेमन्तेषु यथा क्रमादम्ललवणमधुरा रसाः न अभिवर्धन्त इति स्थिते कथमभिधीयते भवता शरद्योषधीषु मधुरगुण एवाधीयत इति। न लवणश्च तीक्ष्णः स्वप्रविज्ञा विसंवाद्येव वचनवर्षेत्यादि चरकाचार्यवचनमुपन्यस्यन्नपि न लज्जसे। तथोष्णस्य वसन्तेकफ-

कोपकत्वं शिशिरेस्त्यानीकृतस्य श्लेष्मणस्तिग्मकिरणविलापेन न घटत एव। एतच्चात्र स्पष्टयिष्यते। तथा चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिष्वित्यपि पित्तसमयविरोधः। प्रावृड्वर्षाख्यस्यर्तुद्वयस्य मुनीनामभिप्रेतत्वात्। अतएव सुश्रुतर्तुचर्यायां गयदासादिभिर्व्याख्यातम्—"प्रावृडिति प्रथमः वृष्टिकालः तस्यानुबन्धो वर्षा इति" किं च "चय प्रकोपप्रशमाः पित्तादीनां यथाक्रमम्। भवत्येकैकशषट्सु कालेष्वभ्रागमादिषु॥" (च. सू. १७।११४) इति चरकाचार्यवचोमूलमेव वाग्भट वचः। कथमिवाक्षिप्यतेऽविचक्षणेन। अत्र च निदाघे यथाक्रमं कफवातयो प्रशमसंचयावुच्येते इत्यत्रावश्यं मन्तव्यम्। अन्यथा निदाघेषु वातसंचयनिरूपकवाक्यस्य सह विरोधापातात्। तेन न संचयविरोधः। न चौष्ण्यं निदाघे कालकृतंवातकोपं निवारयत्यकृतान्यजमिति कल्पोऽपि दूषकः। यतो द्विविधो दोषाणां संचयादि क्रमो नियतोऽनियतश्च, तत्राद्यः आवर्तनः, अनियतस्तु सर्वरोगनिदानाध्यायोक्तः। तत्रार्तवस्यौषधक्रमा यथा ग्रीष्म जनितेनौषधीषु रौक्ष्यलाघवादिन्यायः प्राप्नोति वातस्य प्रकोपस्तमुपहन्ति। रूक्षलाघवादीनां प्रकोपसामग्री विघटनेन तत्कालकृतमौष्ण्यं वर्षासुत्वलब्धकाल कृते शैत्यसहायकतया वातप्रकोपैर्वातस्य प्रकोपः क्रियते। शरदि तु लब्धकालकृतौष्ण्य सहायैर्वातशमनैर्वायुश्शाम्यति। न तु ग्रीष्म कृतो वातप्रकोपः औष्ण्येनावार्यते किं तु तत्कृत रौक्ष्यादिजन्यः तत्कृतेनौष्ण्येन। स च तुल्यकक्षतयाभि (नि) वारएवाप्यस्तु। कालकृत रौक्ष्यादिकं परित्यज्येनैवाहारविहारादि वातप्रकोपो भवति। नासौ कालकृतेनौष्ण्येन निवारयितुं शक्यत इति। एवमेव पित्तादिसंचयादिष्वपि ज्ञेयम्। अयमेव तु प्राचार्याणामभिप्रायो लक्ष्यते। यदाह सुश्रुतः—"ता एवौषधयः इत्युपक्रम्य तासु निदाघाद्यहितरौक्ष्य लाघवशैत्यरहितैः वातसंचयमापादयन्ति इत्युक्तम् (सु. सू. ६।११)। वर्षासु तु लब्धशैत्यसहाय्यादेव वायोः प्रकोपहेतुतयोक्तम्। यदाह—"संचयः प्रावृषी इत्युपक्रम्य शीतवातवर्षैरितो वातिकान् व्याधीन् जनयन्तीति।" (सु. सू. ६।११)। अस्य च ग्रीष्मवर्षा प्रतिपादकवाक्यद्वयस्य नायमर्था प्रतीयते। यथा यो निदाघे सूर्यप्रतापोपशोषितदेहेषु देहिष्वलब्ध संज्ञत्वसहाभ्यां रौक्ष्यलाघवाभ्यामापादितो वातस्य संचयं प्रावृष्यत्यर्थं जलोपक्लिन्नदेहेषु देहिषु शीतवातवर्षैरितो वातप्रकोपमापादयति। तेनोष्ण युक्तयो रूक्षलाघवगुणयोर्वातसंचय हेतुत्वं शैत्य युक्तयोस्तु प्रकोपहेतुरिति न किंचिदुपपन्नम्। किं च चीयतेलघु-

रूक्षाभिरौषधीभिरित्याद्या प्रयुक्तयो वातादिसंचयादिप्रयुक्तास्ताः सुश्रुतादि संवादिन्य एव। तत्र वातसंचयप्रकोपाय सुश्रुतः—"तत्र वर्षास्वौषधयस्तरुण्योऽल्पवीर्या आपश्चेत्युपक्रम्य शीतवातविष्टम्भितान्नीनां विदह्यन्ते, विदाहात् पित्त संचयमापादयन्ति; स संचयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरण प्रविलायितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात् परिणतवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रशान्ताः स्निग्धा अत्यर्थं गुर्व्यश्च ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषार पवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्मसंचयमापादयन्ति, स संचयो वसन्तेऽर्करश्मिप्रविलायित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति"। (सु. सू. ६।११), इति। अस्य च तात्पर्यं आचार्यगयदासादिरप्युक्तम्। अविदग्धा मधुरपाकमुपगता उपलेपित्वात् पैच्छिल्यात् यतः पिच्छिलमेवोपलेपयति। अर्ककिरणप्रविलायित स्त्यानघृतमिव विलायि अनति विरलत्वादर्कस्य वसन्ते कफविलयनमात्रं साधयति। न तूपशोषणाख्यं प्रशममिति। शिशिरे तु श्लेष्मणः स्त्यानतयैव हिमानीवद्भवति स्त्यानस्य न विकारारम्भकस्संपद्यत इति जेज्जटाचार्यः। ऋतुनिरूपणं तु वाग्भट टीकायामृतुचर्याध्याये निरूपितमिति नेह विस्तार्यते। इति

अथ संचयादि लक्षण दूषणाय विद्याधरः प्रत्यवतिष्ठते। यथा—संचयादीनां लक्षण वाक्यमिति पुष्करपुष्प लक्षणमाकलयति यथा—"चयोवृद्धिः स्व धाम्नैव" (अ. हृ. सू. १२।२२) अत्र व्यवच्छेद्यभाववत्स्व-धाम्नैवेति व्यर्थ विषयता। न हि परस्थानेऽपि दोषसंचयस्संभाव्यते। प्रसृतो हि दोषोऽन्यस्थाने प्रयाति। स्वरूप कथनमात्रमेवेति चेत्तदा नियमपरेणैवकारेण किं नियम्येत। तथा वृद्धिश्चयइत्युक्तं। ये हेतुकृतापि वृद्धिश्चयःस्यात्तुनेष्यते। काल विशेषकृतैव वृद्धिश्चयो महर्षिणामभिप्रेतः यथा च कालकृतैव वृद्धिश्चयो नान्यहेतुकृता। तयोत्तरत्र सविस्तरं दर्शयिष्यामः। तस्मादपि व्यापकमप्येतल्लक्षणम्। तथा कोपस्तून्मार्ग गामित्येत्यादि कोपलक्षणम्। एतच्च लक्षणं कोपेनैव। कोपमपहाय प्रसरस्सुहृदा मालिङ्गति। उन्मर्गगामित्वं हि प्रसर लक्षणं। तदुक्तं सुश्रुताचार्य चरणैः—"अत ऊर्ध्वं प्रसरं वक्ष्यामः, तेषामेभिरातङ्क विशेषैः प्रकुपितानां किण्वोदकपिष्ट समवाय इवोद्रिक्ताना प्रसरो भवति। तेषांवायुर्गति मत्वात् प्रसरणहेतुः सत्यप्यचैतन्ये। स हि रजो भूयिष्ठः रजश्चप्रवर्तकं सर्वभावानाम्। यथा महानुदक-

संचयोऽतिवृद्धः सेतुमवदार्यापरेणोदकेन व्यामिश्रः सर्वतः प्रधावति, एवं दोषाः कदाचिदेकशो द्विशो समस्ताःशोणितसहिता वाऽनेकधा प्रसरन्ति” इत्यादि प्रसरोऽभिहितः। (सु. सू. २१।२८) अयं तृतीयः कालः तथा अस्वास्थ्यसंभव इत्यनेन लक्षणभागेन स्थानसंश्रय एव लक्ष्यते न तु कोपः। तदुक्तं सुश्रुताचार्यैरेव—“अत ऊर्ध्वं स्थान संश्रयं वक्ष्यामः। एवं प्रकुपितातांस्तास् शरीर प्रदेशानागम्य तांस्तान् व्याधीन् जनयन्ति। ते यदोदरसन्निवेशं कुर्वन्ति तदा गुल्मविद्रध्यु दराग्निसङ्गानाहविसूचिकातिसार प्रभृतीञ्जनयन्ति इत्यादि तत्र पूर्वरूपगतेषु चतुर्थः क्रिया कालः (सु. सू. २१।३३)। तस्मात्स्वरूपा-सिद्धि विलासिनी विलास लक्षणरूपा लक्ष्यते। अत्र कोप शब्देन प्रकोपः प्रसरस्थाने स यदि पञ्चविधगतिरुच्यते। तासां च सामान्य-लक्षण मेतदितिचेत् तन्न, सामान्य न्याय भौमस्य व्यापकत्वात्तच्चै-तल्लक्षणं प्रकोपव्यक्तिभेदे च त्रिविधांगतिं स्पृशति। तस्मात् व्याप्ति लक्षितकोप विलासो विलोक्यते। तथा “स्वस्थानस्थस्य समते”त्यादि समलक्षणम्। एष लक्षणकामुकोप्यव्याप्ति कूटनिकटाक्ष क्षोभितोऽभि-लक्ष्यते। यतः प्रसरादिषु गतयरस्थानगतस्यैव समताक्रियते। चय-प्रकोपयोस्तु स्वस्थानस्थस्य। तथा महर्षीणां हृदयं अनवगम्यते नान्य-दप्यभाणि।…“आहारादि वशात्पुनः। चयादीन् यान्ति सद्योऽपि दोषाकालेऽपि वा न तु॥” (अ. हृ. सू. १२।२८) आहारादिवशेन पुनस्तल्लक्षणादेव चयप्रकोपप्रशमान् यान्ति, चयान् कालेऽपि वा नतु यान्ति। एतच्च गोपालकोऽपि न ब्रूते, यतः कालं विहाय बलवद्वि-ग्रहादिना यत्रदोषवृद्धिस्तत्र प्रकोपलक्षणैव वृद्धिः। न च लक्षणा यद्येवं न स्यात्तदा संचयप्रकोप वृद्धिलक्षणादि गतिस्त्वभिन्नैव चयादि शब्द वाच्या न भवति। यदाभाणि भगवता भोगीश्वरेण—“क्षय स्थानं च वृद्धिश्च दोषाणां त्रिविधागतिः। ऊर्ध्वंचाधश्च तिर्यक् च विज्ञेयास्त्रि-विधाऽपरा॥ त्रिविधा चापरा कोष्ठशाखमर्मास्थि सन्धिषु। इत्युक्ता विधि भेदेन दोषाणां त्रिविधागतिः॥ (च. सू. १७।११२–११३) चयप्रकोपप्रशमाः पित्तादीनां यथा क्रमम्। भवत्येकैकशः षट्सुकालेष्व-भ्रागमादिषु। गतिःकालकृता चैषा चयाद्या पुनरुच्यते। (च. सू. १७।११४) तस्मात् कालं विहाय आहारादि लक्षणम्। अतएव द्विविध दोषलक्षणमपि महर्षीणा जन्मसाफल्यमनुभवति। तस्मादु-न्मत्तप्रलापपदमवगाहते वाग्भट वचः। भवति चात्र—“क्षय स्थानं

च वृद्धिश्च दोषाणां त्रिविधा गतिः । प्रोक्ता महर्षिभिश्चित्र्रं वाग्भटेऽवृद्धिरेव यत् ॥"

अत्रोच्यते—पर धाम्न्यपि या वृद्धिस्तस्यापि च यत्वप्रसक्तिवारणाय स्वधाम्नैवेति विशेषणम् । न चास्ति नियमः यच्च कारणं स्वस्थान एव च यमारभते न परस्थान इति । अतएव चरकः—"कामाभावाद्धि पित्तेन कोष्ठशाखाश्रया भवेत् ।" (?) इति । व्याख्यातं चैतद्भट्टार-हरिश्चन्द्रेण—"कोष्ठशाखासमुचिते पित्तेनेति । न चैवं विशेषतो वृद्धि चय उच्यमानं आहाराद्यन्यहेतुकृतायां वृद्धौ अतिव्याप्तिः । तस्या अपि पक्षत्वात् । यथा चैतोत्तरत्र विस्तारयिष्यते" । तेन न कश्चिल्लक्षणदोषः । न च कोपलक्षणं प्रसरेति व्यापक प्रसरादीनां कोपभेदत्वात् । न च कोपस्य सामान्यलक्षणं तद्भेदेषु प्रसरादिषु प्रसरादिव्यापकतया दूषयितं शक्यते । न तु यदि प्रसरादयोपि प्रकोपभेदाःस्युः तदा तेष्विव प्रकोपोऽपि रोगसंभवेन तत्प्रतिपादकवाक्येषु भवितव्यमिति चेत्सत्यमुचितमेवाह भवान् । यल्लक्ष्यैक्यस्य लक्षणैक्यं प्रयोजकमिति । अस्ति च तत् । तथा च भगवद्धन्वन्तरिः—तेषां (दोषाणां) प्रकोपात्कोष्टतोदसंचरणाम्लिकापिपासापरिदाहान्नविद्वेष हृदयोत्क्लेशाश्च जायन्ते । तत्र द्वितीयः क्रियाकालः । (सु. सू. २१।२७) व्याख्यातंचैतत् जैज्जटाचार्यैः—कोष्ठकण्ठहृदयानि क्रमेणागतैर्दोषैरेते विकाराः जन्यन्ते इति । न च स्वस्थान स्यैरेवदोषैरेव । दोषैरन्यस्थान कोष्ठतोदादि विकारजन्म तत्स्थानागमनं विना (न) घटते । प्राप्यकारित्वाद्दोषाणाम् । तथा च कोपेन कथमुन्मार्गगामिता न वा रोगसंभव इति । तथा प्रसर प्रकोपणेऽपि । "अत ऊर्ध्वं प्रसरं व्याख्यास्यामः । तेषामेभिरातङ्क विशेषै प्रकुपितानामिति ।" (सु. सू. २१।२८) आतङ्कोरोगः एभिः कोष्ठतोदपिपासादिभि प्रकोप दशायां रोगैरुपलक्षितानामित्यर्थः । प्रसरनिरूपणान्ते अपि "एवं प्रकुपितानां प्रसरतां चेत्यभिधाय वायोर्विमार्गगमनमाटोपा, ओषप्लोष (चोष) परिदाह धूमायनानि पित्तस्य, अरोचकाविपाकाङ्गसादाश्छर्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति, तत्र तृतीयः क्रियाकालः ।" (सु. सू. २१।३२) अत्र गयदासाचार्य व्याख्या- "एवं प्रकुपितानामित्यत्र प्रसरतामित्येव कर्तव्ये यत्प्रकुपितानामित्युक्तवान् तत्प्रकोप विशेष एव प्रसरं इति ज्ञापनायेति ।" तथा गयदासादीनां च सुश्रुतग्रन्थ लाक्षणिकातमेव प्रकोपविशेषमेव प्रसरं

योगिनो संयोगसंख्याया दर्शयन्नाह कृत्स्नार्थ इति। तथा च प्रकोपप्रशमाः पित्तादीनामित्यत्र चयकोपावेव निरूप्येते, नापरे। नोन्मार्गगामित्वं कोप। स एव व्याधिपूर्वरूपाभिव्यञ्जकतया व्यक्ताख्यः, स एव धान्वावरणे व्रणादिरूपतया भेद उच्यत इति। अतएव सुश्रुताचार्यः-प्रावृषि कुपितोवायुर्वातिकान व्याधीन् जनयति, शरदिपित्तं वसन्ते कफः इति। तस्मात्प्रसरादयः कोपस्यैव भेदाः। अतस्तल्लक्षणस्य नातिव्याप्तिदोष इति। यदि च प्रसरादयो न कोप भेदास्तर्हि चयकोपयोरिव तेष्वपि पार्थक्येन वचः कथ्येरन् यदा चोन्मार्गगमित्वं कोपः तदा स्थानान्तरगतस्य यः प्रशमस्सदोषस्यशक्ति प्रतिबन्ध एवोपचारः। कस्तदास्ववचः उन्मार्गगतस्य कोपलक्षणस्य तदवस्थास्यात्?। तेन स्वस्थानस्थस्यसमतेत्वेव शमलक्षणम्। द्वेधा हि दोष विकृतिः चयप्रकोपभेदात्, तत्र चयव्यवच्छेदाय यत्सम्मतमिदं आहारादि परिणामवशात स्वस्थानस्थस्य साम्येऽप्यत्र चयपूर्वक प्रकोपन्यायेनोन्मार्गोन्मुखता वारणाय विकारासंभवपदमित्यनवद्यम्। ततश्च प्रसरादिषु परस्थानगतस्यैव समता क्रियते। चयप्रकोपस्तु स्वस्थानस्येति यदाभाणि भवता तन्मुनिवचनपौर्वापर्य·····विश्रुरधियस्तव वचनं निर्मूलतयाऽवहेलनीयमेव धीरधियाम्। किं च कालंविहाय बलवद्विग्रहादीना यत्र दोष वृद्धिस्तत्र प्रकोप लक्षणैव वृद्धिर्नचयलक्षणेति तवैव विस्मृतिः ललनावल्लभशिशोर्भवति। तद्विकालमात्रकृता दोषनाशश्चयप्रकोपप्रशमाः किंत्वौषध्यादि कृता?। एतद्विस्तरणरूपैव ह्याचार्यसुश्रुतादीनामृतुचर्या। तद्यथा—"तत्र वर्षास्वेषधयस्तरुण्योऽल्पवीर्या आपश्चाप्रशान्ता क्षितिमलप्रायाता उपयुज्यमाना नभसिमेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनाशीतवातविष्टम्भिताग्नीनां विदह्यन्ते, विदाहात् पित्तसंचयमापादयन्ति; स संचयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरण प्रविलायितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात् परिणितवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रशान्ताः स्निग्धा अत्यर्थं गुर्व्यश्च। ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छेत्याद्गौरवादुपलेपाच्च श्लेष्मसंचयमापादयन्ति, स संचयो वसन्तेऽर्करश्मि प्रविलायित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति। (सु. सू. ६।११) इत्यादि। यदि कालकृतैव वृद्धिश्चयो नान्यहेतुकृता महर्षिणामता स्यात्तदा "चयंगतामूर्धनि मारुतादयः" इति प्रतिश्यायनिदाने (सु.

उ. २४।४), उदरनिदाने "सञ्चीयते तत्र मलस्सदोषः" (सु. नि. ७।१७) "विरुद्ध दुष्टाम्लविदाहि पित्तप्रकोपि पानान्नभुजो विदग्धम्। पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ।। (मा. नि. ५१।१), इति अम्लपित्तनिदानादौ······दोषवृद्धि आहारादि कृतैव संचयशब्देनोच्यते न च सा कालकृता उदरादिरोगाणामति प्रसंगात्। न च दोषाणां संचय एव कालो नियतं न तु प्रकोपप्रशमयोरिति तत्कल्पनामात्रमन्तरेण कापि युक्तिः कल्पते। न च चयवृद्ध्योर्यो-र्लक्षणभेदमप्याचक्ष्यते मुनयः। चरकाचार्य विरोधस्तु शङ्क्यमानोऽपि नास्ति।

इति वाग्भटमण्डने त्रयोदशं (द्वादशं) प्रकरणम्।

(त्रयोदशं प्रकरणम्)

अथ "श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात् । ग्रीष्म वर्षा-हिमचितान् वाय्वादीनाशु निर्हरेत् ॥ (अ. हृ. सू. १३।३३) इत्यत्र समयविरोध तन्त्रदोषेण दूषयितु विद्याधरः प्रत्यवतिष्ठते । यथाहि–कार्तिके दोषहरणं चरकविरुद्धम् यदाह चरकाचार्यः–"अत्युष्ण शीत-वर्षाहि ग्रीष्मवर्षाहिमा गमाः । तदन्तरे प्रावृडाद्यास्तेषां साधारणा-स्त्रयः । प्रावृट् शुक्र नभौ ज्ञेयौ शरदूर्जसहौ पुनः । तपस्यश्च मधुस्यैव वसन्तश्शोधनं प्रति ॥ एतान् ऋतून् विकल्प्यैवं कार्यं संशोधनं नृणाम् । स्वस्थवृत्तमभिप्रेत्य व्याधौ व्याधि वशेन तु ॥ (च. सि. ६।४–६) तत्र द्विमासरूपत्वादृतौ कस्मिन्नपि दोषाप्रवाहरणं स्यादितिशंका-यामभिहितम्-"माधवप्रथमे मासि नभस्य प्रथमे पुनः । सहस्य प्रथमे चैव वारयेद्दोष संचयम् ॥ (च. सू. ७।४६) अस्यार्थः, माधवो वैशाखः तस्य प्रथमः चैत्रः तत्र दोषंप्रवाहयेत् । नभस्यो भाद्रपदः तस्य प्रथमः श्रावण, तत्र दोषं प्रवाहयेत् । तथा कपिल वचोऽपि—"मघौ सहो नभसि च मासि दोषान् प्रवाहयेत् । वमनैश्च विरेकैश्च निरूहस्यानु-वासनैः ॥ (?) इति । तेन मार्गशीर्षे पित्तहरणं चरकादपि उपदिश्यते। वाग्भटे तु कार्तिक इति । न च कार्तिके न च चैत्रे । "कार्तिके श्रावणे-मासि चैत्रे साधरणे क्रमात् । ग्रीष्मदिसंचितान् दोषान् त्रिमासान्तरि-तान् हरेत् ॥ इति वचनम् । (?)[1] कार्तिके दोषहरणमूलं (न) भवितु-मर्हति । अस्य च वचनस्य अनार्षत्वात् परस्पर विरुद्धत्वाच्च । तथा हि कार्तिके दोषहरणे कथं त्रिमासान्तरिता । त्रिमासान्तरितत्वे कथं कार्तिके दोषहरणमिति । तस्मादागम बाधितमेव वाग्भट वचः ।

अत्र ब्रूमः-न दुर्बलमित्येतावता बलवता बाध्यते किंतु विरोधे । स चेह नास्ति। कार्तिक एवं दोषनिर्हरणस्य चरकाभिमतत्वात् । तथा हि सहशब्द स्याकारान्तस्य मार्गशीर्षवाचकत्वात्तेन सहस्य प्रथमः कार्तिक एवेति न विरोधः । कापिले वचनेऽपि सह इत्यत्र वटे गावः शेरते इतिवत् समीपिकाश्रयणेन सहैः सहसमीपे कार्तिके इत्यर्थो भवति । नातस्तेनापि विरोधः । इयं च व्याख्या सकलवैद्यमान्यतम भट्टारक हरिश्चन्द्रमतानुसारिणी । तेन च स्वव्याख्यानमूलतया श्रावणे कार्तिके इति वचनमुपन्यस्तम् । न चात्र त्रिमासान्तत्वव्याकोपः ।

---

1. This verse is quoted by Cakrapanidatta (Caraka Sutrasthana 7/46) without mentioning the source,

ग्रीष्मसंचितदोषस्य श्रावणादौ निर्हरणे वर्षासंचितस्य कार्तिकान्ते निर्हरणे वा त्रिमासान्तरितत्वदोष निर्हरणयोरुपपत्तेः। ततश्च वचनं **मुनितुल्येन हरिश्चन्द्रेण** यत्स्वयमुदाहृतं तन्मूलमिति वा न वा साहसमस्तु चात्रैतत्। **खरनाद** वचनस्य तुल्योऽर्थः न च निर्मूलता। तथाहि "मघौ नभे तथा मासे दोषानूर्जे च निर्हरेत्।" किं च ऋतुचर्यायास्सुश्रुतादिष्वयन निरूपणप्रस्तावे "माघा दयो द्वादशमासाः द्विमासात्मक ऋतुं कृत्वाषड्तवो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः, तेषां तपस्तपस्यौ शिशिरः, मधुमाधवौ वसन्तः, शुचिशुक्रौ ग्रीष्मः, नभोनभस्यौ वर्षाः ईषोर्जौशरत्, सहसहस्यौ हेमन्तः इति। एते शीतोष्णवर्षा लक्षणाः चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च।" (सु.सू.६।६–७) तथा संवत्सरस्य युगसंज्ञानिरूपणं तद्विरुद्धत्वमुक्तम्। तथाहि "अथ खल्वयने द्वे युगपत् संवत्सरो भवति। ते तु पञ्च युग मिति संज्ञां लभन्ते। (सु. सू. ६।९) इत्युपक्रम्य वार्षिकाद्य मृतुषट्कं द्विमासिकेनोक्ताभिहितम्-"भाद्रपदाश्वयुजौ वर्षाः, कार्तिकमार्गशीर्षौ शरत्, पौषमाघौ हेमन्तः, फाल्गुन चैत्रौ वसन्तः, वैशाखज्येष्ठौ ग्रीष्मः, आषाढ श्रावणौ प्रावृडिति।" (सु. सू. ६।१०) अत्र ऋतुषुमास विरोधो सौरमानेन मासाश्रयणमन्तरेण गतिः। तथा च सति कार्तिकमार्गशीर्षयोस्तुला वृश्चिकसंक्रान्त्योरनवस्थित स्पर्शवशात्कदाचिन्मार्ग एव तुलायोगात्कार्तिकः, कार्तिकश्च वृश्चिकयोगान्मार्गशीर्षास्यादिति न विरोधः लेशोऽपि। तथा च **ज्योतिश्शास्त्रे**––"मृगदि राशिद्वय भानुयोगात् षट् ऋतवस्स्युश्शिशिरो वसन्तः : ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः॥" (?) मृगोमीनः। अतएव **शालिहोत्रे सुश्रुतेनोक्तम्**––"मीनमेषवसन्तस्सादिति शुक्लकृष्ण मासाश्रयणेन वा वचन विरोधः। तौ चोक्तौ तैत्तरीयशाखायां" पौर्णिमास्यायां हि मासात्संपश्यन्ति। तथा अमावास्यायां हि मासत्संपश्यन्ति। "(   ) अयं चार्थो**वाग्भट टीकायां अष्टाङ्गहृदय दीपिकायां अस्माभिर्विस्तारि**तः। इह तु ग्रन्थगौरवभयात् दिङ्मात्रमुक्तम्।

भवति चात्र––

अज्ञान संशोधन काल एव दोषाः प्रणुन्ना भवता समन्तात्।
स्थानच्युतेराविलतांगतास्ते वातोतिसारं जनयाबभूवुः॥

इति वाग्भटमण्डने (त्रयोदशं) प्रकरणम्

(चतुर्दशं प्रकरणम्)

अथ दशविधौषधकालमधिकृत्य पुनर्विद्याधरः प्रत्यवतिष्ठते। यथा हि—"युञ्ज्यादनन्नमन्नादौ मध्येऽन्ते कवलान्तरे। ग्रासेग्रासे मुहुस्सान्नं सामुद्गं निशि चौषधम्॥ कफोद्रेके गदेनन्नं बलिनो रोगरोगिणोः। अन्नादौ विगुणेऽपाने समाने मध्य इष्यते॥ व्यानेऽन्ते प्रातराशस्य सायमाशस्यतूत्तरे। ग्रासग्रासान्तयोः प्राणे प्रदुष्टे मातरोश्विनि॥ मुहुर्मुहुर्विषच्छर्दिहिध्मा तृट् श्वासकासिषु। योज्यं सभोज्यं भैषज्यं भोज्यैश्चित्तैररोचके। कम्पाक्षेपकहिध्मासु सामुद्गं लघु भोजिनां। ऊर्ध्वजत्रुविकारेषु स्वप्नकाले प्रशस्यते॥ (अ. हृ. सू. १३।३७–४१)। इदं चासत् तया ह्यस्मिन् प्रकरणे सविषया दशौषधकाला अभिहिताः। तत्रानन्नं यत्केवलमुपयुज्यते। तस्य विषयं व्यानेऽन्ते प्रातराशस्य सायमाशस्य तूत्तरे इत्युदानवात इत्यर्थः। कवलान्तरं यदुपयुज्यते तत्कवलान्तरं तथा प्रतिग्रासं यदुपयुज्यते तत् ग्रासेग्रासे, तयोश्च विषयः एक एव। पुनःपुनश्च यदुपयुज्यते तन्मुहुर्मुहुः, तस्य विषयः विषच्छर्दिहिध्मातृट् श्वासकासिषु। सान्नं यदन्नेनदितः पश्चाद्वा समानस्य विषयः भोज्यंसभोज्यं भैषज्य भोज्यैश्चित्तैररोचके। सामुद्गं यद्भोजनस्या दावन्ते च अतः तस्य विषयः कम्पाक्षेपकहिध्मासु सामुद्गं लघु भोजनम्। निशि च यत् रात्रावुपयुज्यते तस्य च विषयः ऊर्ध्वजत्रुविकारेषु। एतत् प्रकरणे युक्तिः।

सहस्र शीर्षानन कमलानि रसतानिवाहा एव······तत्प्रणीत चिकित्सित शास्त्राभिप्रायस्य स्पर्धितया प्रवृत्तस्य वाग्भट खण्डनतया समुल्लसद्दिव्य भगवत्सहस्रफणिपादप्रसादोल्लासितमतीनां पादारविन्ददयापि सहृदय पारितोषिकं किंचिदुच्यते। तथा हि-अनन्नमित्येतस्य योऽयं विषयः प्रदर्शितो महामुनिना-"कफोद्रेके गदेनन्नं बलिनो रोगरोगिणोः" इति सविचार्यमाणः करतलरोमावळीसाम्यमावहति। बलिनामन्नं विना निरन्नेन प्रातरेवमेव भेषजमादेयमिति हि व्याधिनावेक्षणस्य कालस्य विषयः। षड्विधो हि कालो भगवता फणीश्वरेण निरवाचि। तथा हि-"दिनातुरौषधव्याधिजीर्णलिङ्गर्त्ववेक्षणम्। कालं विद्याद्दिनावेक्षः-पूर्वाह्णे वमनं-यथा॥ रोग्य वेक्षो यथा प्रातर्निरन्नो बलवान् पिबेत्। भेषजं लघु पथ्यान्नैयुक्तमद्यात्तु दुर्बलः॥" (च. चि.

३०।२६६-७) यथा कफोत्क्लेश गदे इति जीर्णलिङ्गापेक्षस्य कालस्य विषयः यथा आदेशि **भगवता भोगीश्वरेण**:—"क्षुद्वेगमोक्षौ लघुता विशुद्धि जीर्ण लक्षणम्। तदा भेषजमादेयं स्याद्धि दोषवदन्यथा ॥ (च. चि. ३०।३०३) अत्र विशुद्धिरिति कफोत्क्लेशगतत्वेन हृदय-कण्ठादिर्विशिष्टशुद्धिस्तत् व्याधिकृतावेक्षणकाल जीर्णलिङ्गावेक्षण कालस्यायं विषयः न भेषजकालस्येति सैकताविरुद्धं तन्त्रदोषतया वाग्भट दुर्मतिर्व्यलासि। कस्तर्हि निरन्नभेषज कालस्य विषयः इति। यदादिष्टं **भगवता फणिधरेण**—"अपानेविगुणे पूर्वं" (च. चि. ३०।२९९) इति। अत्र हि **सहस्रफणिना** पूर्वशब्देन कालद्वयं गृहीतं निरन्नं भोजिनां च। अनयोर्भैषज्यकालयो अपानवायौ विगुणे सत्येक एव विषयः। भोजनं लक्षीकृत्य तावत् भेषजकालोऽभिहितः कस्तस्य भोजनस्यादावन्ते च मध्ये च भेषजमुपयोज्यं स्यादित्याशङ्क्य जगतः **परमाप्तेन चरकाचार्येणा**देशि—"व्याने तु प्रातरशितं" (च. चि. ३०।२९९) इति मुख्यत्वात् प्रातराशस्यैव आदावन्ते च मध्ये चौषध-मुपयोज्यमिति। न तु सायमाशं लक्षीकृत्येत्यभिप्रायः। एतेन प्रातर्भो-जन परिसमाप्तैरेवायं भेषजकालः। यथोदाने भोजनोत्तरमिति (च. चि. ३०।२९९) अपर भेषजकाल इति। न तु कालं विलंब्य भेषज-मादेयं न तु भोजन निकटसमैव इत्यर्थः। अयं तु भेषजकालो **भगवद्ध-न्वन्तरिचरण**सरोरुहैरादेशि-"अन्तरा भक्तं यत्पूर्वापरयोर्भक्तयोः" (सु. उ. ६४।७३) तस्माच्चरकाचार्येण समं सुश्रुताचार्यस्य। विजृम्भते किं प्रवीण मतिरिति।

"सायमाशस्य तूत्तरे" इति वाग्भट वाक्यं तुरङ्गः समयविरुद्ध तन्त्र-दोष मृगारिणा कवलितोऽभिलक्ष्यते। तथा "ऊर्ध्वं जत्रु विकारेषु स्वप्नकाले प्रशस्यते।" एतच्चापि विपर्यस्तपदवी मारुह्य माद्यति। "स्वप्नकाले प्रशस्यते" एष-भेषजकाल एव न भवति। किं तत्रोर्ध्व-जत्रुरोगाणां प्रतीकार चिंतया ···· दशविधेषु चौषधकालेषु। यथा दशैवेति निश्शेष ····· **भगवता भोगीश्वरेण**—"भैषज्यकालो भक्तादौ-मध्ये पश्चान्मुहुर्मुहुः। सामुद्गं भक्तसंयुक्तं ग्रासग्रासान्तरे दश ॥ (च. चि. ३०।२९७) तत्र भक्तशब्देन प्राधान्यात्प्रथम भोजनमेव ग्राह्यम्। तेन भोजनस्यादौ द्वौ कालौ तथा भोजनस्यपश्चात् द्वौ कालौ, एकस्ता-बद्भोजनप्रान्तर एवास्तु किंचित्कालं विद्येत्येवं दशौषधकाला भवन्ति। न चैतेषु स्वप्न कालोऽस्ति। तस्मात् वाग्भट वाक्यं बालप्रलपित मैवेतत्। ननु यथा प्रथमभोजनमधिकृत्य भेषज कालाः तथा रात्रि-

भोजनमधिकृत्य भेषजकालाः भविष्यन्ति ततश्च भेषजकालमध्ये रात्रिरपि भविष्यतीति न दोषः इति चेत् तन्न, ईदृशे व्याख्याने दशेतिसंख्या व्याहन्यते। संख्येति यदि निर्देशोऽपि संख्यायां लब्धायां दशेति संख्या निर्देशो न्यूनाधिक संख्या निषेधार्थः। न तु संख्या बाधाऽर्हापि न भविष्यति। यथा प्रथम भोजनमधिकृत्यौषध कालाः तथा रात्रि भोजनमधिकृत्य भविष्यन्ति। तथा प्रथम भोजनाधिकृत्यौषधकाल विशयाः त एव रात्रि भोजनाधिकृत भेषजकाल विषयाः भविष्यन्तीति। ततश्च भोजनाधिकृतत्वमेव विषयं चाश्रित्य भेषजकालाः द्वयोरपि भोजनयोरेक संख्येव वर्तिष्यन्ते। ततश्च दशैव भविष्यन्तीति संख्या व्याख्यात इति चेत् तन्न, यदि रात्रि भोजन भेषजकाला अपि प्रथमभोजनकालैस्सहैकविषयत्वेन वर्तन्ते तदा व्याने तु प्रातराशस्य उदाने भोजनोत्तरमित्यत्र प्रातर्ग्रहणं व्यर्थमेवस्यात्। न प्रातर्भोजनभेषजकालाः रात्रि भोजन भेषज कालानां समान विषयत्वात्। तस्मात्तत्र प्रातर्ग्रहणं मुख्यात्वात् प्रथम भोजन ज्ञापनार्थं। अन्य सामान्य भोजन ज्ञापनार्थं अन्यसामान्य भोजनमधिकृत्य भेषजकालाः रात्रि भोजनेऽपि भेषजकालाः स्युरित्यर्थः। अतएव परमचतुरेणाचार्येण धन्वन्तरिणाप्यन्तरा भक्तस्य लक्षणं कृतम्- 'अन्तरा भक्तं नाम यत्पूर्वापर भक्तयोरन्तरा इति। (सु. उ. ६४।७३) एतच्च रात्रि भोजनमधिकृतकाल मध्ये न घटते। रात्रावन्तभोजनाभावात्। तस्मादपर शब्दोऽत्र बोधयति स्म। प्रथम भोजनमधिकृत्यैव कालस्तथा दशैवेति। अतएवोक्तं- "अत ऊर्ध्वं दशौषध कालान् वक्ष्यामः, तत्र अभक्तं प्राग्भक्तं अधोभक्तं, ऊर्ध्वं भक्त मध्यभक्त अन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुः ग्रास ग्रासान्तरं चेति। (सु. उ. ६४।६५) न चात्रापि सायमाशस्यान्ते कश्चिद्भेषजकालोऽभिहितः येन वाग्भटोक्तौ सायमाशस्य तूत्तर इति वचन चातुरीय चतुराणां चमत्कारो इति। न च स्वातन्त्र्येणाप्यत्र भेषजकालमध्ये रात्रिरपि स्वीकृत्येत्यभिप्रायेण वाग्भटोक्तं ऊर्ध्वजत्रु विकारेषु स्वप्नकाले प्रशस्यते इति। दग्ध वचः। सहृदयान्यावर्तयतीति सर्वथा मुनिमतमतिक्रम्याभिधीयमानं समयविरुद्ध तन्त्रं दोष पादपद्य सैर्वोर्जयतीति न रोचितव्यम् वाग्भट कुपण्डितेनार्भटेन। नन्वस्ति रात्रि भोजनकालयोगे स्वीकृतः। तथा हि **भगवद्धन्वन्तरिर्वचः**--

शीतकाले दिवास्नेहमुष्णकाले पिबेन्निशि। वातपित्ताधिको रात्रौ वातश्लेष्माधिको दिवा॥ (सु. चि. ३१।२२) सत्य मेवैतत्। एवमादिषु वाक्येषु रात्रिषु यद्भेषजोपयोगं दृश्यते तत्पञ्चविधकालमपेक्ष्य,

नत्वौषधकालमपेक्ष्येति भावः। तथाऽप्युष्णकाले रात्रौ स्नेहं पिबेदित्यत्रोष्ण लक्षण ऋतुमधिकृत्योक्तम्। तस्मादुष्ण काल एव विषयोऽस्य वाक्यस्य। तथा वातपित्ताधिको रात्रावित्यत्राऽपि दोषवशेन प्रत्युच्चमानः कालमपेक्ष्यैव प्रवर्तते। तस्मादातुरकाल विषयोऽस्य वाक्यस्य। तथा······अनुदिते रवौ······पिबेदित्यादिषु वाक्येषु न ज्ञेयमित्यर्थः। यथा तु···वराकन्या लौकिको···षडिकेति। तेनेषनुदिते सूर्ये रसायनं पिबेदिति दिनापेक्ष्य एव कालोऽभिहितः। तदित्येवमादीनां महर्षिवाक्यानां बुद्धिमता स्वयं संगृह्य पञ्चविध एव काल विषयो दातव्यः। तस्मात् रात्रिर्दशौषधकालमध्ये न भवति। रात्रौ यत्र क्वापि भेषजप्रयोगावस्थावशेन कालो भवति। यदाह चरकः—"उत्पद्यते हि साऽवस्था दोषकाल बलं प्रति। यस्यां कार्यमकार्यं स्यात्कर्मकार्यं च वर्जितम्॥ (च. सि. २।२६) तस्मात् समयविरुद्ध तन्त्रदोषं महेश्वरस्तुत्यर्थम्।

(अत्रोच्यते) इदं वाक्यकादम्बं यच्चाभाणि··· ··**वाग्भटः**—"पुञ्ज्यादनन्नमन्नादौ" इति तत् **चरक**वाक्येन "भैषज्यकाला भुक्तादौ मध्ये पश्चान्मुहुर्मुहुः। सामुद्गं भक्तयुक्तं च ग्रासग्रान्तरे दश॥ (च. चि. ३०।२९८) अत्र दशकाला उच्यन्ते प्रतीयन्ते पुनरष्ठावेवेत्यनेनैवं विरुध्यते। न तु भक्तादौ द्वौ कालौ तौ चापनेयौ वैगुण्यात्। अपाने विगुणे पूर्वमित्यत्रैवोक्तत्वात् तत्रैको निरन्नः पक्षोऽव्यवहितपूर्वक्षणरूपः। तथा प्रातराशान्ते व्यानोदान दुष्टौ द्वौकालौ तयोराद्यो भोजन व्यवहितोत्तरक्षणरूपः। व्यानेन्तेप्रातराशस्येत्यत्रैवोक्तः। परस्तु किंचित व्यवहितोत्तर लक्षणरूपः। उदाने भोजनोत्तरमिति वचनात् तच्च प्रातरेवाशस्य प्रधानत्वात्। तेन भोजनादौ द्वौ भोजनान्तरे च द्वौ सन्त्येवात्रौषधकालवदिति चेत् न, निरन्नस्य पूर्वभक्त रूपत्वासंभवात्। पूर्वशब्दो ह्यवहित पूर्वलक्षण वाची अन्यथातिप्रसंगात्। किं च एवं सति निरन्नप्राग्भक्तयो रैक्यमापद्यते। न च तदुचितम **सुश्रुत**वाक्य विरोधात्-तथा हि-"तत्राभक्तं यत्केवलमुपयुज्यते।" (सु. उ. ६४।६६) इति हि निरन्न भेषजं निरूप्यते। केवलत्वं चाद्यन्तयोरन्नसंभन्धाभावात्। अतस्तूक्तस्य नामान्नस्य पूर्वस्यात् नापि पूर्वभक्तस्य निरन्नत्व संभवः सुश्रुत विरोधादेव। तथा तत्तेन निरन्नचापि। पाग्भक्तं तु यत् प्राग्भक्तस्य निरन्नता। तत्कथं अन्नावृतत्वोक्तिम्-"शीघ्रं विपाकमुपयातिबलं न हिंस्यादन्नावृतं न च मुहुर्वदनान्निरेति।" (सु. उ. ६४।६९) तेन न तावद्भोजनादौ द्वौ

कालौ संभवतः नापि भोजनान्ते। अन्तराशब्दस्य व्यवहितोत्तरक्षण वाचित्वात्। ननु व्यानेऽन्ते प्रातराशस्येतिवदुदाने भोजनोत्तरमिति वचनादुदानवैगुण्येऽपि भोजनान्त एव कालः। तत्र च प्रातराशस्य प्राधान्यात्तदन्त एव। व्यानवदुदानस्यापि प्राप्तौ व्यानस्याप्यवहितोत्तररूपलक्षणरूपोक्त कालः। उदादस्य तु किंचित् व्यवहितवृत्तिरिति चेत् तन्न, उदाने भोजनोत्तरमित्यस्य सायमाशरूपोत्तरकाल विषयत्व संभवे व्यानदुष्टावरुद्ध प्रातराशात्र प्रवेशासंभवात्। अतएव नयनिपुणेनाचार्य वाग्भटेनाभाणि-"व्यानेऽन्ते प्रातराशस्य सायमाशस्य तूत्तरे" इति। उत्तरे उदान इत्यर्थः। तेन दशोषध काला न घटते। अतः शास्त्रान्तरोक्त निरन्नभेषजस्य विषयः सुश्रुतोक्त एवास्तु। यथा तत्राभक्तंयत्केवलमुपयुज्यते। "वीर्याधिकं भवति भेषजमन्नहीनं हन्यात्तयाऽऽमयसंशयमाशुचैव। तद्बालवृद्धवनिता मृदवस्तु पीत्वा ग्लानिपरां समुपथान्ति बलक्षयं च॥" (सु. उ. ६४।६७) तर्हि तदविसंवादी कथमाचार्य एवापराध्येते। "श्लेष्मकाले गदेनन्नं बलिनो रोग रोगिणोः।" (अ. हृ. सू. १३।३८) इति वदन् निरन्नं च भेषज्यंवीर्याधिक्याद्बलवद्रोगहरमिति युज्यते। बालादि पीतं च ग्लानि बलहानिपरम् (तथा बलवद्रोगि विषयत्वम्। बलमुष्णातीति व्युत्पत्या बलासः श्लेष्मोच्यते। अतो बलहानि निवृत्यर्थं तत्काल गमयन्तेनोपयुज्यत इति शास्त्रान्तरोक्त रात्रि भोजन विषयः। ऊर्ध्वं जत्रु विकारेषु स्वप्नकाले प्रशस्यते इति वचनमुचितमेव। तथा च खरणादिभिर्पृष्ठः पुनर्वसूत्तरं शिष्यार्थितबुद्धये खरणादाय आह—"ऊर्ध्वजत्रसंश्रित विविधामय भेषजं क्रमशः" इत्युपक्रम्य अधिकारिभेदेन अनुभोजनप्राणादिकालं निरूप्योक्तम् "पिबेत्कामं निशास्विति"। तेन निरन्न भेषज रात्रि भेषजाख्यौ द्वौ कालौ सर्वशास्त्रा प्रत्ययमेकं कर्मेति न्यायेन शास्त्रान्तरोक्तौ गृहीत्वा दशसंपादनं कार्यम् ततश्च स्वतन्त्राविरोधेषु भूयिष्ठ विनिवारकमिति विहितप्रतिज्ञा चाचार्यस्य माननीय एव वचन संदर्भः। शेषस्तु विद्याधरे वचनाडम्बरः फलगुतया स उपेक्षणीयो विचक्षणानामिति।

भवति चात्र—

इह न वेत्ति मुनीश्वर संमतान् अवसरानगदस्य दशापि यः।
प्रचुर शा (सन) युक्तिवशां कथं द्विगुणिताः स तु षोडक वेत्स्यति॥

इति वाग्भटमण्डने दशमं (चतुर्दश) प्रकरणम्।

(पञ्चदशं प्रकरणम्)

अथ पुनरपि "कार्श्यमेव वरं स्थौल्यान्नहि स्थूलस्य भेषजम्। बृंहणं लघनं नाऽलमतिमेदोग्नि वातजित्॥ (अ. हृ. सू. १४।३१) इत्यत्र सौर विद्याधरः प्रत्यवतिष्ठते। तद्यथा—इदं हि वचनं कृश-स्थूलयोः परमार्थस्वरूप प्रतिपादनपरम्। अस्यार्थः, स्थौल्यात् कार्श्य-मेवोत्तमम्। तत्र हेतु लंघनं बृंहणं वा स्थूलस्य नालं न समर्थः। कीदृशं भेषजमित्युभय स्यापि स्वरूपमाह अतिमेद इति। अति शब्दो मेद.प्रभृतिभिस्संबध्यते। तत्रितयजिच्चभेषजं स्थौल्यापनोदनादत्य-ग्नेरतिवातस्य चाभ्युदयः। यदा चात्यग्नि वातयोर्बृंहणमौषधं क्रियते तदा मेदो वर्धते। न च बृंहण लंघने हित्वादन्यद्भेषजमस्ति। तेन स्थौल्यात् कार्श्यमेव श्रेयः इत्यर्थः। तदिदं व्याहताख्येन तन्त्रदोषेण दुष्टम् तथाहि वाग्भटेनैव स्थूलस्य शिलाजत्वादि बहुतर भेषजमुक्तम्। तथा स्वाभीष्ट साधको हेतुरुक्तः-"मधुरस्नेह सौहित्यैर्यत् सौख्येन च शाम्यति (नश्यति)। कृशिमास्थविमाऽत्यन्त विपरीत निषेवणैः॥ (अ. हृ. सू. १४।३२) कृशिमाकृशत्वं स्थविमा स्थूलत्वं अत्यन्त विपरीतं। स्थूलत्वविनाशि रूक्षछेदनादि तस्य निषेवणैः शाम्यति। तेन स्थूल स्याप्यौषधमस्ति। पूर्ववचनं स्वयमेव व्याहतमनेन। न चायं हेतु स्थौल्यस्य कार्श्यादवरत्वसाधकः। स स्वविपरीत निषेवणै-रुभयोरपि शान्तौ तुल्यत्वात्। तथा च चरकाचार्यः—"कृशं दुर्बल-माप्यायामः स्थूलं मेदस्विनं अपतर्पयामः। (च. सू. ११।६) इति। चरकादि भिरपि स्थौल्ये भेषजान्युक्तानि। तेन समग्रविरोधसहकृत-व्याघात तन्त्रदोषो दुर्निवारो वाग्भटस्य इति।

अत्र ब्रूमः—वचनाबोध निमित्तेयं विद्याधरस्य भ्रान्तिः। तथाहि "अत्यन्त गर्हितावेतौ सदास्थूलकृशौ नरौ। श्रेष्ठो मध्यशरीरस्तु कृशःस्थूलात्तु पूजितः॥" (सु. सू. १५।३५) तथा "स्थौल्ये कार्श्ये वरं कार्श्यं समोपकरणौ हितौ। यद्युभौ व्याधिरागच्छेत्स्थूलमेवाति पीडयेत्॥" (च. सू. २१।१७) इति सुश्रुतचरक वाक्याभ्यां स्थौल्या-त्कार्श्यं वरमिति प्रतीयते। तत्राभिप्रायानुरूपो हेतुरनेन वाक्येनोच्यते। न तु स्थूले भेषजं निषिध्यते। तथाहि स्थूलस्य द्विविधमपि भेषजं नालं न पर्याप्तं न यथावदस्ति। यथा कृशस्य बृंहणो मधुरस्निग्ध-

सौहित्याद्यनेकविध सुप्रयोगं न तयास्थूलस्येत्यर्थः। कृत एतदित्यत आह-अतिमेदोग्निवातजिदिति। स्थूलस्य अतिमेदोग्निवातजिद्भेषज-मुचितम्। तत् उभयविधमपि न यथावत्संपद्यते बृंहणस्य मेदोवर्ध-कत्वात् लंघनस्य चातिवातकरत्वात्। तेन विषमक्रियतया पैत्तिक-मेहादिति चिकित्सायां अनिवारकत्वात् कार्श्यं स्थौल्यस्येति आचार्य-वचनार्थः। अयं चास्यवचनस्यार्थः उपदिष्टात्कशिमस्थविम्नोस्सुकर-दुष्कर भैषज्योपदेशादेवावगम्यते। न च कार्श्यमेवेत्यत इत्यस्य तत्र नालमिति परान्वय परित्यागेन भेषज निबन्ध परत्वं युक्तम् उपरितन भेषज विरोधात्। न च विकल्पसिद्धरूपे संभवति। तेन "अविरोधा-त्समावेशे लभ्यमाने प्रमाणयोः" इति न्यायः। यच्च स्वस्वविपरीत वाक्ये दूषणमभाषि तदपि सुखसाध्य कृच्छ्रसाध्यादि स्थूलदि प्रसङ्गतया न दूषणम्। शेषस्तु विद्याधर प्रपञ्चः निरर्थकतया उपेक्षणीय एव। तथा च—

स्थौल्यं कार्श्यमपि द्वयं निगदितं यद्दूषणं पूरुषे
तत्वय्यैव विजृम्भमाणमनिशं संरभ्यते सूरिभिः।
शैसा (ईर्ष्या) पान्वय संभवत्प्रतिपदं वाचैव ते दर्शितं
सूक्ष्मार्थे मुनिशासने प्रविलसत्स्थूलेमहार्थोऽपि च॥

इति वाग्भटमण्डने नवमं (पञ्चदशं) प्रकरणम्।

(षोडशं प्रकरणम्)

अथ स्नेहकर्ममधिकृत्य भूयः विद्याधरः प्रत्यवतिष्ठते यथा-प्रथमतः स्नेहप्रविचारणादुक्ता-"रसभेदैककत्वाभ्यां चतुःषष्टिर्विचारणाः । स्नेहस्यान्याभिभूतत्वादल्पत्वाच्च क्रमात्स्मृताः ॥ (अ. हृ. सू. १६।१५) तत्र विचारणाख्यानां चतुःषष्टिकत्व मागमेष्वसिद्धम् । यथा च अग्निवेशेन काश्चिद्विचारणा इति पृष्ठः पुनर्वसुरात्रेयः प्रत्युवाच-"ओदनश्च विलेपी च रसो मांसं पयो दधि । यवागूः सूपशाकौ च यूषः काम्बलिकः खडः । सक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च । भक्ष्यमभ्यञ्जनो बस्तिस्तथा चोत्तर बस्तयः । गण्डूषः कर्णतैलं च नस्तकर्माक्षितर्पणम् । चतुर्विंशतिरित्येताः स्नेहस्य प्रविचारणाः ॥ (च. सू. १३। २३–२५) तथा अच्छपनस्य विचारणां प्रतिपाद्य स्ववचन व्याघातं न पश्यकेनाभाणि "यथोक्त हेत्वभावाच्च नाच्छपेयो विचारणा।" (अ. हृ. सू. १६।१६) स्वाङ्गेविष्टां लङ्ग (लेप) यित्वानेन किमिति प्रक्षाल्यते । यत् अच्छपानस्य विचारणत्वं नास्त्येव । किमित्यनेन विचारणत्वं प्रतिपाद्य पश्चान्निराक्रियते । नाच्छपानस्य विवरणत्वेनान्याभिभूतत्वं प्राहुः ।······यदाह चरकः "अच्छपेयस्तु यः स्नेहो नतामाहुर्विचारणाम् । स्नेहस्य स शिषग्दृष्टः कल्पः प्राथमकल्पिकः ॥ (च. सू. १३।२६) तस्मान्मुख्यकल्पत्वादच्छस्नेहो न विचारणा । तस्मात् स्नेहस्य विचारणं न जानाति ।

तथाहि कियत्कालं स्नेहः प्रयोक्तव्यः तदपि न जानाति । यथा "त्र्यहमच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत् । सम्यक् स्निग्धोऽथवा यावदतस्सात्मी भवेत् परम् ॥" (अ. हृ. सू. १६।२९–३०) अस्यार्थः- क्रूरकोष्ठे सप्तदिनं पिबेत् सप्तदिनेऽपि यदि स्निग्धलक्षणं न भवति तदा सप्तदिनात्परमपि पिबेद्यावत्सम्यक् स्निग्धलक्षणानि । अतः सम्यक् स्नेहनलक्षणमन्तरं यदि पिबेत् तदा सात्मी भवति । एतच्चसत्यावस्थां वराको न जानाति यतः सप्तदिनानन्तरं सम्यकस्नेहित लक्षणं न भवति । स्नेहो हि सप्तदिन पर्यन्तं स्नेहयति न सप्तदिनानन्तरम्, यदुक्तं चरके--"स्नेहनस्य प्रकर्षौ तु सप्तरात्रत्रिरात्रकौ ।" (च. सू. १३।५१) सप्तरात्रात्परं तस्मात् स्नेहनं नास्ति। सप्तरात्रात्परं पाने सात्मी भावान्नगुणो न दोषश्च भवति । यदाह सुश्रुतः-- पिबेत्

त्र्यहं चतुरहं पञ्चाहं षडहं तथा । सप्तरात्रात्परं स्नेहः सात्मी भवति सेवितः ।" (सु. चि. ३१।३६) यदाह **दृढबलः**—स्नेहो वरो । (त्र्यहावरं) सप्तदिनं परं तु स्निग्धो नरः स्वेदयितव्य उक्तः । नातः परं स्नेहन मादिशन्ति सात्मीभवेत् सप्तदिनात् परं तु ॥" (च. सि. १।६) यदा स्नेहप्रकर्षो न जातः तदा स्नेहं त्याजयित्वा पाचनं पाययित्वा पुनः स्नेहयेत् । **अत्र वृद्धवाग्भटेनोक्तम्**-"सात्मी भूतो हि कुरुते न मलानामुदीरणम् । अतियोगेन वा व्याधीन् यथाम्भोधोति-योजनात् ॥' (अ. सं. सू. २५।४२) एतन्नातोवायुक्तम् । यतः स्नेह-योगो हीनानायोगात् सात्म्यतो गते स्नेहो न भवति तदा सात्मी-भावात् न दोषा स्युः, सात्म्यर्थोऽप्युपशयार्थः । उपशयश्च सुखं, तस्मात् स्नेहादिकर्मसु मिथ्याज्ञानं विज्ञाय सुहृदये दूरत एव चाण्डाल-वत् परिहरणीय एव वाग्भट पाठकः । तस्मादत्र निश्शाणं वादयित्वा जितं समयविरुद्धेन तन्त्रदोषनृपेणेति ।

अत्रोच्यते—स्नेहस्य चतुष्षष्टेर्विचारणानां चरकसुश्रुतादिषु साक्षादनुक्तत्वात् वाग्भटोक्तिरनागम मूलत्वं कथयतो विद्याधरस्य निस्त्रपत्व महासाहसिकत्वाभ्यामन्तरेण न किंचित् विद्यते विद्या रहस्यम् । तथा हि **चरकाचार्यः**—रसैश्चोपहितः स्नेहः समासव्यास-योगिभिः । षड्भिस्त्रिषष्टिधा संख्यां प्राप्नोत्येकश्च केवलः । एवमे-ताश्चतुष्षष्टिः स्नेहानां प्रविचारणा । ओकर्तुव्याधिपुरुषान् प्रयोज्या जानता भवेत् ॥ "(च. सू. १३।२७–२८) इति । केवलं रसैरनाभि-भूत इत्यर्थः । तस्य च विचारणत्वमत्यल्पमात्रतया । तथा च तत् व्याख्यायां तन्त्रान्तरमुपन्यस्तं संवादार्थं **भट्टारहरिश्चन्द्रेण**—"स्नेह-मिश्रैः रसैर्योगात् स्त्रिषष्ठिरस्युर्विचारणाः । अच्छेत्यल्पतयैकेति चतुष्षष्टि न तूत्तमे ॥" (?) रसभेदैककत्वमित्यस्य ह्ययमर्थः सांप्र-दायिकः । रसे भेदस्त्रिषष्ठि स्तेषां त्रिषष्टिकत्वादत स्तैरभिभूततया स विचारणास्पदम् । अच्छस्त्वेककत्वेन विचारणास्पदं एककोऽल्प इति यावत् । अल्प इति तन्त्रेणाल्पार्थत्वाताप्रत्ययस्य । तेनाच्छ पेय पीयमात्राल्पत्वम् तत्र विचारार्हत्वम् । अन्यत्र तु तत्वास्तीति किं विरुध्यते । **चरकाचार्यो**ऽपि "अच्छपेयस्तु यः स्नेहो न तामाहुर्विचार-णाम् । स्नेहस्य स भिषक् दृष्टकल्पः प्रथमकालिकः ॥ (च. सू. १३।२६) उत्तमा मात्रा इत्यर्थः । एवं बहुमात्र तयैव विचारणात् । तथैवाचार्यो विचारणत्व मभिप्रैतीति निर्णीयते । केवल स्वल्पमात्रो-ऽभ्यङ्गादिषु उपयुज्यते इति **चरक टीकायामाह वाप्यचन्द्रः** । नापि

सम्यक् स्निग्धो षडाहादित्यनेनाष्टमादि दिवसेऽपि स्नेहे पानमनुज्ञायते। किंतु "पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहं तथा। सप्तरात्रात् परं स्नेहः सात्मीभवति" इति **सुश्रुत**वाक्यस्य "मृदु कोष्ठस्त्रिरात्रेण स्निह्यत्यच्छोपसेवया। स्निह्यति क्रूरकोष्ठस्तु सप्तरात्रेण मानवः॥" (च. सू. १३।६५) इति **चरक** वाक्येन चतुरहं पञ्चाहं षडहं इत्यत्र यो विरोधः तत्परिहारार्थम्। विषय व्यवस्थायोच्यते। सम्यक् स्निग्धोऽथवेति तदयमर्थः। सप्ताहः स्नेहस्य परमः कालः अवरस्त्र्यहः इति वरावरत्वमात्रं चरकतात्पर्यम्। न पुनश्चतुर्थादि निषेधः इति मध्यकोष्ठादौ तत्प्रयोग योगात्। तेन सप्तदिन पर्यन्तं यावत् सम्यक्-स्निग्धता तावच्चतुरहादि पर्यन्तमपि स्नेहं पिबेत्। अतःपरमिति सप्ताहादूर्ध्वमित्यर्थः। अतएव **दृढबलाचार्यः**—"त्र्यहावरं सप्तदिनं परं तु" (च. सि. १।६) अस्तु वा सम्यक् स्निग्धोऽथवा यावदिति अष्टाहाद्यभ्यनुज्ञा परम्। तथाऽपि कोष्ठतारतम्यापेक्षत्वान्न दोषः। इदं च सुश्रुत स्नेहाध्याये स्पष्टीकृतमाचार्यै**र्भोजभेडादिभिः**। तथा हि तद्ग्रन्थ सन्निवेशः—यथा "कोष्ठ त्रित्वेऽपि तारतम्य व्यवस्था न स्यावश्यमङ्गत्वेतेन पथ्य (मध्य) मृदुकोष्ठस्य तारतम्यम् तथा क्रूरक्रूरतमोऽपि अतएव। तस्मात्सप्ताहादूर्ध्वं क्रुरतमस्य कथं सात्मी भावः। तथा च तन्त्रान्तरं—"तत त्रि···रात्राणि स्नेहपानं ···विधीयते। मृदुमध्यादिकोष्ठत्वान्मृदुमध्यादि भेदतः। क्रूरः सप्तरात्रात्क्रूरतरोऽष्टरात्रात्क्रूरतमो नवरात्रादपरस्सात्मी भावः। सन्ति ह्येवं भूता प्राणिनो दीप्ताग्नयो वातभूयिष्ठाः यो नवरात्रादपि न स्निह्यन्ति। अल्पमात्रेण चान्येषामतियोगः। तेन सर्वेषा शमनीयार्थं सप्तरात्रेण तावत् शमं वा······अवश्यं दोषं शमयति। परतस्तु उपयुज्यमानस्सात्मीभवति। तथा च तन्त्रान्तरे—शुद्धयर्थं शमनार्थं च स्नेहोच्छाःउपयुज्यते।" शुद्धयर्थं यदि सुस्निग्धः तदा संशोधनं हितमिति दृढबल वचन (च. सि. १।१०) विषयत्वेनोह्याख्यातम्। तत्र युक्तिः तन्त्रान्तरवचनानु सारित्वादुचितेवाचार्थ वचः 'सम्यक् स्निग्धोऽथवा यावदिति। स्नेहातियोगादुपद्रवाश्चरक एवोक्ता— 'पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता। तन्द्रारुचिरुत्क्लेश स्यदतिस्निग्ध लक्षणम्॥" (च. सू. १३।५८) इति। शेषं तु फल्गुतया उपेक्षणीयम्

इति वाग्भटमण्डने षोडशं प्रकरणम्

(सप्तदशं प्रकरणम्)

तथा वमनविरेचनोपदेशेष्वपि विद्याधरेणान्यदाभाणि। तथा हि— "निशासुप्तं सजीर्णान्नं पूर्वाह्णे कृतमङ्गलम्। निरन्नमीषत्स्निग्धं वा पेयया पीत सर्पिषम्॥ वृद्धबालाबलक्लीब भीरून् रोगानुसारतः। आकण्ठं पायितान् मद्यं क्षीरमिक्षुरसं रसम्॥ यथा विकारविहिता मधुसैन्धवसंयुताम्। कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम्।······प्राङ्मुखं पाययेत्पीतं मुहूर्तमनुपालयेत्॥ (अ. हृ. सू. १८।१३-१८) अनेन वाक्य कदम्बकेन वमनक्रमोऽभिहितः। न चायं क्रमो मुनिभिरुक्तेन क्रमेण सह संगतंकर्तुमनुत्सहते। तथा हि "ईषत् स्निग्ध मिति" प्रथमतो विचार्यते। असम्यक् स्निग्ध श्चेत्यवस्था त्रयः। तदाह चरकः "पुरीषं ग्रथितं रूक्षं वायुरप्रगुणो मृदुः। पक्ता खरत्वं रौक्ष्यं च गात्रस्यास्निग्धलक्षणम्॥ वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। मार्दवं स्निग्धताचाङ्गे स्निग्धानामुपजायते॥ पाण्डुता गौरवं जाड्यं पुरीषाविपक्वता। तन्दारुचिरुत्क्लेशः स्यादति स्निग्ध लक्षणम्॥ (च. सू. १३।५७-५९) तथा वमन क्रमेऽपि--"ततस्तं पुरुषं स्नेहस्वेदोपपन्नम्" (च. सू. १५।९) इत्याद्युक्तम्। तथा सुश्रुतोऽपि-"स्निग्ध स्विन्नाय वमनंदत्तं सम्यक् प्रवर्तते" (सु. चि. ३३।६) तस्मादीषत् स्निग्धमिति बालप्रलपितम्। तथा "पेयया पीत सर्पिषं" इति विशेषो न किंचिद्वयच्छिद्यत इति जिगीषुः। तथा वृद्धादीनामाकण्ठपेयादीन् पाययित्वा पश्चादौषधं पाययेदिति महर्षीणामुपदेशः। किं तर्हि, ये वृद्धाबालादयः औषधं पातुं न शक्नुवन्ति तान् वमनौषध संस्कृत क्षीरादीनि पाययेदिति सर्वमुनि संमतम्। यदाह सुश्रुतः—"वमनद्रव्य विकल्पानां दिगियंसप्त दर्शिता। तामन्विष्य यथाव्याधि कालशक्ति विनिश्चयात्॥ कषायैःस्वरसैः कल्कैश्चूर्णैरपि च बुद्धिमान्। पेया लेह्याद्य भोज्येषु वमनान्युप कल्पयेत्॥ (सु. सू. ४३।१०-११) इति। तथा--"घृतेषु तैलेषु पयस्सु चापि मद्येषुमूत्रेषु तथा रसेषु। भक्ष्यान्न लेह्येषु च तेषुतेषु विरेचनान्यग्रमतिर्विदध्यात्॥ (सु. सू. ४४।९०) तथा दृढबलेनाप्युक्तं--"बदरषाडवराग लेहमोदकोत्कारिका तर्पणपानक मांसरस यूषयुक्तं" (च. क. १।२६)। एतत् वाग्भटेनाभाणि—

"उत्थानेऽल्पे दिने तस्मिन, भुक्त्वान्येद्युः पुनः पिबेत्। (अ. हृ. सू. १८।३६) इत्यादि वाक्यान्यविचारित रमणीयानि सहृदयैः कौतुकेन सविषयाभ्यां निर्दोष जात समयविरुद्ध तन्त्रदोषनृपतिरिति।

अत्रोच्यते—ईषत् स्निग्धत्वमातुर विषयम्। तथा च अरुण-दत्तादिभिर्व्याख्यातम्—"ईषत् स्निग्धं वा पेयया पीत सर्पिषं इति रोगिविषयमिति।[1] तथा च सुश्रुताचार्येणोपदेशः—"विषाभिघात पिडका पाण्डुशोफ विसर्पिणः। नातिस्निग्धा विशोध्यास्युः तथा कुष्ठप्रमेहिणः (सु. चि. ३३।४२) नातिस्निग्धाः ईषत् स्निग्धाः इत्यर्थः। न हि संशोधयेस्विति स्निग्धत्व कुतश्चित्प्राप्तमिति यदनेन निषिध्यते। सम्यक् स्निग्धत्व तूत्सर्गादिव प्राप्तमिति तस्य पुनः कथनं निष्फलमेवेति। पेया पदत्वं त्ववचारणा द्रव्योपलक्षणम्। सर्पिषः उपदेशस्तु सर्वस्नेहोत्तमतया। तथा च भोजः—"विषघाता-तुरान् पेयाद्यन्यतरा च ताभिः किंचित् स्निग्धं शोधयेदिति"। तेनो-पपन्नमीषत् स्निग्धमिति। वृद्धादीनामाकण्ठमादौ मद्यादिपानं अनन्तरं वमनमात्रा प्रयोग इति तु भगवान् धन्वन्तरिरेव स्पष्टमा-चष्टे तद्यथा—"तत्र सुकुमारं कृशं बालं वृद्धं भीरूं वा वमन साध्य-विकारेषु क्षीरदधितक्रयवाग्वादीनामन्यतममाकण्ठं पाययेत् पीतौषधं च पाणिभिरग्नितप्तै प्रताप्यमानं मुहूर्तमुपेक्षेत।" (सु. चि. ३३।७) इति उच्चारित्येदिते तस्मिन्नित्यपरिज्ञात कोष्ठ विषयम्। तथा च सुश्रुतः—"प्रगपीतं नरं शोध्यं पाययेदौषधं मृदु। ततो विज्ञातकोष्ठ-स्य कार्यं संशोधनं पुनः॥ (सु. चि. ३३।४४) इति सर्वमनवद्यम्।

इति वाग्भटमण्डने चतुर्दशं (सप्तदशं) प्रकरणम्

1. This sentence is not found in the extant version of Arundatta's commentary.

(अष्टादशं प्रकरणम्)

अथ बस्तिप्रकरणे भूयो विद्याधरः प्रत्यवतिष्ठते । यथा हि--बस्ति प्रधानतमस्सर्वकर्मणाम् । अत एवोक्तं **दृढबलेन**—"तस्माच्चिकित्सार्धमिति ब्रुवन्ति सर्वां चिकित्सामपि बस्तिमेके ।। (च. सि. १।४०) तस्माद्बस्तिं प्रति मुनीनां रहस्य भाण्डारमुद्घाटयितुमुपयुज्यते । तथा हि वाग्भटो न जानाति ।[1] यथा" निरूहमात्रा प्रथमे प्रकुञ्चोवत्सरेपरम् । प्रकुञ्चवृद्धि प्रत्यब्दं यावत् षट् प्रसृतास्ततः ।। प्रसृतं वर्धयेदूर्ध्वं द्वादशाष्टादशस्य तु । आसप्ततेरिदं मानं दशैव प्रसृताः परम् ।। (अ. हृ. सू. १९।१८–१९) । प्रकुञ्चो हि पल पर्यायः—द्वे पलार्धे पलंमुष्टिः प्रकुञ्चोऽथ चतुर्थिका । (च. क. १२।९२) । न च निरूहे पलादिमानं मुनीनां समयः । किं तर्हि प्रसृतमानेन मुनीनांव्यवहारः । तदुक्तं **दृढबलेन**—"निरूहमात्राप्रसृतार्धं माद्ये वर्षे ततोऽर्धं प्रसृताभिवृद्धिः । आद्वादशात् स्यात् प्रसृताभिवृद्धिरष्टादशात् द्वादशतः परं स्युः ।। आसप्ततेस्तद्विहितं प्रमाणमतः परं षोडशवद्विधेयम् । निरूहमात्रा प्रसृतप्रमाणा बाले च वृद्धे च मृदुर्विशेषः ।। (च. सि. ३।३१–३२) अत्र **वाग्भटः** सर्व सामग्रया प्रत्यवतिष्ठते । **दृढबलाचार्येण** प्रसृतमाने निरूह उक्तः न च प्रसृत शब्दार्थोऽधिगम्यते अनेकार्थत्वाच्छब्दानाम् । प्रसृतो हि पलद्वयमुच्यते यदाह **दृढबलः**—"बिल्वं षोडशिका चाम्रं द्वेपले प्रसृतं विदुः ।" (च. क. १२।९२) तस्मात्पलादि मानो व्यवहारे वर्तत एवेति युक्तमुक्तं वाग्भटेन । तथा **दृढबलाचार्येण** यदुक्तं निरूहो प्रसृतमानं पलद्वयम भिमतं दृढबलाचार्यस्य । अथवा कुञ्चितपाणिर्निकुञ्च प्रसृतः इत्यभिधाने पठितत्वात् । तत्र सर्वमुनीनामादेशो प्रवृत्तत्वात दृढबलस्य हस्तमानमेवाभिहितम् । तत्र किं प्रमाणमिति ब्रुवतो वाग्भटस्य भगवत् सुश्रुताचार्य बचनब्रह्मास्त्रमुपनेयम् । तथा हि वचनं--"आस्थापन द्रव्य प्रमाणमातुरहस्त संमितेन प्रसृतेन संमितौ प्रसृतौ द्वौचत्वारोऽष्टौ च विधेयाः ।। (सु. चि. ३५।७) इति तस्मात्

---

1. These sentences have been shifted from the previous chapter as they are related to this chapter.

प्रसृति शब्दार्थमुनिसंमतमजानता वाग्भटेन सर्वं लिखितम् । ननु पराशरादिभिर्निरूहे प्रमाणं लिखितम् । तथा च पराशरः –"आस्थापन प्रमाणं तु प्रस्थपादोत्तरः परम् ।" इत्यादि । तत् वाग्भटेन यथामति उच्यते । एतद्विमानं तिर्यग्यो ीना गवादीनाम् । पुनर्वसु महर्षिः गजखण्डिकादिभिपृष्टेन ...."प्रस्थं ह्यजाव्यो हि निरूह मात्रा गवादिषु द्वित्रिचतुर्गुणे यथाबलम् । निरूहमुष्ट्रस्य तथा आढकद्वय......नुवासनेष्टमः ॥" तथा हारीतोऽपि –"अर्धाढकं, तत्प्रमाणं अप्रमाणमिति मनुष्यप्रमाणं न भवति बहुप्रमाणत्वादाढकादिमितत्वाच्च गजादीनां प्रमाणं भवतीत्यर्थः । तस्मान्नराणां आतुरहस्तप्रमाण कल्पितो बस्तिर्देयः । तस्य च कल्पना द्विधा–एका तु प्रसृता एव । यथा योगोक्त दृष्टमानेनानुक्त कषायमानयोः रस क्षीराम्ल मूत्राणां दोषावस्थामवेक्ष्यते । यथा "भागाः क्वाथस्य चत्वारः स्नेह भागस्तु पञ्चमः । क्रुद्धेऽनिले चतुर्थस्तु षष्टः पित्ते कफेऽष्टमः ॥ सर्वत्र चाष्टमो भागः कल्कानां लवणं पुनः । क्षौद्रं मूत्रफलं क्षीरमम्लं मांसरसं तथा ॥ युक्त्या प्रदापयेद्धीमान् निरूहे कल्पनात्वियम् । कल्कस्नेहकषायाणां मानमेतत् भिषग्वरैः । बस्तिस्तु कल्पित प्रोक्तः तस्यदानं यथार्थं कृत् ॥" (सु. चि. ३८।२६–३२) दानं (मानं) पुनः कल्पनानन्तरं पश्चादातुर हस्तप्रसृतमानेन क्रियते । यत्र मुस्तादि बस्ति योगेषु मानं चोक्तम् (अ. हृ. क. ४।३७–४२) तत्र तेनैवमानेन बस्तिकल्पना । न तु मुस्तादियोगेषु बहुतर मानेषु यदातुरहस्त प्रवरं यथोक्त बस्तिमेलनं निरर्थक मपि क्रियते । तथाभूतमानमेक्षुनेतस्यास्तेप्रभाव जन्य त्वात् उपयोगोप्ययम् । यदाह चरकः––"यथा हि कुर्वन्ति स उपायः ।" (च. सू. २६।१३) इति ।

द्वितीया तु कल्पना प्रथमत एवातुर प्रसृतेन...द्रव्यणि पाययित्व कल्पते बस्तिः । यदाह सुश्रुतः—अत ऊर्ध्वं द्वादशप्रसृतान् बस्तीन् वक्ष्यामः; दत्वाऽऽदौ सैन्धवस्याक्षं मधुनः प्रसृति द्वयम् । विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृति त्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसतिं क्षिपेत् । संमूर्च्छि ते कषायं तु चतुः प्रसृति संमितम् ॥ वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम् । एव प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् ॥ (सु. चि. ३८।३७–३९) एतेषु योगेषु स्वमतं नोक्तम् । तत्र प्रसृतिपूर्वं कल्पना । यत्र तु योगेषु कल्कदिमानं उक्तं तत्र प्रथमतो बस्ति कल्पनयोक्त प्रमाणेन, पश्चादातुरहस्त प्रसृतमानेन दानमिति मुनीनां परमरहस्य प्रकटनम् । तस्मात्कल्पित बस्तिपलादिमानेन दीयत

इति वाग्भटीयं वचो बालप्रलपितप्रभुत्वमातनोति। एवं बस्तिदान विधि बस्तिव्यापत्प्रतीकारादि सर्वं। तथा नस्य धूमकवलादिकं तताऽश्चोतनपुटपाकतर्पणाञ्जनादिकं सर्वं विचारं न सहते पृथक्त्वान्न दर्शितम्। यतो मुनिरहस्य प्रकटने वाग्भटोक्त बस्त्यदिविधि वैयर्थं लोके ज्ञायते। नान्यथा रहस्यप्रकटनं यतस्ततः कर्तमुचितं न भवति। उपदेशरूपत्वात् मुनिरहस्यतां। तस्माद्येषानायुर्वेदोपदेशोऽस्ति तैरुक्तयादिशा सर्वं विलोक्य खण्डनयुक्तचा खण्डनीयम्। सर्वता सन्तुष्टः समयविरुद्ध तन्त्रदोष नृपतिः।

अत्रोच्यते—या त्वया तावदत्र निरूहद्रव्य प्रमाण विषय विरोधत्व वाक्यानां व्यवस्थाकृता यथा द्रव्य संयोजना पलद्वयपरिमितेन प्रसृतेनदानं त्वातुरसंमिति नेति तत्रावच्चिरन्तन सकल निबन्धन विरुद्धः। तथा च सुश्रुते जैज्जटादि टीकासु "निरूहमात्रा प्रसृताद्य माद्ये वर्षे ततोर्ध्वं प्रसृताभिवृद्धिः, आद्वादशास्यात्प्रसृताभि वृद्धिरष्टादशद्वादशते परं स्युः" इत्यादि वाक्यैस्सहास्थापन द्रव्यप्रमाणमातुरहस्त संमितेन प्रसृतेनेत्यस्य विरोधे विषय व्यवस्थोक्ता। यदातुरहस्तग्रहणं मध्यम पुरुषहस्तप्रमाणमभिप्रेतम्। न च हस्तप्रमाणपरमिदं वाक्यम्। किं तु उत्कर्षपरम्। सांवत्सरिकादारभ्याभिप्रेतम्। कुतोऽनन्तरश्लेकारम्भात्। "वर्षान्तिरेषु नेत्राणा बस्तिमानस्य चैव हि। वयोबलशरीराणि समीक्ष्योत्कर्षयेद्विधिम्॥ इति (सु. चि. ३५।८) तथा "स्नेहप्रमाणं परमं प्रकुश्चश्चात्र कीर्तितः।" (सु. चि. ३७।१०२) प्रकुश्चश्चपलम् अतएव नागार्जुनीयाः पठन्ति—'तेषामर्धप्रसृताभिवृध्या प्रतिवत्सरं द्वादशाभिर्वत्सरै षडेव प्रसृताः भवन्ति। तेन निबन्धाः अमण्डनात्त्वयैव स्वयं खण्डिताः। अस्तु चैतत्, कथं पलप्रमाणं न निरूहस्येति कथ्यताम्। ननूक्तमेव आस्थापनद्रव्यप्रमाणमातुरहस्तमितेन प्रसृतेनेति। तन्न, "आस्थापन प्रमाणं तु प्रस्थः पादोत्तरः परम्" इति पराशराद्यनेकवाक्यमूलत्वात्पल परिमाणस्य। न च तेषां ज्योतिष्टोमे अनिविशमानमाणस्योत्कर्ष भाजो द्वादशोपसत्वस्यैव मानुषास्थापन प्रकरणे निविशमानस्याप्युत्कर्षेण अजाव्याद्यास्थापनाङ्गत्वं न्याय्यम् न च पादोत्तर प्रस्थः तनूत्कृष्टमपि पादोत्तरतथा तद्विरुद्धम्। तत्रावकाशं लभते। तथा सुश्रुताचार्यैरपि —"आस्थापन द्रव्य प्रमाणं द्वादश प्रसृताः। (सु. चि. ३५।६) "तत्र द्विविधो बस्तिः नैरूहिकः स्नैहिकश्च इत्युपक्रम्योक्तं (सु. चि. ३५।१८) "यथा वयो निरूहाणां या मात्रापरिकीर्तिका।

पादावकृष्टास्ताः कार्याः स्नेहबस्तिषु देहिनाम् (सु. चि. ३७।४) नचाप्यातुरहस्तमितेनैव प्रसृतेनास्तु द्वादश प्रसृतेनेति वाच्यम् । अत्र निरूह ······ त्रिप्रसृतास्नेहबस्तिषु उत्तमा मात्रेत्युच्यते । सा च षट्पलपरिमितैव । तथा च तन्त्रान्तरम्—षट्पलं तु भवेज्ज्येष्ठा मध्यमा त्रिपली भवेत् । कनीयस्यर्धपलो त्रिधामात्रानुवासने ॥" तेन यस्य द्वादशप्रसृतस्य निरूहस्य चतुर्थोऽशस्त्रिप्रसृतः षड्भिः पलैः परिमितः । स निरूहे द्वादशप्रसृतः । कथं चतुर्विंशति पलस्याद-न्यथा उपदेशादेशयोर्विरोधापातादिति । तेनात्रैव विषयाऽव्यवस्था । आस्थापन द्रव्यप्रमाणमातुरहस्त संमितेनेव्यातुर विषयम् । स्वस्थ-वृत्त विषयमन्यद्वाक्य जातमिति । तत्र प्रसृतेष्वातुरेति विशेषणा-भावात् । अतएव **नागार्जुनीयाः पठन्ति**—"तेषामर्धं प्रसृताभिवृध्या प्रति संवत्सरं द्वादशभिर्वत्सरैः षडेव प्रसृता भवन्ति । ततः प्रसृता-भिवृद्धिः । तेनाष्टादशवत्सरस्य द्वादश प्रसृता भवन्तीति ।" न चात्र प्रसृतस्य आतुरपद विशिष्टत्वमस्ति । किं च **सुश्रुत** एव उत्तरबस्ता-द्विमात्रोक्ता एकः पलमिता अपरा तु स्नेहस्याङ्गुलीमूलसंमितेति । तद्यथा—'स्नेह प्रमाणं परमं प्रकुञ्चश्चात्रकीर्तितः । (सु. चि. ३७।१०२) तथा "निविष्ट कर्णिकं मध्ये नारीणां चतुरङ्गुले ।" (सु. चि. ३७।१०३) "तासामपत्य मार्गे तु निदद्याच्चतुरङ्गुलम् ।" (सु. चि. ३७।१०४) स्नेहस्य प्रसृतं चात्र स्वाङ्गुलीमूल संमितम् ।" (सु. चि. ३७।१०६) इति । न चात्र दानव्यतिरेकेणैकस्यैव स्नेहस्य पृथक् संयोजनं सम्भवति, तस्यानेकनिकष्टत्वात् । न तु स्वाङ्गुली-मूल संमितं इत्यत्र नारी प्रस्तापान्नारी विषयत्वमस्ति । स्नेहस्य-प्रमाणमित्यत्रत्वधिकारि विशेष निर्देशात् सर्वे विषयत्वमित्यविरो-धास्त्विति चेत् तदत्रापि संतोष्टव्यम् ।

इति वाग्भट मण्डने पञ्चदशं (अष्टादशं) प्रकरणम् ।

(एकोनविंशं प्रकरणम्)

अथ शस्त्र प्रकरणे भूयो विद्याधरः प्रत्यवतिष्ठते यथा––"षड्विंशतिस्सुकर्मारैर्घटितानि यथाविधि। शस्त्राणि रोमवाहीनि बाहुल्येनाङ्गुलानि षट्॥ (अ. हृ. सू. २६।१) अत्रतावत् प्रथमः संख्याविप्रतिपत्तिः, षड्विंशतित्वं मुनिसमये शस्त्राणां नास्ति। यदाह **सुश्रुतः**—"विंशतिः शस्त्राणि, तद्यथा मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्र मुद्रिकोत्पलपत्रिकार्धधारासूच्चीकुशपत्राटीमुख शरारिमुखान्तर्मुख त्रिकूर्चक कुठारिकाव्रीहिमुखारावेतसपत्रक बडिशदन्तशङ्कैषण्यः इति।" (सु. सू. ८।३) तथा सर्वमुनिसंमतं पुनर्वसु महर्षिणाग्निवेशं प्रत्युपदिष्टम् तथा **दृढबले** "अग्निवेशो हि मुनिभिः शस्त्राण्युक्तानि विंशतिः।" (?) तथा षडङ्गुलानीति वक्तव्ये वराकेण बिपरीतमुक्तम् शब्दसन्निवेशमपि न जानाति। एवं शस्त्रकर्म शस्त्रविचारणादि वाग्भटोक्तं समयविरुद्ध तन्त्रदोष पयोधिमग्नं सहृदयैरवगन्तव्यम्। तथान्यदपि सहृदयानां हास्यक्रीडानकम् जलौकसोऽधिकृत्य वाग्भटेनोक्तं "संपृक्ता दुष्टशुद्धास्रा जलौका दुष्टशोणितम्। आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव॥ (अ. हृ. सू. २६।४२) अत्र दृष्टान्तविरुद्ध तन्त्रदोषेणास्वाद्यते। तथा क्षीरनीर न्यायेन दुष्टं शुद्धरक्तं संपृक्तं नास्ति किंत्वन्यथा। यदाह **सुश्रुतः**––"दोषैः संश्रावितं रक्तं शुद्धस्योपरि तिष्ठति। तस्मात्सिरासुविद्धासु दुष्टमग्रे प्रवर्तते॥[1] (सु. शा. ८।१२) यदि क्षीरनीरन्यायेन संपृक्तं रक्तं भवेत् तदा घटछिद्र न्यायेन सिराभिः शस्त्रकृतद्वादशभिपृक्तमेवं चेत्। तथा दुष्टशुद्धबलक्षीण परीक्षा च न ज्ञायते। यथा क्षीरनीर संपर्के क्षीरं नीरं च न पृथक् ज्ञातुं शक्यते। तस्मात् सर्वत्र शस्त्रण वा जलौकाभिर्वा व्यधकृते प्रथमतो दुष्टरक्तं प्रवर्तते। तज्जलौकाभिः प्रथमत एव पीयते। तस्मात् जितमत्र दृष्टान्त वैभवतन्त्रदोष नृपेणेति। तथा "शूलं नर्तेऽनिलाद्दाहः पित्ताच्छोफः कफोदयात्। रागो रक्ताच्च पाकः स्यादतो दोषैः सशोणितैः॥" (अ.

---

1. This verse, in the extant edition (Chaukhambha Orientalia 4th Edn. 1980) runs as "यथा कुसुम्भपुष्पेभ्यः पूर्वं स्रवति पीतिका। तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्तते॥

हृ. सू. २६।६) इति रक्तपाक प्रतिपादिवाक्यकदम्बकेषु सहृदयै तन्त्रदोषेणात्रिभागो देयमिति । एवं सर्वं समयविरुद्धमुक्तम् ।

प्रकटित निजशौर्यं तन्त्रदोषैर्ग्रहैस्तै
सहसमय गृहीतं हिंसया वाग्भटं च ।
वचन नियममुच्चैरर्थ शून्यं वदन्तं
प्रभवति न हि कश्चिद्रक्षितुं भूमिभागे ॥

अत्रोच्यते––षड्विंशतिस्सुकर्मारैः इत्यत्र किं दूष्यम् । किमाचार्यसुश्रुतकृतेन विंशत्या मण्डलाग्रादि षड्विंशेभ्योन्येषां दन्तलेखनशलाकाकर्तर्यादीनां निर्मूलनथा शस्त्रव्याघात आपद्यते । किं वा संख्याविरोधात् समय विरोधः । न तावदाद्यः "चतुरस्रं समं चैव तीक्ष्णधारं समाहितः । वृत्ताग्रं तस्य कर्तव्यं शास्त्रं व्रीहियवाकृतिम् ॥ कपालिकं शर्करं च दन्तस्थां तेन शोधयेत् ॥" तथा––"अनुपूर्वायतां तीक्ष्णं प्रमाणेन दशाङ्गुलम् । त्रिभागो न चलत्यंशा जानोयात्कर्तरीं भिषक् ॥" तथा ॥ या ···· 'कर्तरी कीलहीना सकोला इत्येके । तस्याः द्वे दंशा केशदि विच्छेद हेतोरिति शङ्कुकीलः अष्टदन्तो नाभिमध्य घ्राणादसृगुपाहरेत् । सूच्याकर्णवेधनं वा कर्णौहिमागमे विध्येत् ।" इत्यादिना भोज भालुकि खरनादाद्युक्तत्वात् । शलाकयोश्च सुश्रुताचार्यैरेव दृष्टिरोगप्रतिषेधाध्याये––"उन्मील्य नयने सम्यक् सिराजालं विवर्जयन् । नाधो नोर्ध्वं न पार्श्वाभ्यां छिद्रेदैवकृते भिषक् । शलाकया च ताम्रस्य व्यधयेत् यववक्रया ॥" इति (सु. उ. १७।५८–९) शलाकया च ताम्रस्य व्यधयेदिति प्रोक्तत्वात् न चासौ यन्त्रभूयेति वक्तुम् । अष्टाविंशति शलाकायन्त्रेषु व्यधनानुपादानात् व्यधनं शलाका कर्मत्वात्तेन शाश्वतमेव । नाप्येषणी भेदः एपा एषणी लक्षण वैलक्षण्यात् । कूर्चस्तु सूची सन्निवेष एवेति । नापि संख्याविरोधात् समयविरोधः । बिंशतिश्शस्त्राणीत्यत्र विंशतित्वस्य प्रायिकत्वात्, तथा चाग्रे स्वयमाचार्यो वक्षति––"तेषां नामाभिरेव आकृतयः प्रायेण व्याख्याताः ।" (सु. सू. ८।६) इत्यवश्यं चैतदभ्युपगन्तव्यम् । अन्यथा शस्त्रप्रमाण निर्देशात् शस्त्रकर्माष्ट त्वादौ स्वतन्त्र तन्त्रान्तर विरोधयोर्दुष्परिहारत्वात् तथा हि "नखवर्धन्येषणीवष्टाङ्गुले, शेषाणि तु षडङ्गुलानि" (सु. सू. ८।७) इत्यस्य ह्ययमर्थः । निर्दिष्ट प्रमाणेभ्यो नखवर्धन्येषिणीं सूचीभ्योऽन्यानि मण्डलाग्रादीनि सप्तदश शेषाणि षडङ्गुलानीति । तथा हि करपत्रे भालुकिः––"द्वादशाङ्गुल दीर्घ

स्यात्तमु······जितकण्टकम् । करपत्रं विजानीयाद्भिषगाकृतिमानतः ॥" वृद्धिपत्रादिषु **गयदासाद्युदाहृतानि** तन्त्रान्तराणि **तद्यथा**– "सप्ताङ्गुल प्रमाणेन" इति । तन्त्रान्तरोक्त क्षुरशस्त्रस्यानुक्तमेव-स्यादिति **गयदासः** । "वृत्तं पञ्चाङ्गुलायामं कारयेत्कुशलो भिषक् । वृत्तं स्याद् दव्यङ्गुलं मध्ये कुशपत्रस्य लक्षणम् ॥ वृत्तं सप्ताङ्गुल विद्यात् तस्याग्रे फलमिष्यते । आटीमुख प्रकारं हि फलमङ्गुष्ट वायतम् । अष्टाङ्गुलं प्रमाणेन जिह्माधारमधारकम् । शस्त्रमन्त-र्मुखं नाम चन्द्रार्धमिव संमतम् ॥" अत्रैवाङ्गुलिशस्त्रस्यावरोध इति **जेज्जटः** । "अङ्गुलानि तथाष्टौ च शस्त्रंकार्यं त्रिकूर्चिकम् ; कुठारि काया भेदस्यात्सार्धसप्ताङ्गुलायतम् ॥ अष्टाङ्गुला तु विस्तारा कर्तर्या तु विशांपते ॥" वेतसपत्रे **भोजः**—"तीक्ष्णमङ्गुलि-विस्तारमष्टाङ्गुल समायतम् । अङ्गुलानि च चत्वारि वृत्तं कार्यं विजानता ॥" तथा **भोजः** "नखानां भेदने कार्यं शस्त्रमष्टाङ्गुला-यतम् ।" तथा **भालुकिः**—"मुद्रिकायातिबद्धं स्याद्वृद्धिपत्रस्य लक्षणम् ॥" "द्वयङ्गुलं मुद्रिका शस्त्रं क्षुरस्थानेति तीक्ष्णकम्" इति **भोजः** । "अर्धधारं तु कर्तव्यं शस्त्रमष्टाङ्गुलायतम् । करस्यङ्गुल विस्तारं द्वयङ्गुलं तु फलं भवेत् ॥" इति । तथा "मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च, वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्धधाराणि छेदने भेदने च, सूचीकुशपत्राटीमुखशरारिमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे, कुठारिका व्रीहिमुखारावेतसपत्राणि व्यधने सूची च, बडिशं दन्तशङ्कुश्चाहरणे, एषण्येषणे आनुलोम्ये च, सूच्यः सीवने, इत्यष्टविधे कर्मण्युपयोगः शस्त्राणां व्याख्यातः ।" इति **सुश्रुताचार्यै**-रुक्तम् । (सु. सू. ८।४) अत्र भेदनलेखन छेदन विस्रावण व्यधना-हरणैषणानुलोम्यसीवन भेदैर्नवधा प्रतीयन्त इति वचनविरोधः । तन्त्रान्तर विरोधस्तु स्पष्ट एव । तथा हि "शस्त्राणि तु षड्विंशति-र्भवन्ति, तद्यथा--दन्तलेखनमण्डलाग्रवृद्धि पत्रोत्पलपत्राद्यर्धधारा-मुद्रिकाकर्तरी सर्पवक्त्राकरपत्र कुशपत्राटीमुखान्तर्मुखशरारिमुखत्रि-कूर्चककुठारिका व्रीहिमुखशलाकावेतसपत्राराकर्णव्य धनसूची-सूची-कूर्चखजैषणीबडिशनखशस्त्राणि । तत्रत्रयमाद्यं मांसलेखने, वृद्धिपत्रा-दीनि त्रीणि पाटने, चत्वारि भेदने, मण्डलाग्रादीन्यष्टौ छेदने, कुश-पत्रादीनि पञ्च प्रच्छाने, कुठारिकादीनि षट् व्यधने, तेषामारा-व्रीहिमुखं भेदने छेदने च, सूच्यः सीवने, सूचीकूर्चं कुट्टने, खजोमथने, एषण्येषणे भेदने च बडिशो ग्रहणे, नखशस्त्रमुद्धरणे, भेदछेदप्रच्छानेषु

चेति द्वादशविधे शस्त्र कर्मण्युपयोगः। विशेषतस्तु दन्त लेखनं सुप्तबन्धवच्चतुरस्रं एकधारं दन्तशर्करालेखने॥" (अ. सं. सू. ३४।२१–२३) इत्यादिना तेन तावदत्रापि विरोधे तुल्यकक्षतया विकल्पः कल्पते। वस्तुरूपत्वान्न विकल्पते। अतएव शस्त्राणां तन्त्रान्तरोक्त परिमाणविरोधःप्रायो ग्रहणमात्रानुवर्तत इत्येवं भाव्य-जेज्जटगयदासादिभिरविरोधः समर्थितः। ततश्च यथा परिच्छेदके परिमाणे इति विरोधस्तथैव संख्यायामप्यस्तु विशेषाभावात्। तत-श्चैतत् तन्त्रयुक्तया सर्वमेवाविरोधेन प्रमाणीकर्तव्यम्। तदुक्तमाचार्य सुश्रुतेनैव—"मया बहुग्रन्थ भयात् योगोन्योपरोधः कृतः। द्रव्याणां तत्समाननां तत्रावापो न दुष्यति॥[1] प्रसंगाभिहितो यो वा बहुदुर्बल भेषजः। यथोपपत्ति तत्रापि कार्यमेव चिकित्सितम्॥" (सु. चि. १।१३५–१३६) तथा "एकं शास्त्रमधीयानो न विद्याच्छास्त्रनि-श्चयम्। तस्माद्बहुश्रुतः शास्त्रं विजानीयाच्चिकित्सकः॥" (सु. सू. ४।७) इति। भट्टपादैरप्यवादि—"सर्वाण्येव हि शास्त्राणि स्वप्रदे-शान्तरैः सह। एकवाक्यतया युक्तमुपदेशं प्रतन्वते। इति (तन्त्र-वार्तिक ३।१)" शास्त्राधिक्य विवादेषु जीगोषोस्तेन भूषणम्। वाग्भटस्य भटस्येव न च सिन्धोकलानिधेः। एतदभिप्रेत्यैव बाहुल्ये-नेत्युक्तवानाचार्यः। संपृक्तत्वं मिलितत्वम्, तत्र मिलितयोर्द्वयोः द्रव्ययोः एकस्योदाहरणे क्षीरनीर दृष्टान्ते किमनुचितम्। नह्यूर्ध्वा-घोःभागावस्थानेऽपि संपृक्तत्वाभावः। शेषस्तु प्रपञ्चः फल्गुतया उपे-क्षणीय एवाविचक्षणानामिति।

प्रकटितनिज शौर्यान्, तन्त्रदोषग्रहांस्तान्
वियति विचरतोमून्वाग्भटे सौरनुन्नान्।
सपदिविहित सन्तस्तत्प्रबन्धैस्सबन्धैः
जयति तदनुसारं मुद्रया नारसिंहः॥

इति वाग्भटमण्डने पञ्चदशं (एकोनविंशति) प्रकरणम्।

। इति सूत्रस्थानोद्धारः।

---

1. In the extant edition (Chaukhambha Orientalia 4th Edn. (1980) this verse runs as "योऽल्पौषधकृतो योगो बहुग्रन्थभयान्मया। द्रव्याणां तत्समानानां तत्रावापो न दुष्यति॥
(सु. चि. १।१३५)

(विंशतितमं प्रकरणम्)

अथ शारीरे भूयो विद्याधरः प्रत्यवतिष्ठते । यथा--

पूर्वैर्व्यासतया सुभाषिततया द्वात्रिंशदुक्ताद्विधा
योगिन्यः खलु युक्तयोऽपि विदिता यास्ताश्चतुःषष्टिताम् ।
रक्षार्थं विकसन्ति तत्र भुवने भक्तया नामस्कृत्यताः
शारीरं प्रविभज्य वाग्भटपशोस्ताभ्यो बलिर्दीयते ।।

अथा हि--"अथाऽतो गर्भावक्रान्ति शारीरं व्याख्यास्यामः, इति हस्माहुरात्रेयादयो महर्षयः ।।" (अ. हृ. शा. १।१) इति सूत्रस्थानानन्तरं ग्रन्थो वाग्भटस्य । अस्यार्थः--अतस्सूत्रस्थानानन्तरं शारीरं व्याख्या स्यामः इति । तच्चानुपपन्नं, सूत्रस्थानानन्तरं निदानस्यैव वक्तुमुचितत्वात् । तदुक्तमाचार्यद्वयतो । द्विविधमायुर्वेदप्रयोजनमुक्तमाचार्यैः । सूत्रस्थाने व्याधितानां व्याधिपरिमोक्षः स्वस्थस्यरक्षणं च । सूत्रस्थान सूचितानां स्थानान्तर एव वाच्यत्वात् व्याधिपरिमोक्षोपाय भूतत्वात् चिकित्सायाः । यदुक्तं **चरकाचार्यचरणैः**--"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् । ततः कर्मभिषक् पश्चात् ज्ञानपूर्वं समाचरेत् ।। (च. सू. २०।२०) न च केनापि महर्षिणा अयं संहिताक्रमभङ्गः कृतः । तदेतेनेतिहस्माहुरात्रेयादयो महर्षयः इति प्रतिज्ञा हानिः । एतच्च सविस्तरं निदानस्थान खण्डनप्रस्तावे दर्शयिष्यामः । गर्भावक्रान्तीत्युक्तम् । ततो गर्भ शब्देन किमुच्यते । गर्भस्वरूपं प्रतिपादयन्नाह--"शुद्धेशुक्रार्तवे सत्वः स्वकर्मक्लेशचोदितः । गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ।। (अ. हृ. शा. १।१) अत्रानुयुज्यतो सत्वशब्देन किमुच्यते । तत्र गुणवाचक सत्वशब्दस्य नपुंसकत्वात् पुंस्त्वनिर्देशाच्चात्मवाचकोत्र सत्वशब्दः इति वाग्भट पाठकेनोक्तम् । एतच्च सिद्धान्त विरुद्धम् । नह्यायुर्वेदे सत्वशब्देन आत्मोच्यते । तथा हि **चरकाचार्यचरणानामादेशः**--"तत्र पूर्वं चेतना धातुः सत्वकरणो गुणग्रहणाय प्रवर्तते; स हि हेतु कारणं निमित्तमक्षरं कर्तामन्तावेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्माविश्वरूपः पुरुषः प्रभावोऽव्ययो नित्यो गुणी ग्रहणं प्रधानमव्यक्तं जीवो ज्ञः पुद्गलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति ।।" (च. शा. ४।८) **सुश्रुताचार्य**-

चरणैरथादेशि—"क्षेत्रज्ञो वेदयिता स्प्रष्टाघ्राताद्रष्टा श्रोतारसयिता पुरुषः स्रष्टा गन्तासाक्षी धाता वक्ता यः कोऽसाविल्येवमादिभिः पर्यायवाचकैर्नामभिरभिधीयते···।। (सु. शा. ३।४) न चात्र सत्व-शब्दः पुरुष वाचकः केनाप्यभाणि। तस्मात् सिद्धान्तविरुद्ध तन्त्र-दोषव्याघ्रेण प्रसारितं मुखम्। अत्र कुशकाशावलम्बनेन वाग्भटकृते न तु आयुर्वेदसंज्ञयैव व्याहर्तव्यमिति नियमो नास्ति, शास्त्रान्तर संज्ञयापि व्यवहार दर्शनात्। बौद्धसिद्धान्ते हि सत्वशब्देनात्मा उच्यते। सत्यं, युज्यते हितावबोध संज्ञयाव्यवहर्तुम्। यस्य क्रमभङ्ग प्रतिज्ञाभङ्गसिद्धान्त विरुद्धतन्त्रदोषाभिभूतस्यापि तच्चेतसि लज्जा-भवत्। तावत्प्रविश बौद्धशरणम्। तथापि शिरसिपदं दत्वा बौद्धै-र्म्मह जीयसे। श्रुणुतावत्सावधानो भूत्वा। क्षणिक भावसमुदाय एव आत्मा बौद्धानाम्। तत्र च सत्वशब्दः तै सङ्केतितम्। यदुक्तं फणीश्वरचरणारविन्दैः—"न ते तत्सदृशास्त्वन्ये पारंपर्यसमुत्थिताः। सारूप्याद्ये त एवेति निर्दिश्यन्ते नवानवाः।। भावास्तेषां समुदयो निरीशः सत्वसंज्ञकः। कर्ता भोक्ता न स पुमानिति केचिद्व्यव-स्थिताः।।" (च. शा. १।४६-४७) अस्यार्थः—परम्परया प्रदीप-कलिकासन्तति न्यायेन समुत्पन्ना भावास्ते पूर्वे न भवन्ति, किं तु तत्सदृशा अन्ये परे ते भावाः। ये भावा नूतना एते तं एनं पूर्वा-एवेति निर्दिश्यन्ते। यदन्ये ते कथं तर्हि त एव ते इति निर्दिश्यत इत्याह सारूप्यात्सादृश्यात् क्षण विनाशिनोऽपि त एवैते इति भण्यन्ते। तेषां च भावानावदनादि संस्कार········समुदायो मेलकः सत्वसज्ञकस्सत्वशब्द वाचकः। कीदृशोमेलकः इत्याह—निरीश-स्तस्यमेलकः। कर्ता स्वामी कोऽपि नास्ति। स एव सत्वनामा भावसमूहः कर्ता भोक्ता पुरुषः इति सौगतानां व्यवस्थाया बलेन वाग्भटो गर्जते। अत्र कृत नाशाकृतभ्यागमदोषबल द्वयं पुरस्कृत्य खण्डनयुक्ति योगिनी महाप्रभावीइषुः श्रीचरकाचार्यचरणैः प्रयुक्ता धीरैरेव धार्यताम्। "तेषामन्यैः कृतस्यान्ये भावा भावैर्नवा फलम्। भुञ्जते सदृशाः प्राप्तं यैरात्मा नोपदिश्यते।। (च. शा १।४८) अस्यार्थः—यैः सौगतैः आत्मा भावसमुदायस्वामिनोपदिश्यते तेषां बौद्धानामन्यैर्भावैः कृतस्य कर्मणः प्राप्तं फलमन्ये ते नूतनाः सदृश-भावात् भुज्यते। यैः कर्मकृतं तेषां विनष्टत्वात्। अतएव तेषां कृतप्रणाशः। ये चान्ये नूतनाभावा जातास्तैरकृतकर्मफलमुपभुज्यते। अतएव कृतनाशाकृतागम दोषः तेषाम्। अपरं च कर्तृं करणैक

भूयता दोषं दर्शयन्" "करणान्यान्यता दृष्टा कर्तुः कर्ता स एव तु। कर्ता हि करणैर्युक्तः कारणं सर्वकर्मणाम् ॥" (च. शा. १।४९) येन समुदायेन करेणभूतेन कर्मकृतं यो स एव भावसमुदायो यतः कर्ता करणं सर्वकर्मणि कारणं, स करणैः चक्रचीवारादिभिर्युक्तः कर्मकृतः तस्माद्भिन्नानि कर्तृकरणानि गवेषणे। यस्मिन्नेव क्षणेकर्म-कर्तव्यं तस्मिन्नेवोपभोगोऽपि भविष्यतीत्याशङ्क्याऽऽह--"निमेष-कालाद्भावानां कालः शीघ्रतरोऽत्यये।" (च. शा. १।५०) यैर्भावैः कर्मकार्यं भोक्तव्यं च तेषां भावानां अत्यये विनाशे च कालस्सनिमेष कालात्। तस्मादेक क्षणे कर्मोत्पत्त्युपभोगौ न भवतः सूक्ष्मत्वात्क-र्मणः। यैरैव भावै कर्मकृतं कालोपभोगकाले ता एव भावा उत्पद्यन्ते इत्याशङ्क्याह--"भग्नानां न पुनर्भावः कृतं नान्यमुपैति च।" (च. शा. १।५०) विनष्टा भावस्त एनं पुनः नोत्पद्यत इत्यर्थः विनष्ट घटादिवत् अथ पूर्वभावो यद्यपि विनष्टः तथापि तत्कृतं कर्म उत्तरेषु भावेष्वनुवर्तिष्यते इत्याशङ्क्याह--"कृतं नान्य मुपैति च।" (च. शा. १।५०) अपरकृतं कर्मारम्भो········तेनैव सह विनष्ट-त्वात्। भावानां क्षणिकत्वादेतत्सर्वं न घटते। अधुना खण्डयित्वा उपसंहरति--"मतं तत्वविदामेतद्यस्मात्तस्मात्सकारणम्। क्रियोप-भोगे भूतानां नित्यः पुरुष संज्ञकः ॥ (च. शा. १।५१) नित्याऽस्थि-रत्वे प्रमाणमाह--"अहङ्कारः फलं कर्म देहान्तरगतिः स्मृतिः। विद्यतेसतिभूतानां कारणे देहमन्तरा ॥ (च. शा. १।५२) देहव्य-तिरिक्त आत्मसंज्ञे सति अहङ्कारादयः सम्भवन्तीत्यर्थः नित्यत्वादा-त्मनो देहान्तर गतिः पूर्वानुभूतस्मरणं कर्मफलादिकं च सर्वमुप-पद्यते। तस्मात् सत्वशब्देन यादृशः पुरुषो वाच्यः स पुरुषः एव न भवति। सर्वैराचार्यैस्सर्वप्रमाणैर्निराकृतत्वात्। तस्माद्वाग्भट पाठको बौद्धैः सह गङ्गातटाके······। तस्य तु यच्च पुरुषस्वरूपं न जानाति।

तथा "स्वकर्म क्लेश चोदितः" इत्यपि न संगच्छते। कर्मणां फलं क्लेशः। स चेत्पूर्वं जातः किमर्थमात्मा प्रेर्यतेगर्भाशयवासादिभिः, क्लेशो हि पश्चाद्भविष्यति। अथ स्वकर्मणां क्लेशाय चोदित इति चेत् तदपि अयुक्तम्। धर्मफलस्य सुखस्यापि विद्यमानत्वात्। न ह्येकेन पापकर्मणा शरीरारम्भः। तस्मात् अधिक तन्त्रदोषत्व-मागतमत्र।

तथा "युक्तिवशादग्निरिवारणौ" इति दृष्टान्ते सप्तमी निर्देशात्

कस्स्थानीयोऽग्नि का च केन सह युक्तिरिति विचार्यमाणं सर्वं पलालकल्पमिति प्रमाणाननुगृहीत तन्त्रदोषेण जितम्।·····विदुषां विनोदाय क्रीडनकानि।

"बीजात्मकैर्महाभूतैस्सूक्ष्मैस्सत्वानुगश्च यः। मातुश्चाहार रसजैः क्रमात्कुक्षौ विवर्धते॥" (अ. हृ. शा. १।२) इति। अस्यार्थः—स गर्भः कुक्षौ क्रमाद्विवर्धते इति कारणान्याह महाभूतैः पृथ्वादिभिः, कीदृशैः बीजात्मकैः शुक्रशोणितरूपैः तथा मातुराहाररसजैः एतैश्च सर्वैः संवर्धते इति। तत् सिद्धान्तविरुद्धम्। यतः शुक्रशोणितरूप महाभूतानि गर्भरूपेण परिणितानि वर्धनीयानि तान्येव च न कारणानि इति विरुद्धम्। यानि चात्मानुबन्धानि तानि आतिवाहिकदेह रूपाणि न वर्धनीयानि। तानि हि न वर्धन्ते न क्षीयन्ते स्तदेकरूप रूपाणि। भूतानि रसजैर्भूतैर्विवर्धन्ते। एतत्तु गर्भेषु रूपम्। यदुक्तं **चरकाचार्यचरणैः**—"रसात्ममातापितृ संभवानि भूतानि विद्यात् शषट् च देहे। चत्वारि तत्रात्मनि संश्रितानि स्थितस्तथाऽऽत्मा च चतुर्षु तेषु॥ भूतानिमातापितृ संभवानि रजश्च शुक्रं च वदन्ति गर्भे। आप्याय्यते शुक्रमसृक च भूतैर्यैस्तानि भूतानि रसोद्भवानि॥ भूतानि चत्वारि तु कर्मजानि यान्यात्मलीनानि विशन्ति गर्भम्। स बीज धर्मा ह्यपरापराणि देहान्तराण्यात्मनि याति याति॥" (च. शा. १।३३–३५) तस्मात् सिद्धान्त विरुद्धेन जितम्।

तथाऽन्यदपि पूर्वमभाणि—"तेजो यथाऽर्करश्मीनां स्फटिकेन तिरस्कृतम्। नेन्धनं दृश्यते गच्छत्सत्वो गर्भाशयं तथा॥" (अ. हृ. शा. १।३)······तेजसस्तदाविर्भावोऽपि न घटते; स्फटिकं हि तिरस्कारे कारणं न भवति किं तर्ह्याविर्भावे। तस्मात् दृष्टान्तदार्ष्टन्तिक विरोधः। तत् सर्वतन्त्रदोष कारणैर्जितमिति॥

श्री दक्षिणामूर्तये नमः

पृष्ठावलम्बिनोदीर्घजटाः प्रस्निग्धपाटलाः।
वितत्य भुवनासीनं वटमूले विचिन्महे॥

अत्रोच्यते—सूत्रस्थानसूचितानामर्थानां स्थानान्तरेषु प्रकटनमित्युचितमेवाह भवान्। पापज्ञाने शरीरे निदानेन कस्य रोगो निर्णेतव्यः, चिकित्सितेन कस्य निवार्यः। नेतरेषां स्थानानां प्रवृत्तिसिध्यर्थं प्रथमत उपोद्घातलक्षणया संगत्या शारीरस्थानारम्भो न्याय्य एव। नापि मनिक्रमदोषस्सुग्रहत्वतायान्यथाक्रमकारस्या चार्येणादावेव

प्रतिज्ञातत्वात्। तदुक्तं **संग्रहे**—"न मात्रामात्रमप्यत्र किंचिदागमवर्जितम्। तेऽर्थास्सग्रन्थ बन्धश्च संक्षेपाय क्रमोऽन्यथा॥ (अ. सं सू. १।२०) तथा हि **चरके** सूत्रस्थानानन्तरे निदानं ततो विमानस्थानं ततः शारीरं ततः इन्द्रियस्थानं ततो रसायनं, ततः चिकित्सादीनि। **सुश्रुते**ऽपि सूत्रनिदानशारीर चिकित्सादि स्थानक्रमः। **खरनादे** तु सूत्रनिदान विमानशारीरेन्द्रियादिक्रमः। भोजादिषु तु पुनः अन्यथैव। स च ग्रन्थविस्तरभयान्नलिखितः। अतः युक्त एव सूत्रस्थानानन्तरं शारीरस्थानम्।

अथ "शुद्धेशुक्रार्तवेसत्वः स्वकर्मक्लेश चोदितः। गर्भः संपद्यते युक्तिवशादग्निरिवारणौ॥" (अ. हृ. शा. १।१) इत्यत्र सत्वशब्दस्यात्म वाचकत्वं मुनिमतानुसारित्वादनुपन्नमिति चेत् न। किं सत्वशब्दस्य आत्मवाचकत्वादपार्थं तन्त्रदोषः आपद्यते। किं वा सत्वपदं नात्मनि प्रयोज्यमिति सर्वमुनि सिद्धान्तः। अतस्तदिक्रमात्सिद्धान्त विरोधः, नाद्यः, "सत्वं गुणेऽपि शौचादौ बले द्रव्यस्वभावयोः। आत्मत्वे व्यवसायासु वित्तेष्वस्त्रीषु जन्तुषु॥" **इत्यभिधान** सिद्धत्वात्। (मेदिनीकोश १५६-२८) प्रयोजितं सत्वपदं···आत्मनः **व्यासादिभिः**। यथा च सौप्तिके पर्वणि "रात्रिचराः ये सत्वास्ते निद्रा चैव समागताः।" (महाभारत) तथा **कालिदासादिभिरप्य**वादि—"ऊनं न सत्वेष्वधिको वबाधे तस्मिन् वनं गोप्तरि गाहमाने।" (रघुवंश २।१४) तथा "सत्वानामुपलक्ष्य ते विकृतिमच्चित्तं भयक्रोधयो" रित्यादि। नापि द्वितीयः—"शुद्धे स्थिरे बीजभूते रक्ते योन्याश्रये स्त्रियः। पुंसो हर्षं भवं शुक्रमदुष्टं युज्यते यदा॥ शुक्रशोणितसंयोगास्स्वकर्मफल चोदित। संयुज्यते यथा सत्वं सूक्ष्मभूत समन्वितः। गर्भस्संपद्यतेयुक्तिवशादिह हुताशनात्॥" इति गर्भावक्रान्तीये शारीरे **खरनादेनोक्तत्वात्**। तथा कतिधापुरुषीये "खादीनि पञ्चभूतानि षष्टस्सत्वमथाक्षरम्। एषां समुदायकर्मनियमात्पुरुषः स्मृतः॥" इत्युक्तम्। अत्र चात्मा व्यभिचारि लिङ्गादक्षरत्वात् सत्वपदमात्मपरमेव गम्यते। तस्मान्नकश्चिद्दोषः शुद्धेशुक्रार्तवे इति पद्ये। तेन······अनुयोज्यानुयोग निग्रहाद्दुर्निग्रह युक्तिः संघटन तन्त्रचारिणि दृष्टान्तः साधुरेव। तथा बीजात्मकैर्महाभूतैरित्येतत् **महर्षेः खरनादस्यैव** वाक्यं दूषयता त्वया चरकसुश्रुत व्यतिरिक्त संहितापाठमात्रराहित्यमात्मनः प्रकटितम्। किं च "आप्याय्यते

शुक्रमसृक् च भूतैर्यस्तानि भूतानि रसोद्भवानि ॥" (च. शा. २।३४) इत्यस्य चरक वाक्यस्यैतर भूतानां न गर्भवृद्धिनिषेधपरत्वम्। किं सर्वशेषत्वात्। तथा च चरनादे—"मातापितृ रसात्मजैः भूजलाग्न्यनिलैस्सूक्ष्मैर्युक्तं वै······तूपजीयते। सत्वं योनि······न्यात्मजानि हि। शुक्ररक्ते हि भूतानिस्युर्मातापितृजानि तु। रसजान्यपि चत्वारियैर्मूर्तिर्विवर्धते क्रमात् ॥" इत्यविशेषेणैव भूतानां गर्भवृद्धिहेतुत्वमभिहितम्। तेन चरकवाक्य तात्पर्यं न जानीथेत्ततश्च त्वया महताप्रयासेन वाग्भटखण्डनं कपटेन मुनिनेव स्वैरं दूषयता वेदबाह्यतया स्वस्यैव विबुधानां पुरोविस्मार्यते बुद्धशिष्यतेति।

इति वाग्भट मण्डने विंशतितमं प्रकरणम्

(एकविंशतितमं प्रकरणम्)

अथ पुनरपि विद्याधरः प्रत्यवतिष्ठते । यथा हि "बस्तिद्वारे विपन्नायाः कुक्षिप्रस्पन्दते यदि । जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ॥" (अ. हृ. शा. २।५३) इति । बस्तिद्वारे पाटयते इति नियमो नास्ति निरर्थकत्वात् । तस्मात्......पाठान्तरं साधु । यदुक्तं सुश्रुताचार्येण--"बस्ति द्वारे विपन्नायाः कुक्षिप्रस्पन्दते इत्यदि ।[1] अपर प्रकारेण च कुक्षिस्पन्दो न घटते ।

तथा--"अस्थ्नां शतानि षष्ठीनि[2] त्रीणिदन्तनखैः सह ।" (अ. हृ. शा. ३।१५) अत्र षष्ठीनि इत्यपशब्द वज्रेणहृतः ।

तथा--"कफपित्तंमलाः खेषु प्रस्वेदो नखरोम च । स्नेहोक्षित्वग्विशामोजो धातूनां क्रमशोमलाः ॥ (अ. हृ. शा. ३।६३) : अत्र ओजसो मलत्वं ब्रुवाणो वाग्भट पाठको बोधयति । यद्वाग्भटस्य ब्रवतो मुखविवरात् मलमेव निस्सरति । अत्र ओजोऽपि धातूनां काष्ठापन्नं परमं तेजः । यदुक्तं सुश्रुताचार्येण—"तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजः, तदेव बलमित्युच्यते स्वशास्त्रसिद्धान्तात् ॥ "(सु. सू. १५।१९) ओजस्सोमात्मकं स्निग्धं शुक्लं शीतं सरं स्थिरम् विविक्तं मृदुमृत्स्नं च प्राणायतनमुत्तमम् देहस्स्यावयवस्तेन व्याप्तो भवति देहिनः ॥ (सु. सू. १५।२१)" श्रीचरकेणाप्यभाणि--"हृदि तिष्ठति यच्छुद्धरक्तमीषत्स पीतकम् । ओजश्शरीरे संख्यातं तन्नाशान्नाश मृच्छति ॥ भ्रमरैः कमलपुष्पेभ्यो यथा संभ्रियते

---

1. In the extant edition (Choukhamba Orientalia. IV edn. 1980 this verse reads differently as "बस्तमार विपन्नायाः कुक्षिः प्रस्पन्दते यदि । तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक् ॥ (सु. नि. ८।१४)

2. The term 'षष्ठीनि' is found in some manuscripts of Asthangahrdaya as mentioned in the foot notes in the printed text (Chowkhamba. 1982 Edn.). It has been replaced with the term 'षष्ठिश्च' in the text.

मधु । एवमोजस्स धातुभ्यो गुणैः संभ्रियते हृदि ॥[1] (च. सू. १७।७५ (१)) धातुमलानि च पठ्यन्ते महर्षिभिः तथाप्युक्त सुश्रुताचार्यैः - "कफःपित्तं मलः खेषुस्वेदस्स्यान्नखरोम च । नेत्रविट्त्वक्ष च स्नेहो धातूनां क्रमशोमलाः ॥" (सु. सू. ४६।५२६) अत्र षड्धातूनां मलान्तरान् वाग्भटो वक्तुमात्मचपलतामातनोति । यथोजसो मलत्वं न स्वीक्रियते कस्तदा शुक्रस्यमल इति चेत् न कोऽपि शुक्रस्य निर्मलत्वात् सहस्रधौत सुवर्णवत् । अयमपि वाक्यजालकं सिद्धान्तविरुद्ध तन्त्रदोष व्याळ व्याळीढः ।

अथ च—"समस्समाने स्थानस्थे विषमोऽग्निर्विमार्गगे । पित्ताभिमूर्च्छिते तीक्ष्णो मन्दोऽस्मिन्कफपीड़िते ॥ (अ. हृ. शा. ३।७३) अस्यार्थः—समाने वाते समोग्निः भवति विमार्गगे समाने वाते विषमो भवति । एतदपि वाक्यं न परीक्षामयं यतोग्न्यधिष्ठाने समोग्निर्भवतीत्यायुर्वेद सिद्धान्तः । यदुक्तं भगवता भोगीश्वरेण— "पित्तलानां तु पित्ताभि भूतेऽग्न्यधिष्ठाने तीक्ष्णाभवन्त्यग्नयः; श्लेष्मलानां तु श्लेष्माभिभूतेऽग्न्यधिष्ठाने मन्दाभवन्त्यग्नयः ॥" (च. वि. ६।१२) अथ समान शब्देन सममुच्यते उपचारात्समस्थानं चाग्निस्थानमेव । तथाग्निस्थानमेव समानेत्युक्ते लभ्यत इति चेत् युक्तमुच्यते······विशेषेणग्नां का गतिः । स्थानमेव स्थानस्यान्नविमार्गगतत्वम् । अर्थप्रतीति हि शब्दाद्विमार्गादि शब्देषु कोप्यभिधादि वाऽपरो न लक्षते । प्रसङ्गानुप्रसङ्गेन अयं विमर्शो वर्धिष्यते । तस्मात् सहृदयैर्युक्त मार्गेण सर्वमवधारणीयम् । किं च समान स्थानमेवाग्न्यधिष्ठानमिति सिद्धान्तो न भवति । नाभिस्तनान्तर मध्यमामाशयः, तत्र वातश्लेष्माग्निश्चतिष्ठन्ते । एतावतास्थानैक्यमिति न भवति । एकस्मिन्नप्यामाशये आशयविशेषस्थानानि भिन्नानि सर्वेषाम् । यदुक्तं 'वामाग्निग्रहणीगुद श्चेत्येवमादि' । तथा सुश्रुताचार्यादुपदेशोऽपि— "ततः पादशतं गत्वा वामपार्श्वेन संविशेत् ॥" (सु. सू. ४६।४८७) वामपार्श्वाश्रयत्वादग्नेः समग्रोऽप्याहरराशिरन्नः उपरि पतित्वा ऊष्माणं प्राप्नोति । तस्मादत्र जितं सिद्धान्तविरुद्धेन तन्त्रदोषेणेति ।

अत्रोच्यते—"बस्तिद्वारे विपन्नायाः" इत्यत्र विपन्नायाः यदि

---

1. This verse, in the extant edition of Caraka Samhita reads as "भ्रमरैः फलपुष्पेभ्यो यथा संभ्रियते मधु । तद्वदोजः स्वकर्मभ्यो गुणैः संभ्रियते नृणाम् ॥

बस्तिद्वारे विपाटयाह्रियते शिशुस्तदा बस्तेर्गर्भनिष्क्रमक्लृप्तद्वारतया शिशो········सन्देहमप्यापदा हरणमन्यथा तु सन्देहमिति। महानस्ति विशेषः। किं च यदि बस्तिद्वारविपन्नाया··· ····जीवितापि शिशोराहरणमनुक्रमोवस्यादिति शस्त्रस्याल्पविषयत्वमापद्येत। अत एव **नागार्जुनाः**—"यैर्बस्तिद्वार इति पठयन्ते। तेन न किंचिदुपपन्नम्।

······नापि" अस्थनाशतानि षष्ठीनी "इत्यत्र दूषणं······ ······वाक्यत्वात्। तथा चाह **आचार्य खरनादः** शारीरे—"अस्थ्ना त्रीणिशतानिषष्ठीनि सहदन्तनखैरिति।" अत्र शिश्याणां सुग्रहत्वाय पद्यवचनमाचार्यस्य। किं च षष्ठानीत्यत्र मत्वर्थीयत्वादप्रत्ययस्य साधुत्वम्। तथा च **महाभाष्ये**—वृद्धि न ह्येतयोरावश्यकः समावेशः। (महाभाष्य १-१-३) इत्युक्तम्। अत्र **कैयट** व्याख्या—अवश्यकमस्मिन्नास्तीति। तथा हि संप्रसारणमभ्यस्तस्येत्यत्र सूत्रे भगवता भाष्यकृतैर्वभाणि—"अथावकाशे मत्वार्थे योऽभ्यस्तमस्मिन्नस्तीत्यभ्यस्तमिति।"

नापि "कफपित्तमलाः खेषु" इति यत् सा वच्यम्। यथा हि तत्र "रसादीनां शुक्रान्तानां धातूनां परमं तेजः स खल्वोजः तदेव बलमित्युच्यते" (सु. सू. १५।१९) इति **सुश्रुत** वाक्यस्य न यथाश्रुतोऽर्थो गृहीतुं शक्यते स्वपरतन्त्र विरोधात्। तत्र स्वतन्त्र विरोधः यथा—"प्राणिनां पुनर्मूलमाहारोबलवर्णौजसामिति" (सु. सू. १।२८) न घटते। यस्मात् ओजःकार्यं बलेकारणारोपोऽयं। यदाह **गयदासः**—"कार्येकारणमारोप्यं तत्वमीमांसनार्थिभिः। भेदोऽप्यभेदमिच्छन्ति वह्निपावकोरिव॥ बलस्य शक्तिरूपत्वाद्गुणानामप्रदर्शनात् दर्शयन्मूलमाहारो बलवर्णौजसाम्॥" इति। परतन्त्र विरोधस्तु **जैज्जटोक्त** तन्त्रान्तर **खरनादादि** वाक्यैः। तद्यथा—"रसश्चोजश्च संख्यातो जीवशोणित मप्योजश्शब्देनामनन्ति श्लेष्माणमप्यविकृतम्" इति। **चरके**ऽपि—"प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते। सचैवोजः स्मृतः काये स च पाप्मोपदिश्यते॥ (च. सू. १७।११७) इति। **खरनादे**तु—" वातपित्तकफा दोषा स्तद्दूष्यास्सप्तधातवः। मलालसीका ओजश्च···।" इति। **क्षारपाणिस्तु**—"त्वग्रोमनखदन्तादीन् बाह्यान्येतान्मलान्विदुः। अन्तर्मलस्स वातादिविण्मूत्रस्स रसास्तथा।" इति रसावोजः सप्तधातुरूपस्य रसस्य पृथगुपादानात् रसशब्दश्चोजसि मुनिसंमत एव। **चरकादिषु** तु—"यत्सारमादौगर्भस्य यत्तद्गर्भरसाद्रसः। संवर्तमानं

हृदयं समाविशति देहिनः। यच्छरीर रस स्नेहः प्राणो यत्र प्रतिष्ठताः॥" (च. सू. ३०।१०–११)। तथा—"जीवात्मकस्योजसो अष्टौ बिन्दवो हृदयमनुप्रविष्टाः। (तन्त्रान्तर वचनम्) इत्यादि। न च सारत्वमलत्वयोरेकत्तावत् स्थितरूप विकल्पः कल्प्यः इति **आचार्य जैज्जटेनैव** व्यवस्थापितो विषयः। यथा—"तस्मात् परमोजो हृदयस्थमष्टबिन्दुकमभिप्रेतम्। "तत् परस्योजसः स्थानं तत्र चैतन्यसंग्रहः।" इति (च. सू. ३०।७) **हेमाद्रिणातु** वाग्भट टीकायां—"यत्सारमादो गर्भस्येति" (अ. हृ. सू. ११।३७–३८) श्लोके आयुर्वेद रसायन व्याख्या) तथा शुक्रात्गर्भः प्रसादजः" (च. चि. १५।१६) इति **चरक** वाक्यानुसारेणैकस्यैवोजसो गर्भापेक्षया मलत्वमिति सारापेक्षया तु सारत्वमित्यादि विरोध परिहारः। तेन सर्वधातुजत्वेऽपि विशेषात् शुक्रस्नेहत्वादोजसः शुक्रवर्णादिभिरेव वर्णादिकं बोद्धव्यमित्यादि **गयदासाद्युदाहृत** वाक्यानुसारादुचितमेवाचार्यः। यदोजसः शुक्रमलमिति वीक्ष्यं तस्य **प्रपञ्चोऽस्मद्वाग्भटीय निबन्धने** विस्तार्यते। नेहग्रन्थविस्तर भयात्।

नापि "समासमाने संस्थाने" इत्यत्र विरोधः। **यतोऽग्न्यधिष्ठान शब्देन** समान एवाभिधीयते। शाक पार्थिवत्वा**न्मध्यमपद** लोप समाश्रयणात्। तथा हि अग्नेरधिष्ठानं यस्यासा**वग्न्यधिष्ठान** समान इत्यर्थः। समानस्य पित्तस्थानस्थितत्वात्पित्त**वह्नोश्च स्थानैक्या**दिति। न च समानस्यं पित्तस्थानत्वाभावात् इदमनुपपन्नमिति युक्तम्। तथा "जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्म्याद्रसानाददानो विवेक्तुं नाहि शक्यते॥ (सु. सू. ३५।२७) इत्यत्र **गयदासाचार्येण** औदरस्याग्ने कथं ईश्वररूपस्य मान्द्यादयो विशेषाः भवन्तीत्याक्षिप्य प्राणिकार्यवशादन्त राश्रय भूत पित्तविधानेनाश्रितस्यापि वह्नेर्विघात इत्युक्त्वात्र संयोग श्लोकः पठिता।" अग्नेपरम सौक्ष्मेऽपि पित्तस्थानस्थितस्य विशेषकर्म संभूताद्विधा तदाश्रयस्य चेति। तेन वह्निपित्त योस्तावत् स्थानैक्ये न विवादः। अथोदौर्यस्याग्नेः बाह्याग्निवत वायुसहायत्व प्रतिपादक वाक्यं "प्राणापानसमानैस्तु सर्वतः पवनैस्त्रिभिः। धार्यते पाल्यते चैव स्वांस्वां गतिमवस्थितः॥ (सु. सू. ३५।२८) इत्यत्रापि **गयदासाचार्य** व्याख्या—" प्राणापानाभ्यां युगपदेव प्रविशदपसर्पाभ्मां यस्त्रावायुनेव बाह्यान्··· भगवानौदर्योप्यनलः आध्माप्यते समानेन अवधूतः पित्तं पित्तस्थान स्थितेन पाल्यते यदुक्तमिहैव—"समानोऽग्निस्सहायवानिति"।

चरकोऽपि--"समानेनावधूतोऽग्निः स्वांस्वां गतिमव स्थितः ।" (?) इति । तेन गयदासादिना बन्धकृता पित्तस्थानस्थित समान इति सिद्धान्त निर्णयः । चरनादाचार्योऽपि--वह्निस्थानस्थितत्वं समानस्या ······ह । "समानस्त्विह कायग्नि दोषस्स्वेदायना- श्रितः । दोषः स्वेदानुलोम्याग्नि संधुक्षणकरस्सचेति ॥" दोषश्चेह पित्तम् ततश्च पित्तवह्नेः स्थानैक्ये पित्तस्थानस्थितस्य समान स्या- ग्निना स्थानैक्यं कथं न घटते । न त्वग्न्यधिष्ठान शब्देन मध्यमपद- लोपिसमासाश्रयण क्लेशेन । किमिति समानवायोरधिष्टानमिति चेत् "विषमो विषमादग्नि मन्दस्सामकफान्वितम् । पित्तात्पित्ता- न्विता तीक्ष्णा समानाकृताग्न्ययः ॥ (?) इत्यादि········ रोधापत्तेर्वातश्चात्र समान एव । "समानोऽग्निस्सहायवान" "अम- पक्वा शयचरः समानो वह्निसंयुतः । अन्नपाककरस्तज्जान् विशेषान् विविनक्ति हि ॥ (सु. नि, १।१६) इत्यादिना चरकवचनेन समान- स्स्यैवाग्निसहाय्ये क्लृप्त शक्तित्वात् । तथा चाग्निसमानयो स्थानै- क्ये सुश्रुतगयदासादयो हि तत्तत्तन्त्रान्तर वचनेन प्रमाणितव्याः । तथा च "तस्यान्तरेण नाभेस्तु ज्योतिस्थानं ध्रुवं भवेत् ।" (?) हृदिप्राणो गुदेऽपानस्समानो नाभिमण्डले । उदानः कण्ठदेशस्थो व्यानस्सर्वाङ्ग सन्धिषु ॥" (अमरकोश--१-२-६४) इति । एतेन न्यायनिपुणस्य वाग्भटस्य वाक्यं प्रमाणमिति ।

इति वाग्भटमण्डने एकविंशतितमं प्रकरणम् ।

(द्वाविंशतितमं प्रकरणम्)

अथ पुनर्विद्याधरः प्रत्यवतिष्ठते। यथा हि—"शुक्रासृग्गर्भिणी भोज्यचेष्टागर्भाशयर्तुषु। यः स्याद्दोषोऽधिकस्तेन प्रकृति सप्तधोदिता॥ (अ. हृ. शा. ३।८३) श्वशृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः। (अ. हृ. शा. ३।८९) व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः। (अ. हृ. शा. ३।९५) ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्य हंसगजाधिपैः। श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहा श्वगोवृषैः॥ (अ. हृ. शा. ३।१०३) प्रकृतीर्द्वयसर्वोत्था द्वन्द्वसर्वगुणोदये। (अ. हृ. शा. ३।१०४) इति वाग्भटः। वाक्यार्थे किं शुक्रादीनां सर्वेषामेव दोषप्रकृतिरुत्पद्यते अथवा शुक्रादिमध्येऽन्यतर दोषेण। न तावदाद्यः, शुक्रादीनां मध्ये यद्येकस्याप्युत्कटो दोषो न भविष्यति तदा प्रकृतिर्नोत्पद्यत एव। समकाले सर्वेषां शुक्रादीनां दोषोत्कर्षाभावात् शुक्रादिमध्ये सर्वदा एकस्यापि समता भविष्यति। न हि नियमोऽस्ति सर्वैरेव सदोषैर्भवितव्यम्। अपरं च, यदि शुक्रादीनां सर्वेषां एक दोषेण प्रकृतिः तदा सप्तप्रकृतीनां मध्ये कांप्रकृतिरुत्पद्यते, तदा सप्तप्रकृतीनां वातिका पैत्तिक श्लैष्मिक द्वन्द्वजा सर्वजा वा॥ एतद्विनियमोऽस्ति शुक्रादिषु सर्वेषु एकदा वातेन भाव्यं, पित्तेन श्लेष्मणा च। नैवं विचारोऽस्ति। वातप्रकृत्यारम्भ निमित्तमस्माभिरेकदोषैर्भाव्यम्। यदि शुक्रे वातोऽत्यधिकत्वे पित्तमधिकं, गर्भिणीभोज्य दोषद्वयं, गर्भिणी चेष्टायां च दोषत्रयं, गर्भाशये वा क्वचिद्दोषः, शिशिरादि ऋतुषु दोषो वा काश्चित् तदा प्रकृतिरुत्पद्यते सप्तानां मध्ये सर्वासां प्रकृतिकारणासम्भवात्। तस्मात् सकलशुक्रादीनामेकदा दोषेण तावत् प्रकृतिर्न भवति। नापि द्वितीयः। एकदोषप्रकृतेरुत्पादात् क्वचिद्वातो भविष्यति क्वचिच्च पित्तम्। अथ यदेकस्य कारणत्वमुच्यते तदा परस्पर दोषतया किं प्रयोजनमिति चेत् सत्यम्। कारणाना मुपरतौ यदि ज्ञानं भवेत्। शुक्रदोषेणारब्धयोः प्रकृतौ रक्तदोषो ब्रूयादेकेनप्रकृतिरारब्धानया उदासीनेन भाव्यम्। अथ शुक्रादीनां मध्ये एकस्यद्वयोस्त्रिषुचतुर्षुपञ्चसु वा समानोऽधिको भविष्यति तदा केन दोषेणैका समाना प्रकृतिरारब्धव्येति चेत् एतदप्ययुक्तम्, यतो नानाकारण कुपितस्य दोषस्य हि अधिकतारतम्य भावेनस्थितस्यानेकाश्रयदोषेणैव कार्यस्योत्पन्न-

त्वादपराश्रयकारणभूत दोषवैयर्थप्रसंगात्। अपरं च शुक्रशोणित संयोगसमवेत प्रकृतिरारब्धव्या, न च गर्भिणी भोज्यचेष्टादौ चेष्टा समवेतेन दोषेणान्यत्र प्रकृतिरारब्धुं शक्यते (तस्मात्) न **वाग्भटोक्ताप्रकृतिर्घटत** इति।

अत्र **ब्रूमः**---किमिह प्रकृतिमात्रं दूष्यते वाग्भटोक्ताप्रकृतिप्रक्रिया वा। नाद्यः, सुश्रुत चरकाद्युक्तत्वात् प्रकृत्युभय भावायोगात्। तत्र **सुश्रुतः**—"सप्त प्रकृतयो भवन्ति, दोषैः पृथक् द्विशोसमस्तैश्च।" शुक्रशोणित संयोगे यो भवेद्दोष उत्कटः। प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु॥ (सु. शाः ४।६२–६३) **चरकोऽपि**--"सम पित्तानिलकफाः केचिद्गर्भादि मानवाः। दृश्यन्ते वातलाः केचित् पित्तला श्लेष्मलास्तथा। तेषामनातुराः पूर्वे वातलाद्यास्सदातुराः। दोषानुशायिता ह्येषां देहप्रकृतिरुच्यते। विपरीतगुणास्तेषां स्वस्थवृत्तेर्विधिर्हितः। समसर्वरसं सात्म्यं समधातोः प्रशस्यते॥ (च. सू. ७।३९–४१) इत्यत्र च टीकाकृता **भट्टारहरिश्चन्द्र वाप्यचन्द्र चरकचन्द्रिकाकार** प्रभृतीनामियं व्याख्या--"समपित्तानिलकफाः इत्यादि समप्रकृति लक्षणं, गर्भादि वातला वातप्रकृतयः पित्तला पित्तप्रकृतयः श्लेष्मला श्लेष्मप्रकृतयः, वातलादौ सर्वं गर्भधामादीनि योज्यन्ते। तेषां समवातपित्तश्लेष्मप्रकृत्यादीनां मध्ये पूर्वे समप्रकृतयः सवातलाद्या स्वस्व व्यवहार भाजोऽपि स्फुटिताङ्गत्वविषमाङ्गत्वादि ये युक्ता दोषानुबन्धा इति।

नापि द्वितीयः, वाग्भटीय प्रकृति प्रक्रियामूलभूत खरनादादि विरोधापत्तेः। यथा हि **खरनादः** प्रकृत्याध्याये--"अथ प्रकृत्याध्यायं व्याख्यास्यामः अदोषयुक्तं गर्भस्यस्स्याद्बीजं शुक्रशोणितम्। यद्वातदिदोषलाहारचेष्टां प्राप्नोति गर्भिणी तस्य दोषस्य सद्भावं पुष्यन्ति गुणकर्मतः। पुंसो गर्भ प्रवृत्येव शरीरेरिन्द्रियत्रयः। तस्मात्सर्वेषु दोषेषु ये तेष्वभ्यधिकेषु या। देहादि········स्वलिङ्गां प्रकृतिं विदुः॥ इति।

अत्र पुनराह **सौर विद्याधरः**—"दोषानुशायिता ह्येषां देहप्रकृतिरुच्यते" (च. सू. ७।४०) इति **चरकोक्तप्रकृति** शब्दः स्वभावपरः, न सप्तविध प्रकृतिपरः। यदि प्रकृतिपरस्स्यात्तदा समदोषप्रकृतिरप्येका। यथा **श्रीचरकाचार्येण** शास्त्रस्वभावेन समपित्तानिलकफमयो भवन्ति यदा स्वभाव एव तत्र प्रकृतिः तदेव तत्रस्यादेतेनचात्रापि

प्रकृति शब्दः सचोदित प्रकृतिपरत्वे परित्यज्य कथं स्वभावपर इति वाच्यमाचार्यैरेव प्रकृतेर्निराकृतत्वात्। तथा हि—"तत्र केचिदाहुः न समवातपित्तश्लेष्माणो जन्तवस्सन्ति विषमाहारोपयोगित्वान्मनुष्याणां, तस्माच्च वातप्रकृतयः केचित् केचितपित्तप्रकृतयः केचित् पुनः श्लेष्मप्रकृतयो भवन्तीति। तच्चानुपपन्नं कस्मात् कारणात् समवातपित्तश्लेष्माणं ह्यरोगमिच्छन्ति भिषजः यतः प्रकृतिश्चारोग्यम् आरोग्यार्था च भेषजप्रवृत्तिः सा चेष्टा रूपा, तस्माद्भवन्ति समवातपित्तश्लेष्माणः, न खलु सन्ति वातप्रकृतयः पित्तप्रकृतयः श्लेष्मप्रकृतयो वा। तस्य तस्य किल दोषस्याधिक्यात् सा सा दोषप्रकृतिरुच्यते मनुष्याणां, न च विकृतेषु दोषेषु प्रकृतिस्थत्वमुपपद्यते। तस्मान्नैताः प्रकृतयः सन्ति, सन्ति तु खलु वातलाः पित्तलाः श्लेष्मलाश्च, अप्रकृतिस्थास्तु ते ज्ञेयाः॥ तेषां तु खलु चतुर्विधानां पुरुषाणां चत्वार्यनुप्रणिधानानि श्रेयस्कराणि भवन्ति। तत्र समसर्वं धातूनां सर्वाकारसमम्, अधिक दोषाणां तु त्रयाणां यथास्वं दोषाधिक्यमभिसमीक्ष्य दोषप्रतिकूलयोगीनि त्रीण्यनुप्रणिधानानि श्रेयस्कराणि भवन्ति यावदग्नेः समीभावात्, समे तु सममेव कार्यम्॥ (च. वि. ६।१३–१४) इति। तस्मात्प्रकृति शब्दार्थः स्वभावपर एवाचार्याणामभिप्रेत इति।

अत्रोच्यते—"तस्मादातुरं परीक्षेत प्रकृतितश्च विकृतितश्च सारतश्च संहननतश्च इत्यभिधायोक्तं चरकेण"—तत्र प्रकृत्यादीन् भावाननुव्याख्यास्यामः, तद्यथा—शुक्रशोणित प्रकृतिं, कालगर्भाशयप्रकृतिं, महाभूतविकार प्रकृतिं, मातुराहारविहार प्रकृतिं च गर्भशरीरमपेक्षते। एतानि हि येन येन दोषेणाधिकेनैकेनानेकेन वा समनुबध्यन्ते तेन तेन दोषेण गर्भोऽनुबध्यते, ततः सा सा दोषप्रकृतिरुच्यते मनुष्याणां गर्भादिप्रवृत्ता। तस्मात् श्लेष्मलाप्रकृत्या केचित्, पित्तलाः केचित्, वातलाः केचित्, संसृष्टाकेचित्, समधातवः केचित् प्रकृत्या भवन्ति। तेषां हि लक्षणानि व्याख्या स्यामः॥ (च. वि. ८।९४-९५) इति तेन सप्त्येव प्रकृतयः इति।

अत्र पुनः परिहारपुरस्सरं सौर विद्याधरः प्रत्यवतिष्ठते तद्यथा—यत्कूपमण्डूका भवद्वार्तिकं चापहासःपरमत्र वक्तव्यम्"—

"मज्जल्पाशयमात्रोऽभिविहीनो वा मज्जलाशयात्।
वाग्भटः कूपमण्डूक प्रवृत्तिं कुरुतेम्बधि॥

श्रृणुतावद्यदि ते श्रद्धोदिते श्रद्धास्ति पूर्यते यथा तच्छ्रद्धया। आतुरं हि प्रकृतितश्च विकृतितश्च परीक्ष्यते। तत्र प्रकृतिः कथ्यते स्वभावः। ततो व्याधिकृतः तत्र पुरुषस्य गर्भप्रभृति प्रवृत्तस्य स्वभावं आदौ परीक्ष्यः। तत्र गर्भादौ बहवः स्वभावाः मिलिताः। तदेवाहुराचार्याः शुक्रशोणितप्रकृतिस्स्वयमेवाचार्यचरणा शिष्याणां बोधाय व्याख्यातवन्तः। "तस्माद्वातलाः केचित् केचित् पित्तला केचित् श्लेष्मला केचित् संसृष्टाः, केचित्समधातवः प्रकृत्या भवन्ति।" इति (च. वि. ८।९४-९५) अत्र प्रकृत्या शुक्रशोणित स्वभावेन। यदा शुक्रशोणितस्वभावो दोषाधिक्येन तदा वातलाः यदा च समदोषशुक्रशोणितस्वभावस्तदा समधतवो भवन्ति काले गर्भादिदोषेण। तर्हि कः स्वभावः आरब्धव्यमिति चेत् श्रूयताम्। तत्सर्वं शारीरे व्याख्यातमाचार्यैः। परं प्रेतात्व प्राणमोक्षार्थं पुनरपि शारीरं व्याख्यायते। कालदोषेणापि गर्भशरीरे स्वभावमारभ्यते। यदाह सुश्रुतः--"तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनादनायुष्यं पुंसां भवति। यश्च तत्र भवति गर्भः स प्रसवमानो विमुच्यते, द्वितीयेऽप्येवं सूतिकागृहे वा, तृतीयेऽप्येवमसंपूर्णाङ्गोऽल्पायुर्वा भवति,। चतुर्थे तु संपूर्णाङ्गो दीर्घायुश्च भवति। (सु. शा. २।३१) तथा"······नारीमुपेयाद्रात्रौ सामभिरभिविश्वास्य, विकल्प्यैवं चतुर्थ्यां षष्ठ्यामष्ठम्यां दशम्यां द्वादश्यां चोपेयादिति पुत्रकामः॥ एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च। प्रजासौभाग्यमैश्वर्यं बलं च दिवसेषु वै॥" (सु. शा. २। २८-२९) अपरं च-"अतः परं पञ्चम्यां सप्तम्यां नवम्यामेकादश्यां च स्त्रीकामः॥" (सु. शा. २।३०) इति। तस्मादायुरारोग्यादयो भाविगर्भशरीरकालगुणदोषकृता एव। अपरमपि काल कृताः स्वभावा बहुशोऽत्र निर्दिष्टा ज्ञातव्या। "पूर्वं पश्येद्दृतुस्नाता यादृशं नरमङ्गना। तादृशं जनयेत् पुत्रं भर्तारं दर्शयेदतः॥" (सु. शा. २।२६) गर्भाशय दोषेणापि गर्भशरीरे स्वभाव विशेषः एकोऽथवानेको। "यस्य यस्य ह्यवयवस्य बीजे बीजभागे वा दोषाः प्रकोपमापद्यन्ते तंतभवयवं विकृतिराविशति। (च. शा. ४।३०) एवमपरे भावाः शतशो बोद्धव्याः। तथा गर्भिण्याहार दोषेण ते ते स्वभाव विशेषा आपद्यन्ते। यथाचोक्तं "मद्यनित्या पिपासालुमल्पस्मृतिमनवस्थितचित्तं वा।" (च. शा. ८।२१) गर्भिणी विहार दोषदपि गर्भस्वभाव विशेषा भवन्ति। तद्यथा-"विवृतशायिनी नक्तंचारिणी चोन्मत्तं जनयति।" (च. शा. ८।२१) इत्यादि। यदाह सुश्रुतः—"ऋतौ पुरुषवद्वाऽपि

पवर्तेताङ्गना यदि । तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ।।" (सु. शा. २।४३) "आहाराचारचेष्टाभिर्यादृशीभिः समान्वतौ । स्त्रीपुंसो समुपेयातां तयोः पुत्रोऽपि तादृशः ।।", (सु. शा. २।४६) तथा महाभूतविकारे दोषे अपि गर्भशरीरे भवन्ति यथा रिष्टाध्याये "तत्रप्रकृतिर्जातिप्रसक्ताकुल प्रसक्तावेत्यादि जातिकुलदेशकालवयः प्रत्यात्मनियता हि तेषां सेवां पुरुषाणां ते ते भावविशेषा भवन्ति ।।" (च. इ. १।५) तस्माच्चरकाचार्यमत्यैवं रहस्यं ज्ञायते । तस्माच्चरकसुश्रुतोभयभ्रष्ट चर्मकारो दृष्ट इव सहृदयानामुपहासनीय एवेति जितं समयविरुद्ध तन्त्रदोषचक्रवर्तिनेति ।

अत्र ब्रूमः······भीषामात्रमिदं बहुप्रलपितं तव । तथा हि यदि प्रकृतिस्स्वभावमात्रं स्यात्तर्हि सप्तधा प्रकृति परिज्ञाय सात्विकस्ताम सादि सुश्रुतादिभिर्निगद्येरन् । निगदिताश्च तैस्तथा हि सौश्रुतात्— "सप्तप्रकृतयो भवन्ति दोषैः पृथक्, द्विशस्समस्तैश्च । शुक्रशोणित संयोगे यो भवेद्दोष उत्कटः । प्रकृतिर्जायते तेन यस्या मे लक्षणं श्रुणु । इत्यभिधायोक्तं" अधृतिरदृढसौहृदः कृतघ्नः कृशपुरुषो धमनीततः प्रलापी । द्रुतगतिरटनोऽनवस्थितात्मा वियति च गच्छति संभ्रमेण सुप्तः ।। अव्यस्थितमतिश्चलदृष्टिर्मन्दरत्नधन संचयमित्रः । किंचिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः ।। वातिकाश्चाजगोमायुशशाखूष्ट्रशुनां तथा । गृध्रकाकखरादीनामनूकैः कीर्तिता नराः ।।" तथा "मेधावी निपुणमति विगृह्यवक्ता तेजस्वी समितिषु दुर्निवारवीर्यः । सुप्तःसन् कनकपलाशकर्णिकारान् संपश्येदपि च हुताशविद्युदुल्काः ।। भुजङ्गोलूकगन्धर्वयक्षमार्जार वानरैः । व्याघ्रर्क्षनकुलानूकै पैत्तिकास्तु नराः स्मृताः ।।" तथा "शुक्लाक्षः स्थिरकुटिलालिनीलकेशो लक्ष्मीवान् जलदमृदङ्ग सिंह घोषः । सुप्तसन् सकमलहंसचक्रवाकाम्, संपश्येदपि च जलाशयान् मनोज्ञान् ।। ब्रह्मरुद्रेन्द्रवरुणैः सिंहश्वगजगोवृषैः । तार्क्ष्यहंस समानूकाः श्लेष्म प्रकृतयो नराः ।। (सु. शा. ४।६६–७६) चरनादोऽपि—"प्रकृत्या श्लेष्मितो मर्त्यः स च श्रेष्ठतमो मतः । अरोगोऽल्पजरो ज्ञानवित्तवान् चिरजीविनः ।।" इत्यादि । सप्तविध प्रकृतिर्नस्वीक्रियते तदा मारुतादि प्रकृतिषु कृतघ्नं सुप्ताकाशगमनमन्दरत्नादीनामजाद्यनूकानां धर्माणमवकाश एव न स्यात् । चरकाचार्याणामय मेवार्थः संमतम् । तदुक्तं भट्टपादैः—"सर्वाण्येव हि शास्त्राणि स्वप्रदेशान्तरैस्सह । एकवाक्यतया युक्त मुपदेशं प्रतन्यते ।। (तन्त्रवार्तिकम्) तच्चैतद्व्यतिरिक्त वाग्भटस्य प्रकृति तेन

कथमाचार्यस्य चरक सुश्रुत बाधता। न च वाच्यं दूषणात्मानः कथं प्रकृतिमारम्भ इति चेत् तेन विषकीट दृष्टान्तेन आचार्यैरुदाहृतत्वात्। यदुक्तं आचार्यसुश्रुतेन—"विषजातो यथा कीटो न विषेण विपद्यते। तद्वत् प्रकृतयोमर्त्यंश्शक्नुवन्ति न बाधितुम्॥ प्रकापो वाऽन्यथा भावो क्षयो वा नोपजायते। प्रकृतीनां स्वभावेन जायते तु गतायुषः॥ (सु. शा. ४।७८–७९) इति। द्विधा हि दोषदुष्टिः उपतप्त प्रकृतिस्थान भेदेन। इदं च गर्भस्यविकृतावयवाद्युत्पत्त्यभिधानानुपपत्त्या विस्पष्टितं टीकाकारैर्गयादासादिभिः। एवं प्रपञ्चस्तु वाग्भट टीकायां द्रष्टव्यो नेहग्रन्थविस्तर भयाल्लिख्यते।

अथ पुनर्विद्याधरः प्रत्यवतिष्ठते। यथा हि—शारीरमधिकृत्य बहूनि वाक्यानि विरुद्धानि च वाग्भटोक्तानाम् यथा—"आरोहेत् स्त्री तु वामेव तस्य दक्षिण पार्श्वतः।" (अ. हृ. शा. १।३२) इति। एतत् सर्वागम विरुद्धम्। पुरुषः वामभागेस्त्रियः शयनोपदेशेनाधिकारात्। तथा वृद्धवाग्भटेन स्वप्नस्वरुपमपि कथितम् "सर्वेन्द्रियाण्युपरतौ मनोऽनुपरतं यदा। विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति॥ (अ. सं. सू. ९।२१) एतच्चातीव हास्यकारि यतः स्वप्नं हि मनो न पश्यति किं तर्हि आत्मना, चेतनत्वात्। 'दृशि' धातुर्हि उपग्रहार्थो ज्ञानार्थो वा वक्तव्या। तच्चोभयमपि न संगच्छते। आत्मा हि जानाति, ज्ञाने च मतिप्रभृतीनि इन्द्रियाणि कारणम्। तस्मात स्वयमात्मामनस्थं कृत्वा पश्यति-यदाह सुश्रुतः—"पूर्वदेहानु भूतांस्तु भूतात्मास्वपतः प्रभुः। रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान्॥ (सु. शा. ४।३६) चरकोऽपि—"नातिप्रसुप्तः पुरुषस्सफलान-फलानपि। इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा॥ (च. इ. ५।४२)। तथा शारीरमध्ये रिष्टान्यापि पठितानि तान्यपि विचार्यमाणानि। न प्रमाण पदवीमधिरोहन्ति तस्मात्सहृदयानाम्। यत्र यत्र खण्डनेऽभिलाषस्स्यात् तत्तद्विचार्यप्रयुक्तखण्डन रीत्या सर्वं शारीरं खण्डनीयम्। सर्वमुनि रहस्यं सर्वत्र प्रकाशनीयमिति। भवति चात्र—

विरोधक्रमभङ्गश्च व्याहृकत्वं पदेपदे।
शारीरे वाग्भटस्येह न्यूनतावापि दूषणम्॥

अत्र ब्रूमः—"आरोहेत् स्त्रीतुवामेनेत्यादि" आचार्यचरकाद्यनुसारि वचः। तत्र तावत् चरको जातिसूत्रीये "हितमशनमशिन्वाना-

त्याशितौ दक्षिणपादेन पुमानारोहेत् वामपादेन स्त्री।" (च. शा. ८।७) अत्र भट्टारकहरिश्चन्द्र व्याख्या—पत्युर्दक्षिणपार्श्वतः स्त्री शयनमारोहेदिति। स एव च स्वव्याख्यायां तन्त्रान्तरमुपन्यस्तवान्——"आवामबलता नारीमारोहेत्पुत्रकाम्यया। आत्मदक्षिणपार्श्वस्था शय्यायां व्यत्ययोन्य था।" इति

तथा--सर्वेन्द्रियाण्युपरताविस्यत्र **वृद्धवाग्भटे**नाप्युपपन्नमेवाभिहितम्। तथा हि–यदि सर्वेन्द्रियाण्युपरतिस्तदा विषयोपलब्धरूपायां करणंमन······कर्तृत्वमेवात्मनो न घटत इत्याशङ्क्याह——मनोनोपरतं यदा–इति। तेन मनसा करणेन·········यदुक्तं मनसो चेतनत्वात् ज्ञानहेतुत्वमिति। तदपि चरकाविरुद्धम्। तथा हि यत्रपश्यताप्यन्धत्वमभूद्भवतास्तथा हि·····त्वयोक्तं चरकवचनं नातिसुप्तंपुरुष इति तन्मतमेवाचार्यवचः। तवान्तर वचनानि तु विस्तरभयान्न लिखितानि।

इदं स प्रकृतिप्रख्यं पौरुषं भव (तव) भूषणम्।
शारीरं बाग्भटाख्येत्वचलं वादसङ्गरे॥

इति वाग्भट मण्डने द्वाविंशतितमं प्रकरणम्।

॥ इति शारीरस्थानोद्धारः॥

(त्रयोविंशतितमं प्रकरणम्)

अथ निदान दूषणाय पुनर्विद्याधरः प्रत्यवतिष्ठते। शारीरानन्तरं चिकित्सास्थानारम्भस्योचितत्वादत्रापि पूर्ववत् क्रमभङ्ग दोष इति। यच्चोक्तं--"निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधास्मृतम्॥ (अ. हृ. नि. १।२) इति पञ्चरोग ज्ञानोपायाः। तत्र कारणमतिप्रसिद्धमेव।" प्राग्रूपं येन लक्ष्यते। उत्पित्सुरामयो दोषविशेषेणानधिष्ठित। लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथायथम्॥ (अ. हृ. नि. १।३-४) तदेतत् पूर्वरूप लक्षणम्। अस्यार्थः---दोषविशेषेणाश्रित आगामी रोगो येन ज्ञायते तत् पूर्वरूपम्। किंतदित्याह अव्यक्तं लिङ्गं कुतोऽव्यक्तमित्याह अल्पत्वात्। एतेनाल्पं रूपं पूर्वरूपमित्यर्थः। एतच्चासङ्गतम्। तथा हि प्रथमतस्तावद्दोष विशेषेणा नधिष्ठितः इति न घटते। पूर्वरूपेण हि सामान्यविशेषसहितो रोगो ज्ञायते यथा निदानेन सामान्यविशेषण सहितो रोगो विज्ञायते। यथा रूक्षादिसेवया रोगोऽस्य भविष्यतीति ज्ञायते तथा वातिकादि विशेषोऽपि। अनया रीत्या पूर्वरूपेषु ज्वर सामान्यं ज्ञायते। वातिकादि ज्वरविशेषोऽपि। यदाह सुश्रुतः--"श्रमोऽरति विवर्णत्वं वैरस्यं नयनप्लवः इत्यारभ्य "सामान्यतो, विशेषात्तु जृम्भाऽत्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम्॥" इति। (सु. उ. ३९।२५-२७) तथा हारीतेऽप्युक्तम्—"इति पूर्वरूपमष्टानां ज्वराणां सामान्यतः; विशेषेण जृम्भाङ्गमर्द भूयिष्ठं हृदयोद्वेगि वातजम्" इत्यादि। ननु पराशरेणाप्तभाणि—"पूर्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न दोष विशेषः" इति बह्वलेन वाग्भटेनाप्यवादि दोषविशेषेणानधिष्ठितः इति। सत्यं पराशरेण फलितो वाग्भट बालकः। यथा हि तद्वाक्यार्थः---पूर्वरूपेण भविष्यद् व्याधि विशेषो ज्ञायते, न तु भावी दोषविशेषः। तस्य निदानेनापि निर्धारितत्वात्। न हि पूर्वरूपं दोषलक्षणं किंतर्हि व्याधिः। अपरं च, विशिष्टा श्चेतद्व्याधिज्ञानस्तदा तद्विशेषत्वेन दोषोऽपि ज्ञातः। तस्मान्नापृथक दोषज्ञानोपयोगमिति भवति। तस्मात् पराशरवाक्यार्थं भ्रान्तो वाग्भट भट्टः। तथा च, द्विविधं पूर्वरूपं, सामान्यंविशिष्टं च। तत्र दोषविशेषेणानधिष्ठितो रोगो येन ज्ञायते तत्पूर्वरूपं सामा-

न्यमिति सामान्यपूर्वरूप लक्षणं कृतम् । विशेष पूर्वरूपलक्षणं च लिङ्ग-मव्यक्तमल्पत्वादिति चेत् तदप्यसङ्गतम् । अल्पलक्षणं विशेष पूर्वरूप-रूपमित्युक्ते वाग्भटः पृच्छते । जृम्भो वातज्वरलक्षणं । स च अल्पो भवेत विशिष्टः पूर्वरूपं भविष्यति । तथा ब्रुवत एवं विधः । यदाह **सुश्रुतः** "जृम्भात्यर्थं समीरणात्" इति जृम्भोऽति सातिशयो भवन् विशिष्टं पूर्वरूपं भविष्यति, अल्पश्च सामान्यम् । यदुक्तं तेरेव सामान्य पूर्वरूपे जृम्भाङ्गमर्दोगुरुतेति **हारीतेऽपि** पृथकत्वेन पठयते यदुक्तं जृम्भाङ्गमर्द भूयिष्टमित्यादि । तस्मात् पूर्वरूप निर्वचनं बालप्रल-पितमेव । अथ वाक्यान्तरबलादिदमुच्यते । यदाह वातव्याधौ **दृढबलः**–"अव्यक्तं लक्षणं तेषां पूर्वरूपमिति स्मृतम् ।" (च. चि. २८।१९) । तेनापि विप्रलब्धो वाग्भटः । तथा हि तस्यार्थः––पूर्व-रूपमिति लक्षणं ज्ञानजनकं यत् स्मृतं च ज्ञानोपायमध्ये विख्यातम् तदस्य वातव्याधेरव्यक्तं व्यक्तं नास्ति । किं कथ्यते, न हि नाम सर्वे-षांव्याधीनामवश्यं पूर्वरूपेण भाव्यम् यस्य हि संभवति तस्य भवति । तस्य वचनं संभवति कुतो भविष्यति । यदाह **चरकः** क्षतक्षीण निदाने "अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतम् । (च. नि. ११।१२) तथा" धनुषाऽऽयस्यतोऽत्यर्थं भारमुद्वहते गुरुम् । इत्याद्यारभ्य "विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते ।। इति यावत् ।। (च. चि. ११।४–८) अत्र हि हृदय क्षतस्य पूर्वरूपासंभवात् अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतमित्युक्तं एतच्चोपलक्षणम् । क्रिमिनिदानादिषु भावो बोद्धव्यः । न हि नामोपदेशं विनामुनिवाक्यानि ज्ञातुं शक्यन्ते । तस्मात्सर्वतो भ्रान्तोऽसि । तत्तेन एकेनाप्युक्तम् "स्थानसंश्रयिणः क्रुद्धा भाविव्याधि प्रबोधकम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदु-च्यते ।।" अव्यापकत्वात्तदप्यपास्तम् । यतो यक्ष्मपूर्वरूपेषु घृणके-शादीनां यत्तत्पतनं न तद्दोषैरारभ्यते । अतो अव्यापकमेतल्लक्षणम् । अथ तर्हि **सुश्रुतेऽपि** लक्षणमव्यापकमेव । यदुक्तं––"तत्र तेषां अभि-सन्निविष्टानां पूर्वरूप प्रादुर्भावः । तं प्रतिरोगं वक्ष्यामः । तत्र पूर्व-रूपगतेषु चतुर्थः क्रियाकालः ।। (सु. सू. २१।३३)

अत्र हि पूर्वरूपलक्षण**माचार्यचरणै**र्नक्रियमाणमस्ति । किं तर्हि दोषावस्था प्रतिपाद्यमाना विद्यते । प्रसरानन्तरं दोषाणां स्थान-संश्रयो भवति । तत्र पूर्वरूपाण्युत्पद्यन्ते । तत्र दोषारब्धे पूर्वरूप रूपेषु चतुर्थः क्रियाकालः । दोषाणामावस्थिक चिकित्सा । अत्र कदाचिदपि

भवता लक्षणशङ्का न करणीया। कथं तर्हि व्याधिसमुद्देशीये सुश्रुताचार्यैरभाणि--"अव्यक्तलक्षणो भविष्यद्व्याधि ज्ञापकः स पूर्वरूप संज्ञकः।" (?) व्याधिषु पूर्वरूप संज्ञाव्याधयश्च दोषकृता दोषकृतमेव पूर्वरूपमिति। अत्रोच्यते--अत्रापि न पूर्वरूपद्वय लक्षणम् किं तर्हि व्याधिस्वरूप कथनम्। अत्र हि पूर्वरूपं दोषजन्यमेव भवति इति नियमोक्तः। किंतु दोषारब्धो यो व्याधिर्व्याध्यन्तर व्यापकं तत्र पूर्वरूपत्वम्। नत्वन्यत्र पूर्वरूपत्वं प्रतिषिध्यते। पूर्वरूपं हि द्विविधं भवति दोषारब्धमदोषारब्धं च। तत्र यद्दोषारब्धं सोऽन्य लक्षणोव्याधिरित्यभिप्रायः। सुश्रुत वचने भवताद्भिर्न विधेय इति। न तु सर्वेषां पूर्वरूप लक्षणं ···· दूष्यते। किं तर्हि मुनिभिरुपदिष्टं पुवरूपलक्षणम्। शूद्रो भवान् वेदवचनश्रवणे न अधिकारि। कथं तवाग्रे तत्कथ्यते। तस्मात् कर्णौपिधाय लक्षणमात्रमाश्रयेथा। सहृदयानामुपदिश्यते। यदाह चरकः--"पूर्वरूपं प्रागुत्पत्ति लक्षणं व्याधेः। (च. नि. १।८) अस्यार्थः रोगस्योत्पत्तेः प्राक् प्रथमतो यद्रोगस्य लक्षण बोधकं चिह्नं तत्प्राग्रूपम्। तच्च दोषारब्धं अदोषारब्धं च। सामान्यं विशिष्टं च। सर्वमनेन कल्पनेन सर्वं प्राप्यते। सर्वगुणसंपूर्णमेतल्लक्षण चिन्तामणिं परित्यज्य वाग्भटोक्तलक्षणकीकस मधुकेन लोकानां गले बद्धम्। तथा तस्मिन्नेवकीकसे गलित्वा मधुकोशोऽपि मृतः। तस्मात्फलितमत्र सर्वं तन्त्रदोषपादैरिति।

अत्र ब्रूमः--शारीरानन्तरं निदानस्थानमेव आरम्भणीयम्। अविज्ञातेषु चिकित्साद्यनवकाशादिति। नापि पूर्वरूपलक्षणमसंगतम्। "उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः" इति सामान्यपूर्वरूपलणत्वात् "लिङ्गमव्यक्तमल्पत्वादित्यस्य" विशिष्ट पूर्वरूपलक्षणत्वात्। न च बिशिष्टपूर्वरूपे सामान्य पूर्बरूपलक्षणव्याप्तिर्दोषाय। न च विशिष्ट पूर्वरूपस्यापि रूपादिवत् भविष्यति। पित्तादि व्यतिरिक्त वातजादिव्याधौ वातस्य रूक्षशीतधातुक्षयावरणादिजन्यत्व रूपविशेष बोधकत्वं। तेनाव्यक्त वातजादि भावि ज्वर बोधकत्वात् अव्यक्तत्वं जृम्भादि। तत्र हेतुरल्पत्वादिति स्तोकत्वादव्यक्त बोधक आलस्याद्यनेक धर्मसहचरितत्वात्। माषराशिः, छत्रिणो गच्छन्तीति वदव्यक्तसज्ञत्वं पूर्वरूपस्येति। इदं च व्याख्यानं जैज्जटवाप्यचन्द्रमाधवकरकार्तिककुण्डादिभिर्विहितम्। तेन तद्दूषणे निज निबन्धन स्वाननमण्डनता तावत् त्वयैव प्रथमतः खण्डिता। तदपि मनोरथ

मात्रम्। यथा हि यदुक्तं त्वया पूर्वरूपेणापि दोषविशेष संहितः व्याधिर्ज्ञायते इति तत्पराशर वाक्येन विरुद्धम्। तद्यथा—"पूर्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेषः इति।" (पराशर बचनं) अथात्यर्थं जृम्भमाणस्य जृम्भादेर्विशिष्टपूर्वरूपत्वाद्वातादि दोष विशेषावप्यभिप्रेतत्वाभावात्। तेन तव केन किमुद्दिष्टं तन्न विद्मः। येन न्यायेन त्वमेव मुनिवाक्यमुपदेशमपि न लक्षसे। ततश्च "प्राग्रूपं तद्भाविलिङ्गं व्याधेर्भाविन एव यत्। सामान्यं च विशिष्टं च तदप्याहुर्द्विधा बुधः। तत्राद्यं गमयेद्दोषविशेषेणानधिष्ठितम्। व्याधिभात्रिन मन्यत्तु विशिष्टत्वाद्विशेषितम्॥ (?) प्रयोगस्तु प्राग्रूपमितरेभ्यो विद्यते भाविन एव व्याधेः बोधितत्वात्। व्यतिरेकेण पूर्ववत् भात्रिपदं वर्तमानमात्र व्याधि बोधकरूप व्यावृत्यर्थम्। एवकारस्तु निदानोपशयसन्ततीनां व्यवच्छेदाय। तेषां भविष्यद्वर्तमानोभयविषय व्याधि बोधकत्वात्। इति।

अथ रूपदूषणाय भूयो विद्याधरः प्रत्यवतिष्ठते। यथा हि—"तदेव व्यक्ततां यातं रूपमित्यभिधीयते।" (अ. हृ. नि. १।५) तदेव पूर्वरूपमेव व्यक्ततांयातं रूपं कथ्यते। अव्यापकं चैतल्लक्षणं यतो येषां व्याधीनां पूर्वरूपंविना रूपं किं भविष्यति। न हि नाम सर्वेषा व्याधीनामवश्य पूर्वरूपैर्भाव्यम्। यदुक्तं सुश्रुताचार्यैः—केवलो यः प्रागेवोत्पन्नो व्याधि पूर्वरूपोऽ "नुपद्रवश्चापूर्वरूपः।" (सु. सू. ३५।१८) पूर्वरूप रहित क्रिमिविशूचिकादि। तच्च क्षुद्ररोगमशकतिलकालक न्यच्छव्यङ्गादयः व्याधिस्वभावात्पूर्वरूपमन्तरेण प्रागेवोत्पद्यन्त इत्यर्थः। स्वरूपासिद्धश्च। यतो यानि शोषस्यैकादशरूपाणि तानि पूर्वरूपमध्ये न सन्ति। यदुक्तं श्रीचरकाचार्यचरणैः—"तस्येमानि पूर्वरूपाणि तद्यथा प्रतिश्यायः क्षवथुरभीक्ष्णं श्लेष्मप्रसेकः इत्यारभ्य मुखमाधुर्य केशास्थिभस्मतुषाङ्गार राशीना चाधिरोहण मित्यन्तेन ग्रन्थेन (च. नि. ६।१३) यानि च शोषस्य पूर्वरूपाणि निरूपितानि तद्व्यतिरिक्तान्येवैकादश रूपाण्युक्तानि। तद्यथा—"शिरसपरिपूर्णत्वं कासश्वासे इत्यारभ्य तद्रूपाणां च बहुत्वादिति (च. नि. ६।१४) तेन बालप्रलपितमेतत् यत्पूर्वरूपमेव व्यक्तं रूपमिति। अथ सुश्रुताचार्यैरर्शो निदाने तेषां भविष्यतां पूर्वरूपाख्याने—"अन्नेऽश्रद्धा कृच्छ्रात्पक्तिरम्लीका संधिसदनेत्यारभ्य 'निद्रेन्द्रियदौर्बल्यं" इत्यनेन ग्रन्थेन (सु. नि. २।८) पूर्वरूपनिरूप्योक्तम्—

"जातेष्वेतान्येव लक्षणानि प्रव्यक्ततराणि भवन्ति" (सु. नि. २।६) इति । तेन पूर्वरूपमेव रूपमिति युक्तमिति चेत् न, विचारमन्तरेण वाक्यरहस्याज्ञानात् । तथा हि अर्शांसि यज्जातानि किं रूपविशिष्टानि जातानि रूपरहितानि वा । यदि रूपविशिष्टानि तदा जातेषु पश्चादेतानि प्रव्यक्ततराणि भवन्ति । तस्माद्रूपाद्व्यतिरिक्तानि यद्येतान्येव रूपाणि तदेतद्विशिष्टानि जातान्येव, जातेषु पश्चात्प्रव्यक्ततराणि भवन्तीति न घटते । द्वितीयेऽर्शसामुत्पत्तिरेव न स्यात् रूपव्यतिरेकेणोत्पत्तेरसंभवात् । किं च एतान्येव यद्यर्शसां रूपाणि तदा तानि किं सामान्यानि विशिष्ठानि वा ? नाद्यः, यथोक्तं **सुश्रुतेन**—"मांस प्ररोहत्वमर्शसां सामान्यं रूपमित्याक्षते" इति । (सु. नि. २।४) **दृढबलेनाप्युक्तं** "गुदवलिजानां मांसाङ्कुरेरर्शांसीति संज्ञा तन्त्रेऽस्मिन् ।" (च. चि. १४।६) । यथा ज्वरस्य सन्तापः सामान्यंरूपं अतिसरणमतिसारस्येति । नापि विशिष्टानि, विशिष्टनामन्येषामेवोक्तः । यच्चोक्तं **सुश्रुतेन**—"तत्र मारुतात् परिशुष्कारुणविवर्णानि विषममध्यानि कदम्बपुष्पतुण्डिकेरी नाडीमुकुलसूचीमुखाकृतीनि च भवन्ति" इत्यारभ्य कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ।" (सू. नि. २।१०) इत्यनेन ग्रन्थेन तेनैतानि स्वरूपाणि । भ्रान्तो भवान् । तेनायं **सुश्रुत** वाक्याभिप्रायः—अर्शस जातेष्वेतान्येवं लक्षणानि पूर्वरूपनामानि प्रव्यक्ततराणि भवन्ति । जातः व्याधिबलं प्राप्यानुवर्तते । अतएव प्रशब्दतर शब्दावपि सार्थकौनि भवतः । एतेन केषुचिद्रोगेषु दोषजनितानि पूर्वरूपाणि सर्वाण्यप्यनुबन्धरूपेणानुवर्तन्ते क्वचिदल्पानि क्वचिच्च घनानि अनुवर्तन्त एव ।क्वचिद्विशेषलिङ्ग सदृशानि भवन्ति क्वचिद्विसदृशानीत्युपदेशः । तस्मात् पूर्वरूपाण्येव व्यक्तानि रूपाणीति लक्षणं बालप्रलपितमेवेति । तेन **चरकाचार्योक्त** मेतल्लक्षणमाश्रयणीयम् तद्यथा—"प्रादुर्भूत लक्षणं पुनर्लिङ्गमिति" (च. नि. १।६) अस्यार्थः—प्रादुर्भूतस्य जातस्य व्याधेः लक्षणं चिह्नं पुनर्लिङ्गं रूपं अभिधीयत इति । तत्प्रमाणानुगृहीतादिभिस्तन्त्रदोषैर्दुष्टं वाग्भट रूप लक्षणमिति विद्याधर दूषण तात्पर्यम् ।

अत्रोच्यते—तदेव व्यक्ततांयातमित्यस्यायमर्थः । यल्लिङ्गमव्यक्तव्याधि बोधकानेकलक्ष्यादि सहचरिततया व्यक्तं स पूर्वरूपसंज्ञकमभूत् । तदेव व्यक्तव्याधि बोधकानेकव्यथादि सहचरितं व्यक्तव्याधि

बोधकतया व्यक्तं स रूपमित्युच्यते। तेन व्यक्तस्य वर्तमानस्य व्याधे-बोधकतया व्यक्तत्वेन लिङ्गस्य रूपसंज्ञेति चरकाचार्यानुसारिण्यो वाग्भट वाक्यसरणिः। तदयमर्थः—उत्पन्नव्याधि बोधकमेव लिङ्गं रूपमिति। उत्पन्न पदेन पूर्वरूपव्युदासः एवकारेण निदानादीनि व्यवहर्यन्ते। दोषायुत्पन्नानाऽऽमय गमकत्वादिदं च प्राग्रूपनिरूपण प्रकरणे विशदितम् लिङ्गपदेन चक्षुरादेरपोहः न चैकस्यैव विरुद्ध भविष्यद्वर्तमानयोर्व्याध्योर्गमकत्वमनुपपन्नम्। सामग्रीभेदेन काल-भेदादामपक्वावस्था वा स्थितस्य तस्य···कपित्थस्येव दोषबलत्व दोषाघातकत्वयोरुपपत्तेः। आचार्यसुश्रुतस्त्वर्शो निदाने व्यक्तत्वे निबन्धमेकस्यैव लिङ्गस्य पूर्वरूपत्वं स्पष्टमेवाचष्टे। तेषां भविष्यतां पूर्वरूपाणीत्यादिना यच्चाह अर्शांसि यज्जातानि किं पूर्वरूपविशि-ष्टानि रूपरहिता वा जातानीत्यादि विकल्पकल्पनया प्रतीयमाना र्थापह्नवेनानु बन्धपरत्वमभिहितं भवता। तदप्युक्तरीत्यैव प्रशस्तः। भविष्यद्वर्तमानो वा व्याध्यर्थेन लिङ्गेन ज्ञायते तस्याव्यक्तत्व-निष्पत्तेः प्राग्रूप संज्ञेति यत्र चोदितं न तेषां विशिष्टरूपत्वेन अनुगत तात्पर्यम्। त्वचिशुष्कारुणादीनीत्यन्येषामेव पृथक् रूपादीना मन्यान्यपि सामान्यानि। यथोक्तैः कोपनैः प्रकुपिता दोषाः गुदबली-मांसाङ्कुरान् जनयन्ति। तान्यर्शांसीत्याचक्षते। मांसप्ररोह स्व-रूपत्वमेवार्शसां सामान्यंरूपमिति सुश्रुते पृथगेव सामान्यरूपोपदे-शादिति। (सु. नि. २।४), दृढबलेनाप्युक्तं "गुदजानिमांसाङ्कुरे-रर्शांसीति तन्त्रसंज्ञा" (च. चि. १४।६), तथा ज्वरस्य सन्तापो निस्सरणमतिसारस्य सामान्यरूपमिति। तेन जातेष्येतान्यैवेति वाक्यं पूर्वानुबन्धपरमिति। तदपि न। अनुबन्ध प्रतिपादकशब्दा भावात्। 'प्र' शब्द 'तर' शब्दौ तु प्रव्यक्ततया रूपत्वमेव परं वक्त-व्यौ। नापि मांसाङ्कुरत्वमर्शसः सामान्य लक्षणमिति युज्यते। रोहिणीमांसार्बुदे मांसाङ्कुरेष्वातिव्याप्तेः। यदि चातिव्याप्ति परिहाराय गुदजतत्वेन विशिष्यते तदा चर्मकीलनासार्शः प्रभृतिष्व-व्यतिव्याप्तिर्दुर्वारेति। मांसाङ्कुरत्वमर्शसा सामान्यरूपमिति संज्ञा-मात्रपर मिदं वाक्यं, न लक्षणपरम्। अतएव दृढबलेनोक्तं गुदेजाते मांसाङ्कुरेरर्शांसीति तन्त्रे संज्ञा यथा ज्वरस्य सन्ताप इत्यादि। न वा ज्वरस्यपि सन्तापमात्र लक्षणम् "स्वेदावरोधस्सन्ताप सर्वा-ङ्गग्रहणं तथा। युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते॥ (मा. नि. २।३ तथा सु. उ. ३९।१३), इति सर्व टीकाकारोद्भावित चरकोक्त

(सुश्रुतोक्त) ज्वर लक्षणानर्थव्यापा तात् । सन्तापातिसरणयोश्च ज्वरातिसार लक्षणत्वे वा ग्रहण्योर्व्यभिचारे दुर्वारे संज्ञापरत्वे उक्त्वापि मुख्यां संज्ञां क्वापि गौणीति सर्व समञ्जसम् । तेन अर्शोनिदानोक्ता न व्यर्था सिद्धवाक्यनुसारादपूर्वरूपो अनुपद्रव इत्यत्रापि अल्पपूर्वरूपपरता न मन्तव्या । अनुदरी कन्येतिवदल्पार्थेऽपि भाष्यकारादीनां तत्प्रयोगदर्शनादिति । शेषस्तु **विद्याधर प्रपञ्चः** प्रलापमात्रमिति न प्रतन्यते । (न) चेदं वाक्यं **वाग्भटस्य** किं तु मुनेः **खरनादस्य**। अतो वाग्भटेर्ष्यया मुनिदूषण प्रवृत्तस्य भवतः किं भावमुद्भावयामः ।

> तत् संख्येमदमत्तोऽयं विद्याधर मतङ्गजः ।
> हन्ति प्रतिभट भ्रान्त्या स्वैरं निजमपि प्रभुम् ।।

आगन्तुष्वपि दोषदुष्टेर्विद्यमानतया व्यापकता संप्रति लक्षणस्य । "अभिचाराभिशापाभ्यां अभिषङ्गाऽभिघातजः । आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ।। (मा. नि. २।२६, सु. उ. ३९।७५–८०) इति **सुश्रुतादि** मुनिवचनात् । न च दोषाणां दुष्टिमन्तरेण क्वचिदपि व्याधिजनकत्वं घटत इति । यच्चोक्तं, "आगन्तुर्हि व्यथापूर्वमुत्पन्नो जघन्यं वातपित्तश्लेष्माणां वैषम्यमापादयति (च. सू. २०।७) इति **चरक** वाक्येन दोषदुष्टि दोषमन्तरेणागन्तु रोगोत्पत्तेः । तत्र व्याप्तिलक्षणस्येति । तत्र वाक्यतात्पर्यानवधारणात् । तथा हि यद्यदागन्तु व्याधौ दोषजन्यत्वाभावः प्रतिपाद्यत इत्युच्यते तदा भवतु परतन्त्र विरोधः स्वतन्त्र विरोधस्यैव का गतिः । तद्यथा **चरक** एव—"अत्राभिघतजो वायुः प्रायो रक्तं प्रदूषयन् । सव्यथा शोफवैवर्ण्यं करोति सरुजं ज्वरम् ।।" (च. चि. ३।११३) इत्यभिघातागन्तौ ज्वरे वातजन्यत्वं कथं भवति । तथा "द्वयोस्त्वागन्तुनिजयोः प्रेरणमसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति प्रेरण निदानम् । तेन तयो रप्येकनिदानत्वं सर्वशोऽभिदधत् **चरकाचार्यः** । (च. सू. २०।५) कथं एकस्यैव निदाने भेदमभिप्रेयात् । **खरनादस्तु**—"कामशोक भयाद्वायुः क्रोधात्पित्तं प्रकुप्यति ।" इति । **सुश्रुतोऽपि** निजागन्तुभेदेन व्याधीर्निरूपितम् । प्रोक्तवानत्र सर्वव्याध्यवरोधः—"सर्वेषां च व्याधीनां वातपित्तश्लेष्माण एव मूलं, तल्लिङ्गत्वादृष्टफलत्वादागमाच्च । दोषधातुमल संसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पः इति । (सु. सू. २४।८) एवं चेत्

आगन्तुर्व्यथापूर्वमुत्पन्नमित्यस्य का गतिरिति चेत् आगन्तौ दोषणां परम्परया कारणत्व प्रतिपादनपरत्वेन गति संभवात्। तथा च जैज्जटाचार्योद्भावित तन्त्रान्तरं "साक्षात्पारंपर्येण वा दोषाः एव निजागन्त्वातङ्क कारणं, तत्प्रशमे सर्वव्याधि प्रशमः।" इति। कस्तर्हि निजागन्तुव्याधौ भेदः इति चेत् आत्रापि आचार्येण यद्युक्तयैव युक्तिः सा तु सन्धीयताम्। सा यथा—द्वयोस्तु भेदः मिथ्याहारादि सेवनोद्भूता वातादयो यदा साक्षात् व्याधीन् जनयन्ति तदा निज व्यपदेशः, यदा तु बद्धनिमित्तमासाद्य व्रण वस्तूत्पाद्य पश्चाद्दोषैस्तदनुबध्यते तदागन्तु व्यपदेशः इति। अवश्यं चैतदत्राभ्युपगन्तव्यम्, अन्यथा दोषवैषम्यकथनस्यैव नैष्फल्यापातात्। आगन्तौ दोषप्रत्यनीक चिकित्सा कथनस्यापि व्यायार्थात्। दोषाणामनिदानत्वात् निदानवर्जनस्यैव चिकित्सात्वात्। "संक्षेपतः क्रियायोगो निदानपरिवर्जनम्" इति सुश्रुतोक्तेः। (सु. उ. १।२५) अयं भावः यथा दुष्टेनेति वचने (यथा दुष्टेन दोषेण यथा चानुविसर्पता। निर्वृत्तिरामयस्यासौ सम्प्राप्तर्जाति रागतिः॥ (अ. हृ. नि. १।६), प्राकृतवैकृतानुबन्धानुबन्ध्याद्यनेकविध दुष्टिः दुष्टेन यथा चानुविसर्पता ऊर्ध्वाध स्तिर्यगादि गति भेदेन प्रसर्पिता दोषेण या निर्वृत्तिरामयस्य सा संप्राप्तिरिति तेन दोषैणेति कर्तव्यतो लक्षितं व्याधिर्जन्म संप्राप्तिः। न केवलं तस्य चिकित्सानुपयोगित्वादिति भट्टारहरिश्चन्द्रा दयः। भवति चात्र—

वाग्भट वाग्गुम्फन कर्णधार…र्णवे।
कथमुद्भट मोहो…… भवता हन्त हन्यते॥

इति वाग्भटमण्डने त्रयोविंशतितमं प्रकरणम्।

(चतुर्विंशतितमं प्रकरणम्)

अथ ज्वरमधिकृत्य पुनर्विद्याधरः प्रत्यवतिष्ठते । यथाकृत्वा- ...ज्वरस्य प्राकृतत्वं निरूपितम् तद्यथा--"वर्षाशरद्वसन्तेषु वाताद्यैः ...ात् ।" (अ. हृ ...।५०) इत्युपदेशः । "वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्" कुर्यादिति निर्देशः । (अ. हृ. नि. २।५१) तदेतत् सिद्धान्तविरुद्धम् यतो वात ज्वरस्य प्राकृतत्वमेव नास्ति मुनिमते । यथा हि चरकाचार्यादेशः--"प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भवः । उष्णमुष्णेन संवृद्धं पित्तं शरदि कुप्यति । चितः शीते कफश्चैवं वसन्ते समुदीर्यते ।" (चि. चि. ३।४२) इत्युद्देशः । "वर्षास्वम्लविपाकाभिरद्भिरोषधिभिस्तथा । संचितं पित्तमुद्रिक्तं शरद्यादित्य तेजसा ज्वरं सजनयत्याशु तस्य चानुबलः कफः ।" (च. चि. ३।४३-४४)...सूर्यसंतप्तः स वसन्ते प्रकुप्यति । वसन्ते श्लेष्मणा तस्माज्ज्वरः समुपजायते ।। (च. चि. ३।४६) शरद्वसन्तयोर्विद्वाज्ज्वरस्य प्रतिकारयेत् ।। कालप्रकृति- मुद्दिश्य निर्दिष्टः प्राकृतोज्वरः ।। (च. चि. ३।४७-४८) इत्यन्ततो निर्देशः । तेन वर्षासु मारुतः इत्याद्युद्देशनिर्देशावनुपपन्नावेव युक्तिः साम्यामान्यमिति चेत् न, अनुक्त ग्रहणेऽपि उद्देशनिर्देशौ तत्र युक्तौ । तेनेतदनुगुणेन स्तः वचनमनन्तर संवादोऽस्ति । जतूकर्णावप्ये तदभिमतत्वात् । तथा हि--वसन्तशरदो प्राकृतो अन्यत्र वैकृतः । न च यत्र प्रकुपितोदोषः, प्रकृतिः प्रकृन्याभूतः प्राकृतः इति प्राकृत- त्वाभिधानं वातजेप्यु चितमिति वाच्यम् तदुद्भूतत्वाभावात् । किं तु कालमुद्दिश्य निर्दिष्टः प्राकृतो ज्वरः ...संज्ञेति फलितम् । तदेतत् स्वेच्छाप्रलपितया बालप्रलपितमिति ।

अत्रोच्यते--किमयं दूषणप्रपञ्चो मुनिमताभावाद्युभयभावाद्वा, नाद्यः, मुनिवर चरकादोक्तत्वात् । तथा हि ज्वरे उचितमेव धातु (वात) ज्वरस्य प्राकृतत्वा भिधानं सकलमुनिमत संमतत्वात् । उद्देशनिर्देशाभ्यां चरकाचार्यैर्जतूकर्णादिभिश्चाप्युक्तै । कथमेतदिति चेत् उत्तर ग्रन्थाकलन विधुरमते नवा चरकाकलन दक्षता एषा- मृषा भाषिता प्रत्यनिधी चरकात् । तथा ह्याचार्यादेशः -"प्राकृतः सुख साध्यस्तु वसन्तशरदुद्भवः । इत्यारभ्य" प्रायेणानिलजो दुःखः

कालेष्वन्येषु वैकृतः। हेतवो विविधास्तस्य निदाने संप्रदर्शिताः॥ इति। (च. चि. ३।४८–४९) अस्यार्थः--अनिलत्वे प्राकृतान्तर सहानुक्तया संदेहो माभूदित्यनन्तरमुक्तं अनिल ज्वर इति काल-प्रकृत्यैव प्राकृतो वातजोऽपीत्यर्थः। पूर्वभिन्नोक्तौ कारणमाह हेतवो विविधाश्चास्य निदाने संप्रदर्शिता इति। वैकृतानाह कालेष्वन्येषु वैकृता इति बहुवचनेन ज्वराणां प्राकृतत्वं स्फुटीकृतम्। द्वयोस्सु-साधनतया एकः प्राणैः दुस्साधयितोऽन्यस्सस्फुटः स्पष्टोऽर्थः। खरनाद वचसि--"ज्वरे वसन्ते कफजश्शरदोऽसौ सुपैत्तिकः। प्राकृतौ सुखसाध्यो भौ कालप्रकृति संभवात्। धर्मान्तकालजोऽन्यस्तु प्राकृतोऽपि गुरुज्वरः॥" इति एतदुभयानुरोधेन जातूकर्णादयोऽपि–"वसन्त शरदा प्राकृतस्सुसाध्यः अन्यत्र वर्षासु यश्च प्राकृतो यश्च वैकृतः तत् द्वयं दुस्साध्यमित्यर्थवद्वयोऽयमिति सर्वं सुस्थम्।

इति वाग्भटमण्डने चतुर्विंशतितमं प्रकरणम्।

(पञ्चविंशतितमं प्रकरणम्)

अथ प्रौढिममवलम्ब्य पुनर्विद्याधरो प्रत्यवतिष्ठते यथा हि-- "गुल्मोष्ठधा" (अ. हृ. नि. ११।३२) इत्यत्र संख्या न संगच्छते 'सर्वजन प्रसिद्धत्वात् पञ्चगुल्मा इति। यथा हि रोगसंग्रहाध्याये (अष्टैदरीयाध्याये) चरकादेशः--पञ्चगुल्मा इति वातपित्तकफ सन्निपात शोणितजाः" (च. सू. १६।४) सुश्रुतोऽपि--"जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते।" (सु. उ. ४२।३) इति दोष भेदाभिप्रायेण तु द्विशष्टिधात्व वा न······वा। अत एवाचार्यै-रित्युक्तम्--"त एवापरिसंख्येयाभिद्यमाना भवन्ति हि। रुजावर्ण-समुत्थान स्थान संस्थान नामभिः। व्यवस्थाकरणं तेषां यथास्थूलेषु संग्रहः।" (च. सू. १८।४२-४३) अष्टौ ज्वरा इत्यादि व्यवस्था-करणं ज्ञात एव। सुश्रुतोऽपि--"तस्मात् प्रसङ्ग संयम्य दोषभेद विकल्पनैः। बिदित्वोपचरद्रोगम्" (सु. उ. ६६।१३) इति। अथ--"निमित्त लिङ्गान्युपलक्ष्य गुल्मे द्विदोषजे दोषबलाबलं च। व्यामिश्रलिङ्गानपरां श्च गुल्मां स्त्रीनादिशेदौषध कल्पनार्थम्॥" (चि. चि. ५।१६) इत्यतः चरकवचनादष्टत्व सिद्धिरिति चेत् न, अस्यान्यार्थत्वात्। इयं हि गुल्मोत्पत्ति निरूप्य दोषत्रयप्रकोप उक्तः। एकदोष स्वनिमित्त लिङ्गानि चोक्तानि सान्निपातिकश्चासा-ध्योऽयमुक्तः। तत्र सर्वोऽपि सान्निपातिको साध्यो माभूदित्युक्तम्। निमित्तलिङ्गान्युपलभ्याकाप्रश्लेषात् द्विदोषं चाधिकज्ञानार्थं त्रीन-परानादिशेत्। अन्यथा सान्निपातिकस्यासाध्यस्य चिकित्सावचन-मुन्मत्त वाक्यं स्यादिति। तस्मात्सर्वसमदोषेत्थे साध्यस्तारतम्ये (न) साध्य इति व्यवस्था। सा च ग्रन्थ श्लेकोऽयम। अतएव स्फुटीकृतः "व्यामिश्र लिङ्गै (दोषै) र्व्यामिश्र एष एव क्रियाक्रमः।" (च. चि. ५।६४) जितोऽसि तन्त्रदोष पदातिभिरिति विद्याधर प्रपञ्चः।

अत्रोच्यते--न विरोध चिकित्सोपयोगि भेदनिरूपणत्वादस्य वचनस्य। न चाष्टोदरीयोक्त पञ्चगुल्मा इति वचन व्याकोपः तस्य। द्वौ ज्वरौ द्विविधान्यर्शांसि सप्तकुष्ठानि इत्यादि वचन-वत्प्रधानमात्र निरूपकत्वात्। अथ निर्देशेप्यभिधानान्नेवं। विस्तर

वचनं हि निर्देश इति चेत् न, यथोद्देशमपि निर्देश इति तत्रैवोक्त-त्वात् । उक्तं **चैतदीश्वरसेनेन**––"सप्तकुष्ठानीत्यत आह, न सप्त कुष्ठानि, चिकित्सिते अष्टादश वचनादित्याक्षिप्ये ब्रूमः दोषे एषां यत्परत्वं तत्परत्वाच्च संग्रहस्येति प्रधान परोऽयं संग्रहः ।" इति । **चन्द्रिकापि**– तेन विषय भेदान्नविरोधः । स्फुटीकृतं चैतन्निदाने स्वयमेव मुनिना––"इह हि पञ्चगुल्मा इति ।" व्याख्यातं च एतत् **भट्टारहरिश्चन्द्रेण** "इह पञ्च प्रधानाः, चिकित्सिते तदुपयोगिनो बिदित्वा लिङ्गान्युपलभ्येत्यादि त्रयो द्वन्द्वजा उक्तास्तेन न स्ववचसो विरोधः इति शब्देन द्योतयतीति ।" अथैव सन्निपातकस्यासाध्यत्वं तत्रौषधकथनमुन्मत्त वाक्यं मा भूदिति तदर्थः । त्रीन् सन्निपातादि तरतमभेदनादि अकारप्रश्लेषात् द्विदोषजे दोषज इति व्याख्यानात् वाऽसंख्येति व्याख्यानात्ताऽसख्येति चेत्, सत्यम्, यदि पूर्वं सन्निपात निरूपणमपि स्यात् । किं तु एकदोषजानभिधाय द्वन्द्वज प्रस्तावे निमित्तमभिधाय सन्निपात अपर्यवोक्तः । किं च सन्निपाते तरतम भेदाभिप्रायत्वे त्रीनिति कथं स्यात् द्वादशा हि भेदास्तारतम्ये सन्निपातस्यैव । द्विदोषज त्रिदोषज इति वचनं एकदोषजस्यपि प्राप्तत्वात् ।

अथ **विद्याधर** कृपया यद्यपरो मीमांसकः प्रत्यवतिष्ठते । उप-क्रमोपसंहारयोर्विरोधे संजात विरोधतमोपक्रमस्य बलवत्वात् । अनिरोधेनोपसंहारे सत्यनुत्पत्तिः रोगसंग्रहाध्यायोपक्रमानुरोधेन निमित्तेत्याद्युपसंहारनयनान्नष्टत्वमिति तदप्यसत् । भिन्नविशेष-त्वात् । न च तयोरुपक्रमोपसंहारत्वमपि । एवं न्यायः अयुग्मद्व्या-मिश्रे संसर्गादि पदानां च गत्यन्तरसंभवे पिपासानाहशूलविशिष्टा । तदुक्तं "कफवातिकं स्वभावगतं स्वेदयेत्गुल्मं नाडीप्रस्तर सङ्करैः । गुटिकाचूर्ण निर्यूहै स्युगुल्मे कफवातजे । गुल्मे पित्तकफोत्क्लिष्टे विरेकस्तु सुखावहः ।।" इति **खरनाद** वचसा न द्वन्द्वजाभिधानादन्य गतिस्सिद्धम् ।

इति वाग्भटमण्डने पञ्चविंशतितमं प्रकरणम् ।

(षड्विंशतितमं प्रकरणम्)

अथ भगन्दरमधिकृत्य पुनर्विद्याधरः प्रत्यवतिष्ठते । यथा हि--गुल्मवदष्टधा भगन्दरोऽपि इति वाग्भटेनाविचार्योक्ता । यथा--दोषैः पृथग्युतैः सर्वैरागन्तुः सोऽष्टमः स्मृतः" (अ. हृ. उ. २८।५) इति । सुश्रुताचार्यस्तु--"वातपित्तश्लेष्मसन्निपातागन्तु निमित्ताः शतपोनकोष्ट्रग्रीवपरिस्राविशम्बूकावर्तोन्मार्गिणो यथा संख्यं पञ्च-भगन्दरा भवन्ति ।" (सु. नि. ४।३) । दृढबलाचार्य वाक्यम-वादीत्--"समासतः पूर्वमुदाहृतं यतो भगन्दरं पञ्चविधं, पृथङ्मलैः समस्तदोष क्षतजं च कथ्यते··· । इति (?) ततोऽग्निवेश-क्रमेऽ-प्येवं विस्तरः । तस्मात्सर्वमुनिसंमतः पञ्चविध एव भगन्दरः । मुनि-रहस्य प्रकाशन व्यतिरेकेण वाग्भटे दूषणं दातु न शक्यते किं । रहस्यप्रकाशनं च सर्वत्र कर्तुं न युज्यते । तस्मान्मुनिमतरहस्यविद्भिः सहृदयैरनयारीत्या वाग्भटोक्त निदानस्थानः सर्व तन्त्रदोषव्याघ्रै-र्भक्षितं बोद्धव्यम् ।

अत्रोच्यते--गुल्मवदेवाविरुद्धमष्ठत्वं भगन्दरस्य । विकृतविष-मसमवेततत्प्रकृतिसमवेतोभयविषयत्वादस्य । विकृतिविषमसमवेत विषयं नाचार्यवचः इति भिन्नविषयत्वात् । कुतएषा प्रतीतिरिति चेत् आचार्यशिल्प एवेत्यवैहि । विकृतिविषमसमवेतानेव हि प्राणेऽभि धात्याचर्यः । न प्रकृतिसमवेतां द्वन्द्वजामित्यर्शो गुल्मादिषु स्फुटेयं शैली । अनुमतं चानुक्तद्वन्द्वज ग्रहणमाचार्याभ्याम् । तथा हि मिश्र-दोषानपि "अपरान् गुल्मांस्त्रीनादिशेदित्याचार्यः । (च. चि. ५।१६) सुश्रुताचार्यस्तु 'षडर्शांसि' इत्यभिधाय (सु. नि. २।३) "अर्शस्सु दृश्यते रूपं यदा दोषद्वयस्य तु । संसर्गं तं विजानीयात् संसर्गः स च षड्विधः ॥ (सु. नि. २।२२) अयमेवमधिकृत्य षडित्यभि धाय द्वन्द्वजानभिदधतो न्यूनाधिकसंख्याद्यवच्छदि संख्याकोपो दुर्निवार । तन्निवारणाय च संख्यायाः किञ्चिद्विषयत्वमङ्गी करणीयम् । संसर्गः स षड्विध इति षड् द्वन्द्वजत्व कथनात् न पृथक् द्वन्द्वजोऽनुमत इति चेत् कथम वधारितोऽयमर्थः अयुग्मता । सति ह्येवं का गतिरेकज-सान्निपातिक कथनस्य । दृश्यते रूपं यदा वै दोषयोर्द्वयोरिति चेत्

गृह्येत । तस्मादयमस्यार्थः—सत्य·····विश्व विकृतिविषमसमवेतः षड्द्वन्द्वः चिकित्सायां ज्ञेयं इत्यलम् ।

तथा च तन्त्रविरोधेन विषयभेदात् । यदा प्रत्यभिज्ञातानि मुनिवचनानि सकलसंहिता वधारणक्षममतिना विद्याधरः भवता यथासंग्रहमिति नूनमनाहृत्य विस्मृतम्—"तेऽर्थाः सग्रन्थ बन्धश्च संक्षेपाय क्रमोऽन्यथा" इति वाग्भटाचार्य वचः । (अ. सं. सू. १।२०)

भवति चात्र

प्रकटीकृत भूत भावि दोषं
जगतो दोषकृतामुपायमाद्यम् ।
गलिताखिल दोष सत्सुसंस्थं
हृदयस्थं विलसत्वतो निदानम् ॥

इति वाग्भटमण्डने षड्विंशतितमं प्रकरणम् ।

इति निदानस्थानोद्धारः

(सप्तविंशतितमं प्रकरणम्)

अथ चिकित्सितमधिकृत्य पुनर्विद्याधरः प्रत्यवतिष्ठते । यथा—ज्वरस्य प्राधान्यमुपायं लङ्घनं वाग्भटो वैद्यराजः उक्तवान् । (अ. हृ. चि. १।१) तस्य परिमाणप्रतिपादनायोक्तम्—"दोषेण भस्मनेवाऽग्नौ छन्नेऽन्नं न विपच्यते । तस्मादादोषपचनात् ज्वरितानुपवासयेत् ।। (अ. हृ. चि. १।१०) अत्र उपवासयेदिति विधेर्निदेशः । ततो दोषपाक पर्यन्तं लङ्घयेदित्यर्थः । तत्र युक्तिमाह भस्मदोषेणाग्नौ च्छन्ने सत्यतोऽन्नं न पच्यते । दृष्टान्तानाह यथा भस्मच्छन्नेऽग्नौ स्थालीस्थम् अत्र दोषाः स्वहेतुभिरित्यादिभिः अग्नेर्बहिनिरस्सारितत्वकथनादाच्छादनानुपपत्तौ भस्मोनेति दृष्टान्त कथनेनैव विरूद्धताः । तथा आदोषपचनादुपवास येदित्यप्यसङ्गतम् । दोषपाकस्य लङ्घनंप्रति कार्यंकृतत्वाभावात् । किं तु बलस्य तथाह्यादेशः "बलाविरोधिना चैनं लङ्घनेनोपपादयेत् ।" (च. चि. ३।१४१) न च बलेसतीति वाक्ये दोषादविरोधः । तत्र हि बलेसति आदोषपचनादुपवासयेदित्यर्थस्स्यात् । स चापिविरुद्धः । "लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले । विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते ।।" (च. चि. ३।१४०) इत्यादि वचनैः बलेसति ज्वरोपगमपर्यन्तं लङ्घयेदिति सर्वमुनिरहस्य विरोधात् । अथ······सर्वमुनि संमतं लङ्घनस्याकृतकार्यत्वाच्च । तन्निवृत्तौ इति चेत् न, "अनवस्थित दोषाग्ने लङ्घनं दोषपाचनम् । ज्व[illegible] दीपनं काङ्क्षारुचिलाघवकारकम् ।।" (सु चि. उ. ३९।१०३) इत्यादिभिः पाचकत्वज्वरघ्नत्वस्याविकथितत्वात् । अथ दोषपाके निरामत्वं निरामत्वे पुराणत्वम् । तथा च लङ्घन निषेधात् जितं मयेति चेत् न, दोषपाके पुराणत्वमिति सिद्धान्ताभावात् । किं तु पारिभाषिकं । येन······नन्तरं त्रयोदशाह्नि तथा संसर्जन क्रमोऽपि । यथा मर्यादापरं वचनमसंगतम् । उक्तं च—षडहंवामृदुत्वं वा ज्वरो यावदवाप्नुयात् ।।" (अ. हृ. चि. १।२५) इह हि षडाहात् परतो ज्वरस्त्यैक्षणे मृदुत्वं यावदिति द्वितीयःपक्षः । "यावत् ज्वरमृदू भावः षडहं वा विचक्षणः" (च. चिः ३।१५०) इत्याचार्यवचसाऽविरोधः । तथा "ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते । कषायो दोषशेषस्य

पाचनः शमनोऽथवा ॥'' (अ. हृ. चि. १।३९) भवेदिति एतदुक्तम् । तत्र पृच्छते---''मृदौ ज्वरे लघौकोष्ठे (देहे) प्रचलेषुमलेषु च । पक्वं दोषं विजानीयात्'''। (सु. उ. ३९।११५) इति पाकस्य लक्षणमित्योक्तम् । यथा पाक विहिते किमत्र शिष्यते । यतः कषायः अविहिते दोषपाचनार्थं शक्यं भागश इति तु न कश्चित् । तथा--''सप्ताहादौषधं किंचिदाहुरन्ये दशाहतः । केचिल्लध्वन्न भुक्तस्य'''॥'' (अ. हृ. चि. १।४२) इत्यादिमपि तत्तत्रगुक्तम् । तदसत् । लङ्घनं भुक्तस्येव हि सप्ताहादि भेषज कथनम तन्नमतत्रयमिति विद्याधर प्रपञ्च रहस्यम् ।

यत्र च साक्षाच्चरकसुश्रुतोक्त श्लोकाः वाग्भटेन लिखिताः ।--यथा ''सन्निपात ज्वरस्यान्ते कर्णमूले सुदारुणः । शोथस्संजायते तेन कश्चिदेव विमुच्यते ॥'' (अ. हृ. चि. १।१४९ इत्यादि श्लोकेषु यद्यपि दूषणं नास्ति तथापि तत्र चोरदण्डेन दण्डनीयो वाग्भट चोरः ।[1]

विहरतां हरिणायत लेचना
लसितदर्पिक दर्पक दर्पकृत् ।
मह इहोच्छ्रितसूर शतोपमं
हृदयदोष मनोहरणं पुरः ॥

अत्रोच्यते---मुनिमत विरोधाभावात् वादित्वाच्च किमत्रानुपपन्नमिति । अथ सर्वैरग्नेर्बहिर्निस्सार निरूपणात् दोषेणाच्छादन निरूपण भस्माच्छादने दृष्टान्त कथनं चानुपपन्नमिति चेत् उपपन्नमायुष्मतो मतं स्यात् । यदि सर्वैः पाचकाग्नेः बहिर्निस्सारो निरूपित स्यात् न च तदस्ति । तथा हि--तदाहुत वचनेष्वेव विचार्यतो स्फुटोऽर्थः । तत्र मुनिवचांसितावत् रूक्षादिभिः प्रकुपितो वायुरग्निमुपहत्य पक्तिस्था नादूष्माणं बहिर्निरस्य''--इति प्राधान्यात् वातज्वरस्य संप्राप्तिमाह--'वायुस्तदा ज्वरमभिनिर्वर्तयति (च. नि. १।२०) यदा अग्नि पाचकमुपहत्यमन्दीकृत्य पक्तिस्थानात् पक्तया पाकक्रियास्थानात्वात् अग्न्याशयो लक्षते, तेन पक्तिःस्थानं यस्यासौ पक्तिस्थानमिति । पाचकोऽग्नि तस्मादूष्माणं तत्कार्यं धातूष्माणं

---

1. This para has been shifted here from the middle of the previous chapter.

बहिर्वासं निरस्य प्रपीडयन् सादात् केवलं शरीरमभिप्रपद्यते इति चिकित्सित वचनस्तु स्फुट एवार्थः। "विक्षिप्यामाशयोष्माणं यस्मात् हृत्वा रसं नृणाम्। ज्वरं कुर्वन्ति दोषास्तु हीयतेऽग्निबलं ततः। यथा प्रज्वलितो वह्नि स्थाल्यामिन्धनवानपि। न पचत्योदनं सम्यगनिल प्रेरितो बहिः। अतोऽग्नि बलार्थं च लङ्घनादि क्रमो हितः॥" (च. चि. ३।२७३–२७४) अत्र विक्षिप्त ज्वालतया हीनबल बाह्याग्नि दृष्टान्तेन दोषैरिवाक्षिप्तोष्मतया हीनबलत्वमेव पावकस्योक्तम् न बहिर्निरासः। "दुस्साध्याऽग्नि दोषाः" इति **सुश्रुत** वचसोऽपि (?) एष चेवाग्नेरर्थो **जैज्जटादिभिर्व्याख्यातः**। यथा दोषा ज्वरागमं जनयन्ति आमाशयं प्राप्य ऊष्मणः धातूष्मणा ऊष्मणश्च—भौमाप्याग्नेयवायव्यः पञ्चोष्माणस्सनाभसाः इत्युक्ताः तच्चाप्येतत् वचनं— ······सहितं रसमागत्य रसस्वेदप्रवाहिणं स्रोतसां मार्गमावृत्य हुताशनमौदर्यं अस्वीकृत्य (मन्दीकृत्य) कायं ऊष्माणं बहिर्निरस्य पक्तिस्थानात् पक्तिःपाकहेतुतया पाचकोऽग्निरुच्यते तत् स्थानात् इति विक्षिप्यमाणोऽन्तराग्नि भवत्याशु बहिश्चरः इत्यत्रापि अन्तःस्थिततया अभिप्रायेण धात्वग्निरेवाभिधानं न पाचकस्य। तत् बहिर्भावे मरण प्रसंगात् इति, धात्वग्नेर्बहिर्निरासः। पाचकस्यत्वाच्छादनं मन्दत्वमित्यविरोधः। किंचित् व्यत्यासात् पाक कदम्बकोऽप्येष **खरनादमुनिनोक्तंतथा** हि—"भस्माच्छन्ने यथा बाह्यज्वाले न्यस्तमिन्धनम्। कायाग्ने दोषसंच्छन्ने लब्धाहारो न पच्यते॥" इति। भस्माग्नि दृष्टान्तविरोधोऽपि यदपि मुनिभिर्लङ्घनस्य बलमेव मर्यादीकृत्य इत्यादि दोषपचनादित्यसंगतमिति तदप्यसत् **सुश्रुताचार्य** संवादित्वात्। तथा हि—"आ ॰॰॰मितैर्दोषैः यावन्तं कालमातुरः। कुर्यादनशनं तावत् ततः संसर्गमाचरेत्॥" (सु. उ. ३९।१०१) अस्यार्थो **निबन्धसंग्रहे**—"यावन्तं कालमातुरो स्तिमितैः दोषैः अप्रचलितरूपैरानद्धो बद्ध इव भवेत्तावन्तं कालं लङ्घयेदिति सम्बन्धः। स्तिमितत्वं च दोषाणामामरसावनद्धत्वात्।" ततः आमाशयो यदानुद्धत्वेऽतिवृत्त संसर्गे पेयादिक्रममाचरेत् इति फलितम्। दोषाणां पाकेसति स्तैमित्यादि निवृत्तिः ततश्च आनद्धत्वे निवृत्ते पेयदानमिति दोषपाकपर्यन्तमेव लङ्घयेदिति। तथा **खरनादे**-"तस्मादादोषपक्तेस्तु ज्वरं लङ्घनपाचनैः।" इति सामान्यविरोधो निषेधप्रतिहतत्वान्नहीनबलादिषु प्रवृत्तिः। तन्न, चरकादि विसंवादोऽपि यच्च संसर्गक्रमे षडहं वा मृदुत्वं वा ज्वरोयावदवाप्नुयात्

इत्यत्र चरकमत संवादित्वमुक्तम् । तन्न, षडहं पेयादेया मध्येऽपि मृदुत्वे किं कार्यमित्याशङ्कायां मृदुतेति पक्ष इति । यावत् ज्वरमृदूभावात् षडहं चेति चरकवचसस्तभिप्रेतार्थेनापि अविसंवादात् । यद्यपि ततः पक्वेषु दोषेषु इत्यत्र पक्वेषु किमवशिष्यते यश्शेषः कषायैः पच्यन्ते इत्युक्तं तदपि असत् । आमता एका दोषाणां अपरा रसस्य, तत्र पक्वेषु दोषेषु इत्यनेन दोषपाकोऽभि हितः । शेषस्य हि रससामता विषयमिति विरोधाभावात् इति । यदपि सप्ताहादौषधमिहात्र ऊर्ध्वं न युक्तस्यैवौषधदाने सप्ताहादिति कल्पनामतत्रित्वोक्तिर्विरुद्धेत्युक्तं तन्न । अस्य सप्ताहाद्यौषध दायकमस्तु तवतानुपातकत्वात् । तथा हि तत् सप्ताहादित्यारभ्य अनिलज्वरितस्यापि देयं स्याद्दोषपाकतः । तच्चैतत् पैत्तिकाभिप्रायम् । वा शब्देन वातश्लेष्मादि ज्वरेऽपि दोषपाके सति भेषजं देयमिति निबन्धसङ्ग्रहे व्याख्यातत्वात् । (सु. उ. ३९।१२०) तेन केचिदित्यस्यायमर्थः—सति लघुभुक्तस्य दोषपाके सत्यादावपि देयमित्याक्षते केचिदिति मतत्रयमिति लघ्वन्नभूक्तस्यैवैतदपि मतमिति लघ्वन्न भुक्तस्येति पादेनोक्ता । आमे अलवणेत्यनेन निषेधमुखेनादोषपाके सत्वे एकमित्येकएवार्थः । व्याख्यानतो दोषविशेष प्रतिपत्ति । न हि सन्देहादि लक्षणमिति न्यायः सर्वत्र तिष्ठते । शेषं पलालम् । भवतिचात्र ।

भवति चात्र

इदं दोषपथात्परिदलित विद्याधरमदे
समुद्योतत्तेजः प्रखरमनुसक्ताखिल दिशम् ।
चिरं शय्यात्समङ्गीकृत जनतमो रोगहरणं
चिकित्सास्थानं सञ्जनयति नवबिम्बं दिनपतेः ॥

इति वाग्भटमण्डने सप्तविंशतितमं प्रकरणम् ।

इति चिकित्सास्थानोद्धारः

(अष्टाविंशतितमं प्रकरणम्)

अथ पुनर्विद्याधरः प्रत्यवतिष्ठते। यथा हि---चिकित्सास्थानानन्तरं कल्पस्थानमारम्भणेन तच्च मुनिमत विरुद्धम्। यतः न केनापि मुनिना पञ्चकर्माणि प्रतिपादितु कल्पस्थानमारब्धम्। तर्हि तेन केनाभिप्रायेण कल्पस्थानमारम्भि। अनेन पञ्चकर्माणि प्रायेणातः प्रतिज्ञाहानिः। तानि पञ्चकर्माणि सूत्रस्थाने अस्माभिः खण्डितानि। तत् खण्डनेन कल्पस्थानं खण्डितमेव। उत्तरत्रवानेन चिकित्सानिदानानि वर्जयित्वा अन्यत्किमपि नोक्तम्। निदानस्थान खण्डनेन चोत्तरंचिकित्सापि खण्डिता। तस्मात् सहृदयै स्वयमेवोक्तन्यायेन विचार्योत्तरतन्त्र खण्डनीयमिति।

अत्रोच्यते---तदसत् भेडादिभिरपि तदभिप्रायेणैव कल्पस्थानस्यारब्धत्वात् न प्रतिज्ञाहानिः। सूत्रस्थाने पञ्चकर्मोद्धारणैव स्थानं समर्थितमेव। निदान चिकिरिसतरूपत्वात् चोत्तरस्य तदुद्धरणे चोदाहृतम्। सांप्रतं च तत्र मण्डन (खण्डन) भूतानीत्यादि तदसत्। महदादयो हि तन्त्रगुणाः। (च. वि. ८।३) तत्र सकलसंहितार्थस्य संक्षिप्ततया प्रतिपादनात् स्पष्टमेव महत्वम्।

"शुद्धेशुक्रार्तवे सत्वं" इत्यादिष्वयि सन्मार्गस्थापकत्वं दर्शितमेव। "अस्थ्ना शतानि षष्ठीनि" इत्यपशब्दशङ्का अपाकरणादपशब्दरहितत्वम्। अध्यायभेदात् स्वस्थवृत्तवैरोधिकान्नयने सङ्कीर्णत्वम्। तेन सिद्धं गुणवत्वं तन्त्रदोषहीनत्वम् समर्थितमेव। यच्च दुर्बोधसम्पूर्णार्थत्वं मुक्तम्।

"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीय यत्" (अ. हृ. सू. ३।२६) प्रकृतयोग्यपरामर्शत्वेन सत्यम् सैव खरनादादिभिः निरूपितस्य परामर्शात्। न तु अनन्तर श्लेष्मक्षयादेरसंबन्धात् विरोधाच्चतदुक्तं भट्टपादैः---"यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सह। अर्थतो ह्यसमर्थानां आनन्तर्यमप्यकारणम्॥ (तन्त्रवार्तिकम्) इति फलितमेतत् यत् ग्रीष्मे आदानपरम काष्ठारूपे अतितीक्ष्णांशु सुतीक्ष्णा सहारब्धं प्रवृत्त इव भवति। अतो बलह्रानिकरोष्ण वीर्याणि यावदीनि त्यजेदिति। न च कट्वम्लयोः स्नैग्ध्याद्द्रवर्जनेनैष हेतुरिति वाच्यम् बलहानिकरत्वस्य मुख्यत्वात् निर्वाहादिति।

अथ तन्त्रमण्डन भूतरीत्या "इदमागम सिद्धत्वात् प्रत्यक्षफल-दर्शनात्। मन्त्रवत् संप्रयोक्तव्यं न मीमांस्यं कथञ्चन ॥ (अ. हृ. उ. ४०।८१) इदमागमसिद्धत्वात् इत्यस्य आगमप्रमाण वादिनं प्रत्यागमसिद्धत्वात् न प्रमाणमिति अमीमांस्यमित्युक्तम्। वैतुण्डिकं प्रति 'प्रत्यक्षफलदर्शनादिति,' शिष्यप्रति 'मन्त्रवत् संप्रयोक्तव्यमिति सर्वं समञ्जसम्।......नित्यस्यापि विप्रकीर्णतन्त्रान्तराभियोगि पुरुषान्तर प्रकल्पत्वात्। एतत पाठकस्य वा चिकित्सादिषु तदुपयोगि प्रमेयपरिकलन शक्तिरेवोक्ता। "यदि चरकमधीते तद्ध्रुवं सुश्रुतादि प्रणिगदितगदानां नाममात्रोऽपि बाह्यः। अथ चरकविहीनः प्रक्रियायामखिन्नः किमिव खलु करोतु व्याधितानां वराकः ॥ (अ. हृ. उ. ४०।८४) इत्यस्यापि चरकसुश्रुतयोर्ह्येकत्र विद्यत इति तन्निरसनाय एतत् पठनीयमित्यर्थः यत्परः शब्दः स शब्दार्थः इति च न्यायः। "अभिनिवेशवशादभियुज्यते सुभणितेऽपि न यो दृढमूढकः। पठतु यत्नपरः पुरुषायुषं स खलु वैद्यकमाह्यायमनिर्विदः ॥" (अ. हृ. उ. ४०।७५) इत्यत्रापि झटिति सकलावबोधत्वे अस्य निरूपितम्।" वातेपित्ते श्लेष्मशान्तौ च पथ्यं तैलंसर्पिर्माक्षिकं च क्रमेण। एतद् ब्रह्मा भाषतां ब्रह्मजो वा का निर्मन्त्रे वक्तृ भेदोक्ति शक्तिः ॥" (अ. हृ. उ. ४०।७६) इत्यत्रापि नव नव भेदात् द्रव्यशक्ति भेद इति। यत्रापि वचन भेदः तत्रापि यथामूलं अर्थ भेदाभावात् ज्ञेयमित्यर्थः। "ऋषि प्रणीते प्रीतिश्चेन्मु क्त्वा चरकसुश्रुतौ। भेडाद्याः किं न पठ्यन्ते तस्माद्ग्राह्यं सुभाषितम् ॥" (अ. हृ. उ. ४०।७७) इत्यत्रापि **भेडाद्याः** किं न पठ्यन्ते इति विप्रकीर्णत्वात संक्षिप्तत्वात्। चरकादिवत् तेषामेवपाठः किमक्रियते वैषम्यादेश्चेत् तर्हि अविषमा संस्थिभिः सर्वोऽर्थो सद्ग्रन्थे एव निर्मत्सरतया पठ्यतामित्यर्थः। एतेन स्वशास्त्रार्थ समर्थनम्। "हृदयमिवहृदयमेतत्सर्वायुर्वेद वाङ्मय पयोधेः। कृत्वा यच्छुभमाप्तं शुभमस्तु परं ततो जगतः ॥" (अ. हृ. उ. ४०।८९) 'शुभमस्तु परं ततो जगतः' इत्यपि समीचीनमिति।

रे विद्याधर वाग्भट प्रतिभट प्रख्यातिरेवोचिता
न त्वेवंकृत पद्यतापि रचिता श्रीहर्ष...वाक्यता।
हासं यच्चिरगुम्फितेन वचसा गुम्फेन यातो भवान्
तत् वा ते फलितं विदूषक यतो हासैक धन्यागिरः ॥
रे रे वाग्भट दूषणोद्भुतधियो विद्याधराराधकाः
ते सर्वे श्रृणुतोचितं ममवचस्सन्तश्च निर्मत्सरम्।

सर्वत्राणर्वमन्थनोद्भवमदः प्वीयुषसारं रुषा
दोषासङ्क्तिया परैःप्रकुपितैः तत्किश्चकोरा जगुः ॥

विद्याधरेण यत्तूक्तं दूषणं तदिहोद्धृतम् ।
यदन्यदपि वक्तव्यं तट्टीकायां निरूपितम् ॥

समभवद्धरित ········पक्षभृत्
सकलशास्त्रसमुद्र निमग्नधीः ।
निपुण धर्मसितालयो सच्चयो
हरितवंश विभूषणतां गतः ॥
समइवाधिगतोचित विग्रहः
सकलशास्त्रविदां प्रथमस्ततः ।
·····················
समुदभूदिह भट्टशिवाभिधः ॥

कौमारेऽकारि येन प्रथितबुधजितो वेदविध्वसनस्य
प्रौढि प्रख्यापिशङ्का···तथ ··लं वादिनां दत्तकच्चा ।
·······································
सोऽयं वाग्भटमण्डनं ग्रथितवान् ग्रन्थं नृसिंह कविः ॥

एतद्ग्रन्थ समुद्भूत श्रेयसा परमेश्वरः ।
प्रीयतां दक्षिणामूर्ति वैद्यनाथो जगद्गुरुः ॥
इदं रामकवीशानां पादसेवा समुद्भवात् ।
सुकृतादाज्ञया तस्य प्रथतां सुचिरं भुवि ॥

(इति वाग्भटमण्डने उत्तरस्थानोद्धारः)

इति श्री तार्किकतान्त्रिकचक्रचूडामणि रामकवीश्वर शिष्य
भट्टसुदेवतनय पण्डित भट्टनरहरि विरचितं
वाग्भटमण्डनं समाप्तम् ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

शुद्धिपत्रम्

पृष्ठाङ्कः	पंक्तिः	मुद्रितपाठः	शुद्धपाठः
६	1. F. N.	ref. mss.	Here Bopadeva is named as the author of Ayurveda Rasayana commentary but in the twenty-first chapter (PP. 86) Hemadri is credited with it.
६	2. F. N.	ref. mss.	In the printed text of A.Hr. this sentence reads as' 'मोक्षशास्त्र प्रणयनेन वधोपायं दर्शितवान् न तु स्वयं हतवान् ।
१५	३	द्विविश्रो	द्विविधो
२३	४	उचितः	उक्तः
२४	१६	त्यक्षिप्योत्तर	त्याक्षिप्योत्तर
३४	४	मियाजितः	नियोजितः
३५	११	सामुद्रव्य	सामुद्रस्य
६०	१५	पुञ्ज्यादनस्र	युञ्ज्यादनस्र
६४	११	अच्उपनस्य	अच्उपानस्य
	१५	माच्उपानस्य	नाच्उपानस्य

	१६	अच्उपेयस्तु	अच्उपेयस्तु
	१७	शिषग्दृष्टः	भिषग्दृष्टः
६७	९	संगतुंकतुमनुप्सहते	संगतुंकर्तुं अनुत्सहते
७४	१	हृ. सू. २६/६	हृ. सू. २६/६
	११	शास्त्रं	शस्त्रं
	१५	केशवि	केशादि
६९	३	करेण भूतेन	करण भूतेन
	२८	धर्मफलस्य	कर्मफलस्य
८६	३१	यस्वावायु	यस्तावा
८७	६	स्थानेक्ये	स्थानैक्ये
९३	२१	भूतात्पास्वपतः	भूतात्मा स्वपतः
९७	२	भविष्यद्रव्याधि	भविष्यद् व्याधि
	१०	पुवरूप	पूर्वरूप
१००	५	दोषायुत्पन्न	दोषाद्युत्पन्न
१०५	२३	न्मामिश्र	व्यामिश्र